धनासिकेतिराः(रागाः) षडत्यो(न्त्यो) मालवकैशिकः ॥ ३६३ ॥

वीराद्भुतौ रौद्रशान्तौ भयाख्यकरुणाभिधौ ।
शृङ्गारश्च क्रमाज्ज्ञेया रसाः खण्डेषु सप्तसु ॥ ३६४ ॥

मेलापकान्विते न स्यादाभोग(:)सप्तमे न च ।
न्यासो मेलापके न स्यादुद्ग्राहाद्येन वा भवेत् ।
आभोगे नामनी स्यातम उ(तामु)भयोः कविवर्णयोः ॥ ३६५ ॥
इत्युपमालङ्कारः ।

द्वाभ्यां द्वाभ्यां ग(प)दाभ्यां स्यादेकः खण्डस्तथाविधैः ।
त्रिभिः स्यात्कमलानन्दः खण्डो वेदाधिमात्रकः ॥ ३६६ ॥

आलापः प्रतिखण्डः स्यात्प्रयोगे तूपलक्षितैः
गेयश्चाचपुटेनायं प्रबन्धस्तं(न्धः स) निरूप्यते ॥ ३६७ ॥

अस्मिन्ता(स्मिन्ना)लापमारभ्य गीत्वा धातुत्रयं क्रमात् ।
ततो विधाय गमकानालापे न्यासमूचिरे ।
वीरो रसः प्रबन्धेऽस्मिन्रागः स्याद्रससङ्गतः ॥ ३६८ ॥
इति कमलानन्दः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यत्र पाटैश्च तेनैश्च विरुदान्तपदैस्तथा ।
गद्ये वा पद्यबन्धे वा वीरश्रीरिह बध्यते ॥ ३६९ ॥

अनेकदुर्धरदैत्यदानवराक्षसक्षयकारिणं सृष्टिस्थित्यन्तकरणैक-
निरन्तरं अचिन्त्य(म्)
स्मरभरविवशराधाहृदयवल्लभ बालगोपाल धूलिक्रीडाविकूणित
विकृतवदनदर्शनजनितहास कोष्णनयनोदकस्नान(त)मन्दोदरी-
प्रता(ला)पदीक्षादानदक्ष अनन्तकालस्वीकृतभीरुभैरववपुवि(र्वि)-
रचितसकलसङ्गरशास्त्रकोविद रुचिसञ्जातसन्धानविजय
बहुबाहुशालीन देदीप्यमानसुदर्शनजातकम्पावसाददैत्यदयिता-
सम्मोहकारिन् गरलदानप्रवृत्तपूतनास्तनपानव्याजकृष्टरुधिर-
वसाभिस्तिष्कपङ्ककलुषीकृतनन्दगोपगृहप्राङ्गण दप्तदैत्येन्द्र-
स्तम्भास्फालनमात्रादिभूषाभूत(त्राविर्भूत)नरहरिवपुर्वि-
लोकनोत्पन्नरोमाञ्चकञ्चुके(क)साश्चर्यार्यजनप्रवर्तितबहुस्तोत्र
जय जय नारायण ॥ ३७० ॥

शृङ्गारादिरसैः सर्वैरष्टभिर्यै(र्यो)प्रयोजिताः (तः) ।
रससन्दोहनामा स प्रबन्धः परिगीयते ॥ ३७१ ॥

नन्द्यावर्तश्चतुर्वृत्तः स्वस्तिकश्चाष्टवृत्तकः ।
तालस्तत्सङ्ख्यया योज्यो गीतशास्त्रविशारदैः ॥ ३७२ ॥

गद्यैस्तालविहीनैश्च नृत्तैर्वा तालसङ्गतैः ।
रागैरनेकैः कल्पितोऽसौ भवेद्रागकदम्बकः ॥ ३७३ ॥

गद्ये वा पद्यबन्धे वा रागेनैकेन केनचित् ।
तालैश्च बहुभिर्युक्तस्तालवर्ण(र्णव) इतीरितः ॥ ३७४ ॥

देवतास्तुतिसंयुक्तैः पादैश्चैव समाक्षरैः ।
बहुभिर्गीयते या तु तदेत(सा भवे)त्स्तवमञ्जरी ॥ ३७५ ॥

नौमि नारायणं देवं त्रैलोक्यत्राणकारणम् ।
नौमि नो(नी)लोत्पलच्छायं क्षीरोदार्णवशायिनम् ।
नौमि शङ्खगदापाणिं चक्रनीरजधारिणम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नौमि लक्ष्मीकुचाभोगकुङ्कुमारुणितं हरिम् ।
नौमि गोपीमुखाम्भोजविकासनदिवाकरम् ।
नौमि नित्यं सदानन्दं ज्ञानलोचनदर्शनम् ।
नौमि मोक्षपदप्राप्तिकारकं भवतारकम् ।
नौमि दैत्यवधूचर्ष(र्या)चक्राम्बुजनिशाकरम् ।
नौमि पादत्रयाक्रान्तनिःशेषभुवनत्रयम् ॥ ३७६ ॥

उदितस्तवमञ्जर्यां पदानां कल्पनाक्रमः ।
भूलोकमल्लदेवेन भुवनाख्यातकीर्तिना ॥ ३७७ ॥

पदैर्बहुविधैश्चैव विरुदाख्यायकैः पदैः ।
कण्टु(कन्दु)को नाम विख्यातस्तालरागो निजेच्छया ॥ ३७८ ॥

अर्थश्चाध्यात्मिकः प्रास(सः)पादद्वितयशोत(भ)नः ।
उत्तरार्धे भवेदेवं चर्या सा तु निगद्यते ॥ ३७९ ॥

संसारसोपूहदरैः कायहीनं चंडिया ।
कोहलोहमाह बहुकेण तरिया ।
इंदियपयणखरवेगेव हंसि ।
दुक्ति हलाहणिम नडिन पाचधि ॥ ३८० ॥

ईदृक् पदानि चत्वारि दर्शितानि मयाऽधुना ।
अध्यात्मकार्थयुक्तानि चर्यानाम्नि प्रबन्धके ॥ ३८१ ॥

यतिः सप्त(मा)सु मात्रासु विषमासु न विद्यते ।
गीयते तालयुग्मेन सातयेऽ(सा भवेद्)ध्वनिकुट्टनी ॥ ३८२ ॥

संसारसा(ता)रणं जगत्कारणं त्रिदशपालनं नौमि हरिम् ।
दितिजकुलसूदनं दनुजघातनं जलधिजलशायिनं नौमि हरिम् ।
कंसवंशनाशकारणम् । मनुजदेह वासुदेव
मत्स्यकूर्मकोलकाय सिंहवदन नारसिंह वामनाङ्ग
रामकृष्णबुधकल्किरूप देव देव नमोस्तु ते ॥ ३८३ ॥

एवमादिपदैर्भव्यैरिष्टेनार्थेन संयुता ।
भूलोकमल्लदेवेन वर्णिता ध्वनिकुट्टनी ॥ ३८४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अष्टाक्षरस्य पादस्य
अचिन्त्यं नित्यं भगवन्तमनन्तम्
त्रैलोक्यमोहनसमर्थमायानिर्माणनिपुणम्
रावणान्तक(कं)कंसासुरमर्दनम्
मधुकैटभसूदनं बल(लि)बन्धविधायकम्
मु(सु)रत्राणकृतारम्भ(म्भं) मधुकैटभसूदनम् ॥ ३८५ ॥

अनेनैव प्रकारेण पदेषु विरुदेषु च ।
देवमुद्दिश्य भूपं वा वाञ्छितार्थेन गीयते ॥ ३८६ ॥

उदाहरणमाख्यातं वीरशृङ्गारकर्मणि ।
भूलोकमल्लदेवेन क्षपिताशेषवैरिणा ॥ ३८७ ॥

पदैस्तैस्तैश्च तालेन सम(मे)तो यत्र गीयते ।
प्रबन्धो ललितो नाम कथितः सोमभूभुजा ॥ ३८८ ॥

गोपीजननयनेन्दीवरविकासचन्द्र गोवर्द्धनोद्धरण
त्राणगोविन्द गोकुल(त्रातगोकुल)गोविन्द बालक्रीडाकौतुकाद्भुत-
दर्शनजनितदेवकीहृदयानन्द जय जय देव भगवन्मुकुन्द ॥३८९॥

ईदृक्पदानि तेनाश्च तालमाने नियोजिता (ताः) ।
उदाहृतिरिति प्रोक्ता प्रबन्धे ललिताभिधे ॥ ३९० ॥

स्वरैरेकः पदैरेको विरुदैश्च तथा परः ।
एवं खण्डत्रयं कार्यं स्त(स्व)राङ्के तालसंयुतम् ॥ ३९१ ॥

अचिन्त्ये(न्त्यो)ऽपि योगिनश्चिन्त्य(न्त्यो) निर्गुणोऽप्यगु(ग)-
णितग(गु)णो जयति गुणवान् भक्तजनवत्सलः
श्रीवत्सलाञ्छनो विष्णुः ।
रावणमहाशैलं(ल)कुलिशघातं(त) कंसामु(सु)रगजपञ्चानन
बाणबाहुदावानल हिरण्यकशिपूरःस्थलविदारणदार(रु)णक्रकच
॥ ३९२ ॥

एवं पदैश्च विरुदैर्दर्शितं खण्डयुग्मकम् ।
खण्डमाद्यैः(द्यं)स्वरैर्ज्ञे(र्गे)यमेवं खण्डत्रयं भवेत् ॥ ३९३ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अनि(भी)ष्टं नायकं कृत्वा देवं वा वसुधाधिपम् ।
तालेन सङ्गता(तो) गेयाः (यः) स्वराङ्को गेयकारकैः ॥ ३९४ ॥

स्वरैः पदैस्तेनकैश्च यस्य खण्डत्रयं भवेत् ।
खण्डं च गमकोपेतमङ्कध्वनिरितीरितम् ॥ ३९५ ॥

आद्यं स्वराङ्कयज्ञेयं(वङ्गेयं) खण्डयुग्मं मनीषिभिः ।
तृतीयं तेनकैर्गेयं चतुर्थं गमकैस्तथा ॥ ३९६ ॥

उदाहरणमेतस्मिन् प्रबन्धैश्चध्वनाभिधम् (न्धे क च नोदितम्)।
दर्शितं सोमभूपेन मूढानां बोधकारिणा ॥ ३९७ ॥

स्वरैश्चैव तथा पादै(दै)स्तेनैः पादैस्तथार्धकम् ।
क्रमेणैव(वं) चतुर्भागैर्गीयते स चतुर्मुखः ॥ ३९८ ॥

अन्यकध्वनि (ङ्कध्वनि)प्रकारेण देये(गेयं) खण्डत्रयं क्रमात् ।
चतुर्थपाठ(र्थं पाठ)कैर्ज्ञे(र्गे)यं गमकास्तत्र वर्जिताः ॥ ३९९ ॥

स्वरैः पादैस्तथा पादै(पादै)र्विरुदैश्च पृथक् पृथक् ।
अन्तरा तेनकोपेत (तः) पञ्चत्तगि(भङ्गि)र्निगद्यते ॥ ४०० ॥

चतुर्मुखप्रकारेण गीयते तेन्नकैर्विना ।
विरुदास्तेनकस्थाने तेनकासा(श्रा)न्तरान्तरा ॥ ४०१ ॥

पञ्चत्त(भ)ङ्गिप्रबन्धस्य दर्शितं लक्षणं मया ।
विशेषकं च सन्धीनां तेनकाः परिकीर्तिताः ॥ ४०२ ॥

श्रीविलास(सः)स्वरादि(दिः) स्यात् श्री(च्छ्री)रङ्ग(ङ्गः)पदपूर्वकः ।
पञ्चानन(नः)पदादि(दिः) स्याद्विरुदादिस्तु मातलिः ॥ ४०३ ॥

तेनादिरुपधिः प्रोक्तो गीतलक्षणवेदिभिः ।
पदं(एवं) पञ्चप्रकारेण पञ्चत(भ)ङ्गि(ङ्गिः) प्रदी(गी)यते ॥ ४०४ ॥

काव्यजैर्गीतसम्भूतैर्योऽलङ्कारैर्विरच्यते ।
अलङ्कारभवो यस्मात् तस्मात्प्रोक्तस्तु मण्डनः ॥ ४०५ ॥

गीतालङ्कारमात्रेण गीतमुत्पाद्य यत्नतः ।
उपमाद्यैरलङ्कारैर्गीयतेऽस्य पदावली ॥ ४०६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यत्र गायति गीतज्ञ(ज्ञः) मण्डनान्मण्डनाभिधः ।
इदं लक्षणमाख्यातं सोमेश्वरमहीभुजा ॥ ४०७ ॥

शृङ्गारादिरसार्थः स्यादष्टभिः परिकल्पितः ।
क्रमेण व्युत्क्रमेणाऽपि रससन्दोह उच्यते ॥ ४०८ ॥

अष्टाक्षरस्य पादस्य चत्वार्याद्याक्षराणि च ।
आवर्तन्ते विलोमेन चतुःपा(तुष्पा)देस्व(ष्व)यं क्रमः ॥ ४०९ ॥

प्रथमस्य द्वितीयं तु द्वितीये प्रथमं भवेत् ।
तृतीयं तु तृतीये तु (च) चतुर्थं च तुरीयके ॥ ४१० ॥

रामाकाममकारामा(मारा) समा(मासमा)स्वस्वमासमा ।
कामास(सी)ममसीमाकामस्वमक्षक्षमस्वम ॥ ४११ ॥

न राजतत(ताल)नियमे(मो) विद्यतेऽत्र कदाचन ।
पदमध्यस्थितं वर्णं गोपयित्वा तु गीयते ।
अक्षरच्युतकं नाम प्रौढि(प्रौढै)रेव हि लक्ष्यते ॥ ४१२ ॥

एवं प्राप्य न चात्यर्थं दुःखशक्तास्तु क्षत्रियाः ।
यत्नं कुरु महाबुद्धे यथार्थः सुखदो भवेत् ॥ ४१३ ॥

यद्वा तद्वा भवेच्छन्दो ता(भा)षया वा कदा(या)चन ।
अनन्वितमिवाताति(भाति) विना वर्णेन केनचित् ॥ ४१४ ॥

यदि क्षिपेत(क्षु) तद्वर्णं तदा भवति सङ्गतम् ।
अक्षि(क्ष)रक्षित्पकं नाम कथितं सोमभूभुजा ॥ ४१५ ॥

मसपसरकं चेति दनं एनं कलकम् ।
क्षे(क्षि)पैकमक्षरं त्वादावर्धं(र्थ)वत्तत्तु गीयताम् ॥ ४१६ ॥

गा(गो)पयित्वा हृदिस्थार्थं यद्रूपे प्रश्नरूपतः ।
समस्तव्यस्तरूपेण तस्यैवोत्तरमुत्तरम् ॥ ४१७ ॥

कः सेव्यः कः क्रतो(तौ)पेयः का स्थिरा या(पा)ति कः प्रियाम् ।
साम्प्रतं सत्यसन्धः कः श्रीमत्सोममहीपतिः ॥ ४१८ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यस्यां रसेन वीरेण सङ्ग्रामचरितं जयः ।
गीयते बहुभिः पादै राहडी सा प्रकीर्तिता ॥ ४१९ ॥

प्रथमे च तृतीये च यमकं प्रान्ततो भवेत् ।
सदोष्ठ इति विख्यातः कथितो लाटभाषया ॥ ४२० ॥

गोरीनयणहंजोरस्वजो कंसहखयकातु ।
सो अम्हण दुरिअइ यवहरतकम्हुतरा डावालु ॥ ४२१ ॥

पूर्वार्द्धता(स्ता)लहीनस्तु गातव्यो गेयकारकैः ।
तालेन वाथ सम्पूर्णो दोहदो गीतवेदिभिः ॥ ४२२ ॥

दोहदस्य तथा चार्द्धं पादद्वयविवर्जितम् ।
द्वितीयं किञ्चिदावर्त्य गातव्यं सब(झोम्ब)डाभिधम् ॥ ४२३ ॥

दोहदस्य पदस्यान्ते(यदा चान्ते) क्रीडते डोल्लरीपदम् ।
डोल्लरी नाम सा प्रोक्ता गीयते लाटभाषया ॥ ४२४ ॥

सप्तविंशतिमात्रश्च त्रिषु पादेषु पानसी ।
आवर्तते द्वितीये तु तृतीये तु विमुच्यते ॥ ४२५ ॥

भाषा तु लाटी विज्ञेया तुरुष्की प्राससंयुता ।
अभीप्सितौ तालरागौ कर्तव्यौ गीतवेदिभिः ॥ ४२६ ॥

पदद्वयं तथा गीत्वा (त्वा) प्रान्ते लोल्लीपदं यदि ।
गीयते सा तु लि(वि)ख्याता लोल्ली प्र(प्रा)कृतभाषया ॥४२७॥

एकं पदं तथा गीत्वा शृङ्गाररसभूषितम् ।
अन्ते देवानुसंयुक्तं गेयमेकपदं भवेत् ॥ ४२८ ॥

निरन्वितपदद्वन्द्वा सानुप्रासेन मण्डिता ।
अन्ते दग्गी(दन्ति)पदोप(पे)ता तन्वि(न्वी)गेया विचक्षणैः ॥४२९।

पदैर्बहुविधैर्नव्यैस्तालेन च समन्वितः ।
वर्ण्यनामसमोपेतः कैवाडः परिगीयते ॥ ४३० ॥

उद्ग्राहो ध्रुवकश्चेति यत्र र(ख)ण्डद्वयं भवेत् ।
स्वरैर्निरन्तरैर्गेयमादितालेन गीयते ॥ ४३१ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वर्ण्यनाम तथा भोगे (ऽऽभोगो) तदन्ते ध्रुवकः पुनः ।
उद्ग्राहेण प्रमुच्येत स्वराख्यं करणं तु तत् ॥ ४३२ ॥

तालेन करणाख्यात(तैः) पादैर्मुरु(टैर्मुर)जसम्भवैः ।
स्वरैः प्रगीयते यत्तु तद्बन्धकरणं विदुः ॥ ४३३ ॥

अनेनैव प्रकारेण हस्तपाद(ट)विवर्जितम् ।
तथा च स्वरसंयुक्तं तत्पादकरणं भवेत् ॥ ४३४ ॥

पाटलास्थ(स्थाने)पदं कार्यं स्वराश्च विहितास्ततः ।
लक्षणं करणस्यैव (वं) पादादिकरणे भवेत् ॥ ४३५ ॥

हस्तपादै(टै)स्तथा तेन(नैः) पदं कार्यं स्वराश्च विहितास्ततः ।
लक्षणं करणस्यैव (वं) पादादिकरणे भवेत् ॥ ४३६ ॥

हस्तपादै(टै)स्तथा तेनपदस्वरसमन्वितः ।
गीयते तालयुक्तो यः सवर्णस(स्व)रको भवेत् ॥ ४३७ ॥

संगीतं धातुकरणैः स्वरैरेवं हि गीयते ।
गातुर्वर्ण(र्य)स्य नाम स्यादातो(भो)गे वर्तिनी तु सा ॥ ४३८ ॥

प्रतितालो लघुर्मन्द(न्दः) कङ्कालश्च कटुकृष्णः (कुडुक्कः) ।
पञ्चैते वर्णगीताः स्युर्वर्तन्यां न द्रुतो लयः ॥ ४३९ ॥

उद्ग्राहः पूर्वभागः स्यात्ततो मेलापको भवेत् ।
ततश्च ध्रुवको ज्ञेयस्ततश्चाभोग इष्यते ॥ ४४० ॥

गीतमुद्ग्राह्यते तेन समुद्ग्राहः प्रकीर्तितः ।
उद्ग्राहध्रुवयोः सन्धिः श्लेषोन्मा(षान्मे)लापको भवेत् ॥ ४४१ ॥

पौनःपुन्याद् ध्रुवत्वाच्च ध्रुवकः परिकीर्तितः ।
ध्रुवस्याभोगकरणादाभोग इति संज्ञितः ॥ ४४२ ॥

अयं समस्तगीतेषु विधिः साधारणो मतः ।
मल्ला(मेला)पकस्तथाभोग आह(ह)तौ क्वापि नाद(ह)तौ ॥४४३॥

सानुप्रासं पदद्वन्द्वं गमकस्तदनन्तरम् ।
ततो वर्ण्यादिपद(क)मेक उद्ग्राह उच्यते ॥ ४४४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवमुद्ग्राहयुगलं तृतीये च पदद्वयम् ।
गीत्वा मेलापको जे(गे)यो गमकैः समलङ्कृतः ॥ ४४५ ॥

ततश्च ध्रुवको ज्ञे(गे)यो गणादिनियमोज्झितः ।
गातुर्नाम्ना समायुक्त आभोगो गीयते ततः ॥ ४४६ ॥

गीत्वाऽऽ भोगं पुनर्गेयो ध्रुवको र(गे)यकारकैः ।
सर्वेषामेव तालानां शारीरं धातुसंज्ञकम् ॥ ४४७ ॥

भूमिर्मो वारि यो ज्ञेयी(यो) हुतभुग्यो(ग्नो)ऽनिलस्तु सः ।
व्योम ते(तो)जो रविः प्रोक्तः शशिभो नक्षत्रविष्टपम् ॥ ४४८ ॥

सुधाकरगणाः पञ्च सु(रा)लयगणस्ततः ।
पदमेकमिदं प्रोक्तं सानुप्रासं तथापरम् ॥ ४४९ ॥

द्र(इ)ति पादत्रयं यस्यामाद्य(मेला)नादावती तु सा ।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ ४५० ॥

यौवनभूषितगोपवधूमुखपद्ममधुकरः (र)
श्यामलविग्रहकान्तिविनिर्जितनव्यजलधर देवकीनन्दन शृङ्गार-
सदना(न)स्मेरसरोरुहसश्रयपिञ्जर-
शोभनवसनकलितसत्कमलानयनाम्बुजविभ्रमभवन
प्रदुग्धाब्धि(ब्धि)कृतशयन दलितपुण्डरीकनयन
कौस्तुभरत्नमरीचिकदम्बकता(भा)सुर वरद पाहि
पुरन्दरगीतक । विरुद(तविरुद)सप्रेमकुसुमशरजनन विमोहित-
निखिलभुवन ।
उत्पत्तिस्थितिकारण प्रतो (भो) नारायण आ सोमेश्वरदेव-
विरचिता । एला नादावती ॥ ४५१ ॥

एवं लक्षणमेतस्यामुदाहरणमीदृशम् ।
ईदृक् (ग्) रागेण सा नित्यं म(न्द)तालेन संयुता ॥ ४५२ ॥

शृङ्गाररसभूयिष्ठकैशिकीवृत्त(त्ति)रञ्जिता ।
पाञ्चालीरीतिसंयुक्ता ज्ञेया नादावती बुधैः ॥ ४५३ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भारती देवता न(त)स्या द्वित(ज)म(मु)ख्यकुलं भवेत् ।
नादावत्या महान्नादो वर्णः श्वेतश्च भाव्यते ॥ ४५४ ॥

इति नादावती ॥
यत्र वह्निगणाः पञ्च षष्ठो वायुगणो भवेत् ।
इदमेक(कं)पदं चान्यत्सानुप्रासं च तादृशम् ॥ ४५५ ॥

ईदृक्पादत्रयान्वेता(योपेता) ज्ञेया हंसावती बुधैः ।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ ४५६ ॥

रौद्रकालानलोद्भूतखड्गप्रभातु(सु)शोभिता
प्र(भा)सुरकरिका (क)राकारकल्पतरुशाखाति(त)ता
राजते कमलायनैः । निर्जितारे उरस्मि(उष्णरश्मि)भानुप्रभाव
प्रतापशिखिकीर्तिरुद्यत्सुधामूर्ति-
बिम्बधाव(म्बाव)धारितदिगन्तसखीप्रदग्धरिपुमण्डलाहतभुवन-
तिमिर । त्रिदश(शा)लये वृतविश्रमकामधेनोरहङ्का(ङ्गा)र-
हानिजगदेक(की)रत्यागलीलायितम् ।
दिग्वधूगीयमाना(न) नाद(त)तप्रसरं धृत्य(हस्त)दैत्यवनि(-ता)-
मुखाम्भोजचन्द्रोदय ।
कीर्तिसुधारसविसारसागर जगदेकवीर
आहत(व)वीर श्रीनारायण । आ सोमेश्वरदेवविरचित(ता)
एला वसंस (हंसा)वती ॥ ४५७ ॥

एवं लक्षणमेतस्यामुदाहरणमीदृशम् ।
रागो हिन्दोलकस्तत्र द्वितीयस्ताल इष्यते ॥ ४५८ ॥

रौद्रो रसो भवेत्तस्या वृत्तिरारत(भ)टी तथा ।
लाटा(टी)रीतिसमायुक्ता गेया गेयविचक्षणैः ॥ ४५९ ॥

हंसावत्या गतिर्भव्या रक्तो वर्णश्च वर्णितः ।
यत्र व्योम्नि(म)गणाः पञ्च दिवाकरगणोन्न(णस्त)तः ॥ ४६० ॥

पदमेकमिदं वात्यान् (चान्यत्) सानुप्रास(सं) द(च)तद्विधम् ।
त्रिभिरेवंविधैः पादैरलानंधा(रेला नादा)वती मता ॥ ४६१ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उदाहरणमेतस्याः कथ्यते सोमभूभुजा ।
कुण्डलादौर्मण्डलोद्दामलेकेशैर्निदारु(र)ण-
शौण्ड सन्तुष्टगीर्वाणमव्याभावजनोहित ।
ता(भा)स्वद्भुत(ज)दण्डप्रकरकलितचक्र कृतार्थीकृतशक्रः (क्र)
कंसासुरास्त्रकदम्बप्रलोपोपदेशक्रम दक्षनिषेविन् ।
शेषदेवारिसंपाधिवार्यक्रतुक्षिप्रनिर्दि(र्द)लितचाणूर ।
त्रिभुवनैकवीर भूभारभूतप्रभूतोल्लाससमुद्भूत-
सङ्ख्यातकृतान्त त्र(त्रा)यस्व लोकत्रप(य)म्
देव लक्ष्मीपतेर्नित्यमन्यंत(नन्त)सम्भ्रमैः कृतम्
गजेन्द्रमोक्षण प्रणतजनरक्षण कालियकुलदमन
पुरुशतशमन देव मधुसूदन ।
आ सोमेश्वरदेववीरदेवविरचिता एला नन्दावती ॥ ४६२ ॥

एवं लक्षणमेतस्या उदाहरणमीदृशम् ।
प्रतितालेन गातव्या रागे मालवकौ (कै)शिके ॥ ४६३ ॥

वीरो रसो भवेदस्या(स्याः) सात्वती वृत्तिरीरिता ।
गौडीरीत्या प्रगातव्या बुधैर्नादा(र्नन्दा)वती सदा ॥ ४६४ ॥

इन्द्राणी देवता तत्र कुलं वैश्यमुदीरितम् ।
नन्दावती सुनन्दा स्यात् पीतवर्णविरञ्जिता ॥ ४६५ ॥

(इति नन्दावती)

एवं क्षोणीगणाः प्रोक्ताः प्रतिवारिगणे ततः ।
प(इ)दमेकपदं तद्वत् सानुप्रासं द्वितीयकम् ॥ ४६६ ॥

एतादृशैस्त्रिभिः पादैरेला भद्रावती भवेत् ।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ ४६७ ॥

नानाकारैर्निजाकारैर्नित्यं विकारितं दैत्येद्राणामन्त्रस्नायुस्फिग्-
वसामज्जास्रुक्कर्षकारिप्रपातपूतनालोहेनताटकार्पिता ।
शक्रस्त्रीनामात्यन्तायार्त्तानां शृण्वन्नाक्रन्दानमन्दान्
लिम्पन् रक्तकिशिक्षा(क्षो)दोद्भूतैर्गोपीगोदानुकदावानलगोपीत-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गोपीनिशान्ता ।
काश्मीरौघच्छायामच्छारक्तामारैः कुर्वाणः स्वकाये
बालादित्याः ता(स्ता)ग्राकाराः शौरे त्वं त्राणं भूपा(या)व्यपाये
सभा मे हिरण्यकशिपुरुधिरालिप्तशरीर छिन्नशूर्पणखाश्रवण-
नासिकाङ्किकृतसंसारव्यतिकर
आच्छादितपापीजननरक देव दामोदर । सोमेश्वरदेव-
विरचिता एला भद्रावती ॥ ४६८ ॥

एवं लक्षणमेतस्यामुदाहरणमीदृशम् ।
कङ्कुभेन प्रसू(गी)तव्या केव(कङ्का)लस्ताल इष्यते ॥ ४६९ ॥

बीभत्सस्तु रसस्तस्या भारती वृत्तिरिष्यते ।
वैदर्भि(र्भ)रीत्या गातव्या एला भद्रावती वरा ॥ ४७० ॥

वाराही देवता चास्याः कुलं शूद्रसमुद्भवम् ।
एला भद्रावती ध्येया कृष्णवर्णोपशोभिता ॥ ४७१ ॥

चतस्रः कथिता (एता) गणैला लक्षणान्विताः ।
मात्रैलाश्च चतस्रः स्युस्तासां वक्ष्यामि लक्षणम् ॥ ४७२ ॥

पदं षण्मात्रमेकं स्याद् द्वितीयं पञ्चमात्रिकम् ।
अनुप्राससमोपेतः पादः प्रथम ईरितः ॥ ४७३ ॥

एवंविधो द्वितीयः स्यात्तृतीयो दशमात्रकः ।
अनुप्रासेन संयुक्तं(क्तः)प्रयुक्तं(क्तः) पञ्चभिः पदैः ॥ ४७४ ॥

विभज्य त्रिषु रागे (पादे)षु द्वात्रिंशन्मातृकाः क्रमात् ।
क्रियते सा भवेदेला रतिलेखेति संज्ञिता ॥ ४७५ ॥

पद्मनयन जलशयन लक्ष्मीस्तनाभोगमध्यस्थितमुक्ताहार
भक्तशरण प्रवि(वि)बुधार्तिहरण सकलदैत्यवंशच्छेदनकुठार
अघहरण भवतारण मे लक्ष्मीकान्त जय जय देव नारायण
नमोऽस्तु ते । आ सोमेश्वरदेवविरचितेयमेलावती लेखा
(रेखावती) ॥ ४७६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ईदृग्लक्षणसंयुक्ता भाषयाऽपि यया कया ।
इष्टेनार्थेन रागेण रतिलेखा प्रती(गी)यते ॥ ४७७ ॥

मात्राश्च रतिलेखाया द्वैगुण्येन नियोजिता(:) ।
हृद्याः पादत्र(दास्त्र)यो यस्याः कामलेखेति सा स्मृता ॥ ४७८ ॥

निहि(ह)तखरासुरदूषण श्रीवत्सभूषण प्रसंसारसागरतारण
निखिलभुवनशरण ।
अमित महाद्भुतविक्रमपालितधर्मक्रम प्रमायावामनरूप
बलिबन्धकर ।
कंसासुरमर्दन दशकन्धरतर्जन धृतजय रघुतिलक
अभिराम राम नमोऽस्तु ते ।
आ सोमेश्वरदेवविरचिता कामलेखेयमेला ॥ ४७९ ॥

ईदृक्पदयुता भव्या लक्षणेन समन्विता ।
इष्टार्थरागभाषाभिः कामलेखा प्रगीयते ॥ ४८० ॥

रतिलेखागता मात्रा त्रि(स्त्रि)गुणाश्चेत्प्रयोजिता(:) ।
विभज्य त्रिषु पादेषु बाणलेखा तु सा भवेत् ॥ ४८१ ॥

नखशिखापादितदैत्यवक्षःस्थल पालितजम्भारातिभुजबलप्रकर
कमलाकस्तूरिकापत्र प्रशमितनिखिलभुवनभङ्ग ।
करकमलपुटाकलितशङ्खसुदर्शन सुकृतशतलभ्यपुण्यदर्शन
गङ्गाप्रवाहप्रभवपदपङ्कजचित्रितजगत्त्रय कालिन्दीसलिलकेलिका-
रत सरभसरचितकालियनिकार जठरकुहरनि(-हित)विष्टपत्रय
जय जय देव जगन्निवास वासुदेव ।
सोमेश्वरदेवविरचिता बाणलेखेयमेला ॥ ४८२ ॥

पादैरेवंविधैर्बद्धा मात्रानियमसंयुता ।
व्य(त्य)क्तान्यनियमा गेया बाणलेखा विचक्षणैः ॥ ४८३ ॥

या मात्रा रतिलेखाया चा(श्रा)तुर्वर्ण्य(र्गुण्य)विभाजिता ।
पादत्रयेऽपि सा प्रोक्ता चन्द्रलेखा सुशोभना ॥ ४८४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शशधर(-कर)निकरविकासितकुवलयदलमेचक
सकलभुवनतलधर्माधर्मविवेचक
करकलितभुवनतलधर्माधर्म मधुकैटभशमन
नाभिनलिननिवासितचतुर्मुख चरितविविधजन देवकीमनोमण्डन
परिपालितसुरपतिविहरणनन्दन करकलितपाञ्चजन्य
भुजविजितमहासुरसमर
अधिशायित(शश)धरकरविशदभुजगतल्प प्रणतजनपीयूषधारा-
साराकल्प गुणगणनिलय निखिलगुणविरहित जय देव पीताम्बर
अखिलभुवनवास तुभ्यं नमः । आ सोमेश्वरविरचिता
चन्द्रलेखेयमेला ॥ ४८५ ॥

एतैर्लक्षणसम्बद्धैर्युक्ता पदकदम्बकै(:) ।
इष्टरागार्थतालेयं चन्द्रलेखा प्रगीयते ॥ ४८६ ॥

एकैकाधिकैर्वर्णैर्दशभिः पदमीरितम् ।
अनुप्रासेन संयुक्तं पदमन्यत्तथाविधम् ॥ ४८७ ॥

ईदृक्पदद्वयं पादस्तद्वत्पादद्वयं परम् ।
पूर्वपादद्वयस्यान्ते गमका वर्णवर्जितः(ताः) ॥ ४८८ ॥

यमकान्ते पदं कार्यं विरुदै(दै)र्वापि वर्णकैः ।
तृतीयपादप्रान्ते च कार्यो मेलापको बुधैः ॥ ४८९ ॥

ततस्तु ध्रुवकः कार्यः सानुप्रासपदद्वयः ।
ध्रुवकान्ते वर्ण्यनाम ततश्चाभोग इष्यते ॥ ४९० ॥

एलादेहमिमं प्राह सोमेश्वरमहीपतिः ।
एला मदनवत्येषा कथ्यते तदुदाहृतिः ॥ ४९१ ॥

अनवरतभुवनशरण प्रणतजनदुरितहरण । गमकः ।
सकलसुरासुरपूजितपदयुगलं
सततविबुधभयशमनं शङ्खाब्जचक्रपाणिदामोदरम् ।
विकचसरसीरुहवदनं सकलशुभनिचयसदनं
लक्ष्मीकण्ठकन्दलहार (रं) संसारमण्डपसूत्रधारं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नमामि रावणान्तकरं रामं गोपीजनमनोहरं रामं
॥ आ ॥ चोलइ(लेश्वर) सरस्वतीवदनाम्बुजमित्रम् । गेया
वि(हि)मदनावती वर्णैला ॥ ४९२ ॥

एवं प्रासयुतैः पादैर्द्विपदैस्त्रिभिरीरिताम् ।
द्विपश्चाङ्कादिकैर्वर्णैर्गातव्या मदनावली (ती) ॥ ४९३ ॥

एला मदनवल्याद्या तावल्लक्षणसंयुता ।
वर्णैर्द्वादशसङ्ख्याकैः शशिलेखा निगद्यते ॥ ४९४ ॥

मरकतमणिनिचयरुचिरं दधतमुदधिशयनमचिरम्
पीताम्बरधरं लक्ष्मीपतिं विरचितविहगपतिगमनम्
अविनयमदम(त्ता)रिशमनम् । श्रीवत्साङ्कितवत्स(त्सं)-
पुण्डरीकाक्षम् । उदधि(रनिहित)निखिलभुवनम् ।
दलितदशवदनभुजवनम् । तं प्रणमामि दशरथनन्दनम् ।
जनकसुताहृदयनन्दनम् । केशिनिषूदनं केशवदेवं नारायणम् । आ
चोल्लयि सरस्वति(ती)वदनतिलकं गायन्ति शशिलेखा-
वर्णनम् ॥ ४९५ ॥

इत्यनुप्राससंयुक्तैः पादैः षड्भिरलङ्कृता ।
द्वादशाक्षरसङ्ख्यातैः शशिलेखा प्रगीयते ॥ ४९६ ॥

त्रयोदशाक्षरे कार्ये पदे पादत्रयेऽपि च ।
पूर्ववल्लक्षणं शिष्टं प्रभावत्यां निरूपितम् ॥ ४९७ ॥

विहितनतिततिमनुशुभभावकम्प(वकं) दशवदनवनपावकम् ।
प्रलयलक्ष्मीहृदयवल्लभम् । देव(वं)भुवनपतिं हरिम् ।
अधिसलिलनिधिविरचितसेतुम् । जगदवननिधनकरणहेतुम् ।
शुद्धसंवेदनमयं माधवं मधुसूदनं विभुम्
चरणयुगलकृत(स)कलाक्रमणं त्रिभुवनमहितकमलावरणम् । मेधु ।
दुरितभयहरं कौस्तुभभूषणं पीताम्बरवसनं (आ) श्रीधरम् ॥४९८॥

गीतवर्णं समं कृत्वा तालमानविभूषितम् (ता) ।
एला मां प्रे(प्रभा)वती नाम गातव्या गीतकोविदैः ॥ ४९९ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मनुसङ्ख्याक्षरपदैस्त्रिभिः पादैर्विभूषिता ।
एलेयं मालती नाम तदुदाहृतिरुच्यते । ॥ ५०० ॥

निजविभवरचितदशावतारम्
निशितशरशतक्षतदनुजभारम्
प्र(उ?)पूतनासूदनं केशिकन्दनं दामोदरम्
खगपतिगमनमभयप(प्र)दम्
करसरसिजकलितरुचिरगदम्
प्रचण्डदानव(वि)वासिनम् । मधुम(थ)नं रमापतिम् ।
शिशुसमुचिताललितानिहि(लीलानिह)तकंसं स्मरत
नरहरिमिह परमहंसम् । प्रभु ।
संस्मर सङ्गभङ्गकरम् । शङ्खशार्ङ्गधरम् ।
श्रीवत्सवक्षसं त्रिभुवनगुरुं नाथनारायणं अ । ॥ ५०१ ॥

पादानुसारं गीतेन पदत्रयसमेन च ।
प्रयोगैर्बहुलैर्दीर्घैर्नादैर्गायति(न्ति) मालिनीम् ॥ ५०२ ॥

तिथिसङ्ख्याक्षरपदैस्त्रिभिः पादैर्विवर्जितः (राजिता) ।
एला सा ललिता नाम तदुदाहरणं यथा ॥ ५०३ ॥

शिशिरकरकरनिकरसदृशशङ्खकरकमलं रणदलितकुलमुखं (प्र)
मुनिजनवन्दितं चराचरपतिम् । शुचिमणिचयरचितविकटमुकुटम्
बहुदितितनयसमरसुभटम् । अनुगृहीतपार्थं वसुदेवनन्दनम् ।
अजममरपतिसखं भजत हरिमतिशयितसकलमखम् ।
अनुगतवेदाङ्गमन्दिरम् । कैटभरिपुं पद्मनाभं पितामहजनकम् ।
॥ ५०४ ॥

ललितेनैव गीतेन ललितैर्गमकैस्तथा ।
एलेयं ललिता तज्ज्ञैर्गातव्या ललिताक्षरा ॥ ५०५ ॥

निशाकरकराः सङ्ख्या वर्णारब्धपदैस्त्रिभिः ।
पादैर्भागवती प्रोक्ता वर्णैला यतिभिस्तथा ॥ ५०६ ॥

कचाचितरुचिरचारुवक्त्रं पदकमलयुगनिपतितशक्रम् (प्र)
धृतगोवर्द्धनं कृष्णम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुनिभिरपि न समधिगतमपि (ति) गहनम्
अवनितलनिहितबलिदनुजानिहनम् (र्तिहरम्) ॥ प्र ॥
अदितिनन्दनं भुवनभूषणं देवम्
अभिनवजलधरभरसदृशवपुषम् ।
परमपरमपगतरुषम् ॥ मेधृ ॥
सततमहं ध्यायामि विष्णुम् । उपदेशानुगृहीतजिष्णुम् ।
शङ्खचक्रगदाधरं परमात्मानम् ॥ ५०७ ॥

गीतं सुधारसस्यन्दि वर्णमात्रेन (ण) भूषितम् ।
भोगवत्यां तु गातव्यं गमकैश्च विराजितम् ॥ ५०८ ॥

त्रयः पादाः पदैः षड्भिः सर्वैः सप्तदशाक्षरैः ।
एलायां कुसुमावत्यां स्युरुदाहृतिरुच्यते ॥ ५०९ ॥

क्षितिपवनगगनहुतवहजलभुवन प्रणतमुनिजनदितम(द)नुज
। प्र । वेदवेदाङ्गपारग लोकावास विभो श्रीपते ।
कुसुमशरविवशयुवतिशतरतिदक्ष शरनिपतनहतसुरपतिरिपुपक्ष।
प्रतिरुचिपुरोधसं वामम(न)मूर्ते विमलकीर्ते ।
सततगमनविधिविरचितचतुरविहङ्गम
जय जय विदितजननमरणभयभङ्ग (प्र)
दुरिततृणदावानल । अरिष्टदावानल
सकलजनदयालो । शेषशय्याशयालो ॥ ५१० ॥

द्रुतविन्यासगीतेन निबिडैर्गमकैरपि
एला कुसुमवत्येषा गातव्या तारचुम्बिनी ॥ ५११ ॥

मण्डे(ण्ठे)न वा द्वितीयेन प्रतितालेन वा भृशम् ।
एला नियमतो गेया वाद्यैस्तालैः कदाचन ॥ ५१२ ॥

गणमात्रागणानां च रसस्य नियमोऽत्र न ।
वर्णानां नियमादेता वर्णैलाः परिकीर्तिताः ॥ ५१३ ॥

गीत्वा तु प्रथमं पादं गातव्यो गमकस्ततः ।
विरुदं वर्णकं चापि ततो नादेन गीयते ॥ ५१४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पादौ (दो) द्वितीय एवं च गातव्यो व(गे)यकारकैः ।
तृतीयाङ्घ्रेः पदद्वन्द्वं गातव्यं पुर्ववद्बुधैः ॥ ५१५ ॥

गमकैर्विरुदैर्हीनं नादेन च विवर्जितम् ।
ततो मेलापको ज्ञेयः सञ्चालाद्यक्षरादिकः ॥ ५१६ ॥

उच्चनीचस्वरोपेतो गमकैर्विविधैर्वृतः ।
ततश्च ध्रुवको ज्ञे(गे)यो रम्यो रागविभूषितः ॥ ५१७ ॥

आभोगश्च ततो ज्ञे(गे)यो गाननामसमन्वितः ।
पुनश्च ध्रुवको ज्ञे(गे)यो वारमेकमिति स्थितिः ॥ ५१८ ॥

सर्वासामेवमेलानां गानयोगो भवेदयम् ।
वर्णितः सोमभूपेन तद्विदामुपकारकः ॥ ५१९ ॥

वर्णानष्टादशारभ्य वर्णैनैकेन वर्द्धिताः ।
अष्टाविंशतिपर्यन्ता वर्णमाला प्रकीर्तिताः ॥ ५२० ॥

मधुकरी सुस्वरीका करिणी सुरसा तथा ।
प्रभञ्जिनी कुञ्जिनी च विपुला च तडिल्लता ॥ ५२१ ॥

विशाखा तरला चेति ततः कान्तिमती शुभा ।
कथिता वर्णमालैला प्राज्ञैरेकादशैव हि ॥ ५२२ ॥

इत्येता वर्णमालैला वर्णैलाः क्रमतो बुधैः ।
गातव्यास्तु त्रिभिः पादैः पदैः षड्भिरनुक्रमात् ॥ ५२३ ॥

कङ्कालः प्रतितालश्च द्वितीयो मद (ण्ठ) एव च ।
चतुर्थे(र्त्वे)तेषु तालेषु गेयास्त्वेला यथारुचि ॥ ५२४ ॥

आदिमध्यावसानेषु ताल एकः प्रयुज्यते ।
द्रुतमध्यविलम्बेन मानेन सुविचक्षणैः ॥ ५२५ ॥

उद्ग्राहे तु भवेद्यस्याः समानं चरणद्वयम् ।
द्विर्गीत्वा पादमाद्यं च गातव्योंऽघ्रिद्वि(व्योऽङ्घ्रिर्द्वि)तीयकः ॥५२६॥

गीतेनैकेन गातव्यं (व्यो) सप्रासः पदयोर्द्वयोः ।
वर्णहीनस्ततो गेयो नवमेलापको बुधैः ॥ ५२७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तालेनैकेन गातव्यो ध्रुवो वारद्वयं ततः ।
एकगीतं च सम्प्राप्तं ध्रुवस्याद्यं पदद्वयम् ॥ ५२८ ॥

तृतीयश्च चतुर्थश्च गातव्यो नव्यगीततः ।
वर्ण्य(र्ण)नीय गुणौ(णा)धारौ पादौ प्रासयुतौ ध्रुवौ ॥ ५२९ ॥

आभोगश्च ततः कार्यः स्वरैरुचै(चै)रलङ्कृतः ।
देवीनाम्ना समोपेतो नृपनाम्ना समन्वितः ॥ ५३० ॥

सरम्य(रम्यं) सलि(ली)लमाभोगं प्रयुज्य तदनन्तरम् ।
पुनर्ध्रुवं सकृद्गीत्वा ग्रहतालेन मुच्यते ॥ ५३१ ॥

गृ(ग्र)हे मेलापके मोक्षे कार्य एको यथारुचि ।
आदितालोऽथ कङ्कालः प्रतितालोऽथवा बुधैः ॥ ५३२ ॥

ध्रुवे चैव तथाऽभोगे ताल एकः (ष) प्रयुज्यते ।
ग्रहतालं परित्यज्य योज्यस्तालो यथेच्छया ॥ ५३३ ॥

एको रागो भवेदस्यां तालद्वितयमेवहि ।
लक्ष्म दण्डकिकायाश्च कथितः (तं) सोमभूभुजा ॥ ५३४ ॥

वारद्वितयमुद्ग्राहो गीयते च ततो ध्रुवः ।
ध्रुवं (वो) वारद्वयं गेयं (यो) पश्चादाभोग इष्यते ॥ ५३५ ॥

पुनर्गेयो ध्रुवः प्राज्ञैर्गीतलक्षणवेदिभिः ।
मद्रकङ्कालताला भ्यां प्रतितालेन वर्जितम् ॥ ५३६ ॥

अन्यस्तालः प्रयोक्तव्यो दो(झो)म्बडे लक्षणं त्विदम् ।
गारुं गाव्ये(रुग्याख्ये)न तालेन द्वितीयेन तथैव च ॥ ५३७ ॥

अन्यो निःसारुकेन स्यादेकतालिकया तथा ।
षडमी रोंब(झोम्ब)डाः सिद्धा(:) साम्प्रतं तालसंज्ञया ॥ ५३८ ॥

उद्ग्राहे पाद एकः स्यादेकः पादस्तथा ध्रुवे ।
द्विरुद्ग्राहः प्रगातव्यो ध्रुवो वारद्वयं ततः ॥ ५३९ ॥

वर्ण(र्ण्य)नामसमोपेत आभोगस्तदनन्तरम् ।
आवर्तेत ध्रुवो भूयः स भवेल्लम्बकाभिधः ॥ ५४० ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उद्ग्राहे च ध्रुवे चैव पा(प)दमेकं प्रवर्तते ।
आभोगो वर्ण्यनामाङ्को विलम्भः परिकीर्तितः ॥ ५४१ ॥

तालस्त्वन्यो भवेद्यस्मिन्नुद्ग्राहः पादमात्रकः ।
ध्रुवस्तालयुतो यत्र प(प्र)तिलम्भः स उच्यते ॥ ५४२)

यस्योद्ग्राहपदं भिन्नं पूर्वार्धे(न) समन्वितम् ।
गीयते यत्र गीतज्ञैः स भागः कथितो बुधैः ॥ ५४३ ॥

लम्भकेषु भवेद्भागो नियमेन द्वितीयकः ।
झा(झो)म्बडेषु तथा भागविकल्पः प्रतिगीयते ॥ ५४४ ॥

यदुक्तं झोम्बडे लक्ष्म गमकस्य तदेव हि ।
गमकव्यतिरिक्तोयमादितालेन गीयते ॥ ५४५ ॥

लक्षणं लम्भकस्यैव किन्तु ताले(लो) ध्रुवो(वे) भवेत् ।
एकतालीति नाम्नैषा कथिता सोमभूभुजा ॥ ५४६ ॥

करणं च तथैवैला ढेङ्किका झोम्बढस्तथा ।
लम्भको रासकश्चैव तथा स्यादेकतालिका ॥ ५४७ ॥

कन्दवृत्ताधिकः कश्चित्प्रबन्धश्चेन्महा(न्) पुनः ।
अल्पः पश्चात्प्रगातव्य एष सूडक्रमः स्मृतः ॥ ५४८ ॥

त्रिपदी षट्पदी चैव धवलो मङ्गलस्तथा ।
उवी च चर्चरी चर्या राहडी दन्तिका(तण्डकस्)तथा ॥ ५४९ ॥

एते सूडेषु(ष्व)तो गेयाः प्रबन्धा लौकिका मताः ।
विप्रकीर्णाः प्रगातव्या व्यापारेषु पृथक् पृथक् ॥ ५५० ॥

त्रिपदी कण्डने चैव शृङ्गारे विप्रलम्भके ।
प्रायः शास्त्रिभिरेवैषा गेया नानार्थभूषिता ॥ ५५१ ॥

कथासु षट्पदी योज्या विवाहे धवलस्तथा ।
उत्सवे मङ्गलो गेयश्चर्या योगिजनैस्तथा ॥ ५५२ ॥

महाराष्ट्रेषु योषिद्भिरोवी गेया तु कण्डने ।
होलाके चच्चरी गेया राहडी वीरवर्णने ॥ ५५३ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दन्ती गोपालकैर्वादे गातव्या निजभाषया ।
एवं विषयभेदेन प्रबन्धाः परिकीर्तिताः ॥ ५५४ ॥

रागाणां च प्रबन्धानामुक्त(क्तं) लक्षणमुत्तमम् ।
रम्यो गीतविनोदोयं कथितः सोमभूभुजा ॥ ५५५ ॥

विधिर्येषां प्रबन्धानां यादृशः परिकीर्तितः ।
तालेन भाषया रागैः स्वरैः पाटैश्च तेनकैः ॥ ५५६ ॥

विधिना तेन ते गेया न विधिः प्रतिलङ्घ्यते ।
विधिलोपे भवेद्दोषो न सम्यग् लक्षणं भवेत् ॥ ५५७ ॥

अन्येषां च प्रबन्धानां भाषायां नियमो न हि ।
मया संस्कृतया वाचा बोधायोदाहृतिः कृता ॥ ५५८ ॥

भक्त्या भगवतो विष्णो(:) प्रबन्धेषु श्रु(स्तु)तिः कृता ।
तत्त्वेषु नियमो नित्यं प्रबंधेषु विधीयते ॥ ५५९ ॥

विष्णुं वा शङ्करं वापि ब्रह्माणं वा दिवाकरम् ।
विघ्नेशं भैरवं वापि क्षेत्रपालमथापि वा ॥ ५६० ॥

देवीं सरस्वतीं गौरीं महालक्ष्मीं च चण्डिकाम् ।
अन्याश्च देवताः ख्याता गेया(:) स्तुतिपुरःसरम् ॥ ५६१ ॥

नृपं वा युवराजं वा महाशक्तिगुणोर्जितम् ।
महादेवीं बृहद्राज्ञीं प्रियां वा योषिदुत्तमाम् ॥ ५६२ ॥

गायेन्निजेच्छया गाता यत्र चित्तं प्रवर्तते ।
अर्थला(लो)भात्तथान्येषां प्रबन्धो नैव गीयते ॥ ५६३ ॥

मानमिच्छन्यशो भूरि द्रव्यं बहु मनीषितम् ।
न प्राकृते (तं) जने (नं) गायेत् कदाचित् व(द्वे)यकारकः ॥५६४॥

यस्तु गायति लोभेन प्राकृतान् गुणवर्जितान् ।
स निन्द्यः स्यात्सतां मध्ये हास्यस्यायतनं महत् ॥ ५६५ ॥

देवान् गायति यो भक्त्या तस्य मुक्तिर्भवेद् ध्रुवम् ।
यो गायति महीपालं तस्य मु(भु)क्तिर्निरन्तरम् ॥ ५६६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति गीतविनोदोऽयं कथितः सोमभूभुजा ॥ ५६७ ॥

इति गीतविनोद(:)।

सद्यो वाद्यविनोदोऽयं[1] प्रसङ्गादभिधीयते ।
पृथ[2]ग्वाद्यं भवेदेकं द्वितीयं गीतस[3]ङ्गतम् ॥ ५६८ ॥

नृत्तानुगं तृतीयं च तुरीयं गीतनृत्यगम् ।
एवं चतुर्विधं[4] वाद्यं विनोदार्थं महीपतिः ॥ ५६९ ॥

सभ्यैः सह समासीनः शृ[5]णुया[6]त्सुसमाहितः ।
वाद्येन राजते गीतं न नृत्यं[7] वाद्यवर्जितम् ॥ ५७० ॥

तस्माद्वाद्यं प्रधानं स्या[8]द्गीत[9]नृत्यक्रियाविधौ ।
ततं च विततं चैव घनं सुषिर[10]मेव च ॥ ५७१ ॥

चतु[11]र्विधमिदं वाद्यं तस्य वक्ष्यामि लक्षणम् ।
तन्त्रीभेदैः क्रियाभेदै[12]र्वीणावाद्यमनेकधा ॥ ५७२ ॥

दृढतन्तुसमुद्भूत[13]पदोत्तं (पटलं, पटोत्थं, वादित्रं) च ततं[14] मतम् ।
पटहोऽथ[15] हुडु[16]क्का च ढ(ड)क्के द्वे [17]घडसं त(सस्त)था ॥ ५७३ ॥

करडा (टा) मर्दल[18]श्चैव त्रिवली डमरुस्तथा ।
[19]रुजा (ज्झा) च [20]काहुडा (कुडुवा) चैव सेलु[21](ल्लु)काश्च घड (ट)स्तथा ॥ ५७४ ॥

[22]डक्कुली च तथा ढक्का [23]ढम(व)सो दुन्दुभिस्तथा ।
[24]निःसाणकी तथा भेरीत्येवं[25] नानाप्रकारकम् ॥ ५७५ ॥

चर्मनद्धाननं यस्मादानद्धं परिकीर्तितम् ।
तालश्च कांस्यतालश्च घण्टा च[26] जयघण्टिका ॥ ५७६ ॥

---

१. D. पि । २. D. क्वा । ३. D. संमतं । ४. A. श्च । ५. A. श्रुं । ६. D. राज । ७. D. त्तं । ८. A. स्यात् गीत्त । ९. A. नृक्रिया । १०. A. खि । ११. A. भेंदा । १२. D. दैःवी । १३. A पटत्वं च । १४. A. ततमतं । १५. A. व । १६. A. टक्का च । १७. A. वाद्यसम्मतम् । १८. A. लाचे । १९. A. भुंजा । २०. A. कडुका । २१. A. कुका । २२. A. ढेकुली । २३. A. ढसो दुन्दुभिस्तथा । २४. A. निःसाणस्तवका भेरीं । २५. D. व । २६. A. व ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पट्टकम्रादिकं वाद्यं [1]घनमित्यभिधीयते ।
[2]वंशश्च मुहु(शो मधुक)री चैव पाविका पावकस्तथा ॥ ५७७ ॥

सुरु(मुर)ली तित्तिरी शङ्खः काहा(ह)ला शृंग(शृङ्ग)मेव च ।
इत्येवमादिकं वाद्यं सुषिरं परिकीर्तितम् ॥ ५७८ ॥

चतुर्विधस्य वाद्यस्य क्रियाभेदोऽथ कथ्यते ।
एकहस्तं द्विहस्तं च कुडुपाघा[3]तजं तथा ॥ ५७९ ॥

गोलका[4]हननं चैव धनुराघर्षसम्भवम् ।
फूत्कारजनितं वाद्यं वादनं बहुभङ्गिकम् ॥ ५८० ॥

तस्य वादन[5]भेदस्य लक्षणं कथ्यतेऽधुना ।
विवादे च[6] परीक्षायामुत्सा[7]हे त्यागकर्मणि ॥ ५८१ ॥

श्रूयते च यदा वाद्यं पृथग्[8]वाद्यं तदुच्यते ।
देवगेहे नृ[9]पावासे गजवाजिपदान्तिके ॥ ५८२ ॥

आहवे चोत्सवे चेति तद्वदन्येषु कर्मसु ।
गीतनृत्यै[10]र्विना यत्तु भोगार्थं वाद्यते तदा[11] ॥ ५८३ ॥

तद[12]पि प्रोच्यते प्राज्ञैः पृथ[13]ग्वाद्यं पृथ[14]ग्विधम् ।
गीतेन सङ्गतं यत्तु तद्गीतानुगमुच्यते ॥ ५८४ ॥

नृत्तेन सहितं[15] यच्च तन्नृत्ता[16]नुगमीरितम् ।
गीतपात्रा(नृत्या)नुगं वाद्यं तद्भवेद्गीतनृत्य[17]गम् ॥ ५८५ ॥

एवं चतुर्विधं वाद्यं कथितं हर्षदायकम् ।
अङ्गुष्ठ[18]पर्वमात्रं यत्त[19]देवाङ्गुलमीरितम् ॥ ५८६ ॥

वितस्तिर्द्वा[20]दशैतानि तद्[21]द्वयं हस्त उच्यते ।
सुवृत्तः खादिरो दण्डो द्वादशाङ्गुलवेष्टनः ॥ ५८७ ॥

---

१. A. सुखिरं परिकीर्तितं । २. A. drops this and the following two lines । ३. A. घातथा । ४. A. काननं चैव धाराघर्षणसंभवं । ५. A. नं । ६. A. वं । ७ A. त्स्पागकर्मणि. ८. A. थक् वा । ९. A. नवावासे गजवावासे गजवाजिपदांतिके । १०. A. त्तै । ११. A. दाः । १२. D. दा । १३. D. थक्वा । १४. D. क्नि । १५. A. जं १६. A. त्या । १७. D. त्त । १८. A. ष्ट । १९. A. त । २०. D. र्वा । २१. D. तद्वयं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]रन्ध्रत्रयसमायुक्तः श्लक्ष्णो[2] दृष्टिमनोहरः ।
षड्वितस्तिसमायामो [3]गर्भरन्ध्रसमन्वितः ॥ ५८८ ॥

सार्धा[4]ङ्गुलं तु तद्रन्ध्रं[5] सुवृत्तं द्विमुखं भवेत् ।
वरदारुसमुद्भूतः कार्यस्त्र्यङ्गुलविस्तरः ॥ ५८९ ॥

अष्टाङ्गुला[6]यतो[7] रम्यः पार्श्वे[8]तु चतुरङ्गुलः ।
कूर्मपृष्ठोन्नतो मध्ये पत्रिकाधारग[9]र्तकः ॥ ५९० ॥

तन्मध्ये योनिव[10]द्रन्ध्रं अ(न्ध्रम)धोभागे द्विद[11]ण्डकः ।
किञ्चित्समुन्नतो[12] मध्ये निम्नस्तत्पार्श्वयोरपि ॥ ५९१ ॥

दण्डार्धाधारसंयुक्तः सुवृत्तश्चतुरङ्गुलः[13] ।
रन्ध्रप्रमाणस्थौल्येन शङ्कुना च समन्वितः ॥ ५९२ ॥

एवंविधः स्यात्ककुभः खादिरो वा मनोहरः ।
सुपक्वं च सुवृत्तं च ना[14]भिसूत्रसमन्वितम् ॥ ५९३ ॥

वृत्त(न्त)स्थानं तु नाभिः स्याद[15]ङ्गुला सा भवेद्वरा ।
परिणाहो भवेत्तस्य[16] द्विगुणस्त्रिंशदङ्गुलः ॥ ५९४ ॥

छेदयेद्वा([17]यित्वा) मुखं कार्यं द्वादशाङ्गुलविस्तृतम् ।
वीणादण्डाग्र[18]भागः स्यादधः सप्तदशाङ्गुले ।
तुम्बकस्य हि बन्धार्थमक्षिवत्सुखि([19]षि)रद्वयम् ॥ ५९५ ॥

अधोभागेन[20] द(ण्ड)स्य ककुभ विनिवेशयेत् ।
ककुभे पत्रिका स्थाप्या मिश्र[21]लोहमयी शुभा ॥ ५९६ ॥

विस्तारे द्व्य[22]ङ्गुला सा स्यादैर्घ्ये च चतुरङ्गुला ।
कूर्मपृष्ठ[23] समाकारा मध्यनिम्ना च किञ्चन ॥ ५९७ ॥

---

१. D. रंध्रंनुयमसायुक्तः २. D श्लक्ष्णदृष्टिमनोहरः A. शूक्ष्णो दृष्टिमनोहरः । ३. D. गर्भे रंध्रः । ४. A. सार्धांगुलं । ५. A. तद्रधं । ६. A. ल । ७. D. ता । ८. A. प D. पाश्चात्यश्चतुरंगुलः ९. D. र्त्त । १०. A. वद्रंध्रवधो । ११. D. दंडिकाः । १२. A. तौ । १३. A. लं । १४. A. नानाश्रं नाभिसंयुतं । १५. A. त्रं । १६. A. स्या । १७. A..इन्वा । १८. A. य । १९. D. चि । २०. D. तु दंडः स्यात् । २१. A. श्रे । २२. A. द्व्यगुला । २३. A. ष्ट ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रन्ध्रद्वयं स्यात्प्रथमे तन्त्रीं द्विगुणितां न्यसेत् ।
न्यसेदेकगुणां तद्वदन्यरन्ध्रे विचक्षणः ॥ ५९८ ॥

आकृष्य द्विगुणां तन्त्रीं प्रोतां निष्कासयेत्ततः ।
तां च द्विगुणमावर्त्य तुम्बनाभौ निवेशयेत् ॥ ५९९ ॥

कूर्परं नारिकेलस्य समुखं पृष्ठरन्ध्रकम् ।
विन्यस्य तन्त्रीं तद्रन्ध्रे कीलके परिवेष्टयेत् ॥ ६०० ॥

कीलकं भ्रामयेत्तावद्यावच्च सुदृढं भवेत् ।
एवं तुम्बकबन्धोऽयमाख्यातः सोमभूभुजा ॥ ६०१ ॥

तुम्बकस्य तथा चोर्ध्वे साधुसूत्रविनिर्मितम् ।
बन्धनं वेष्टयेद्दण्डे नागपाशेन भूषितम् ॥ ६०२ ॥

तस्मिन् द्विगुणिते पाशे तत्र तन्त्रीं निवेशयेत् ।
समां स्नायुमयीं श्लक्ष्णां सुदीर्घां सुदृढां घनाम् ॥ ६०३ ॥

तयासम्पीड्य तन्त्रीं च ककुभं परिवेष्टयेत् ।
तन्त्रीपत्रिकयोर्मध्ये जीवां तत्र विनिक्षिपेत् ॥ ६०४ ॥

तन्वी स्याद्यङ्गुला दैर्घ्ये यवगोधूमविस्तृता ।
तया सम्पद्यते नादस्तेन जीवेति सा स्मृता ॥ ६०५ ॥

किञ्चिल्लगति नोवेति यन्त्रिकां (तां) तत्र तन्त्रिकाम् ।
लग्ना सैव कला ज्ञेया वीणावादनवेदिभिः ॥ ६०६ ॥

पक्वबंशसमुद्भूता द्वादशाङ्गुलमायता ।
कनिष्ठानखविस्तारा श्लक्ष्णा वृत्त(त्ता) मनोहरा ॥ ६०७ ॥

तुम्बकाच्च ततोऽधस्ताद्दङ्गुलत्रयमानतः ।
वेष्टयेद्दोरिकां सूक्ष्मां त्रिगुणां मन्द्रसूचिकाम् ॥ ६०८ ॥

---

१. AD. तंत्री हि गुणिता न्यसेत् । २. A. वगुणां न तद्वदन्य । ३. A. तंत्री प्रोता निष्कासयेत्तमः ४. A. वृत्य । ५. A. भै । ६. A. कूर्यरं । ७. A. सु । ८. A. ष्ट । ९. A. तंत्री । १०. A. त्रा । ११. A. तुव । १२. A. जाः । १३. A. वार्द्धं । १४. A. त्रं । १५. D. तं बंधे वेष्टयेद्दण्डे । १६. D. दू । १७. A. तत्र निवेशयेत् । १८. A. द्दणं । १९. A. तंत्री । २०. D. त्री । २१. A. स । २२. D. वर्जिता । २३. D. था । २४. A. ल्लासनि नोवेत्ति । २५. A. का । २६. A. या वीणावादवेदिभिः । २७. A. शा । २८. A. ष्ट्रा । २९. A. क । ३०. A. थो । ३१. A. स्था ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रधानरन्ध्रे निक्षिप्य[1] धार्या यत्नेन वैणिकैः ।
वीणामधोमुखीं[2] कृत्वा ग्राह्या वादनहेतवे ॥ ६०९ ॥

एतल्लक्षणयुक्तेयमेकतन्त्री विराजते ।
दर्शनात्स्पर्शनाद्वापि ब्रह्महत्यां व्यपोहति ॥ ६१० ॥

दण्डः शम्भुरुमा तन्त्री ककुभश्च जनार्द[3]नः ।
पत्रिका कमला तुम्बं ब्र[4]ह्मा नाभिः सरस्वती ॥ ६११ ॥

दोरको वासुकिः प्रोक्तो जीवाया[5]न्तु सुधाकरः ।
दो[6]रिकायां स्थितः सूर्यस्तस्मादेषा हि पावनी ॥ ६१२ ॥

दोरिकायास्तलोद्देशं वामे स्कन्धे वि[7]धाय च ।
पार्ष्णिना दक्षिणेनाथ ककुभं धारये[8]द्दृढम् ॥ ६१३ ॥

वामहस्तकनिष्ठा[9]या(यां) वि[10]न्यस्या परिसारिणी ।
वेष्टयित्वानामि[11]कायां समाकुञ्च्य च मध्यमाम् ॥ ६१४ ॥

तत्पार्श्वभागसंलग्नां तर्जन्यग्रेण धारयेत् ।
इति वामकरन्यासः[12] सारणे[13] धारणे[14] स्मृतः ॥ ६१५ ॥

वक्षःस्थलसमुद्देशे सारणास्थापनं भवेत् ।
अत ऊर्ध्वं ततो गच्छेत्क्रियाभेदमवाप्य सः ॥ ६१६ ॥

वामहस्ताद[15]धः कार्यो नितरां दक्षिण(:) करः ।
[16]त्यक्त्वा वितस्ति(स्तिं) जीवा[17]या(:) स्थानं तस्य विनिर्दिशेत् ॥६१७॥

क्रियाभेदमपेक्षा(क्ष्या)सावधश्चोर्ध्वं च गच्छति ।
विहायोपरि वाद्यं तु वामा[18]दूर्ध्वं न गच्छति ॥ ६१८ ॥

वामहस्ते क्रियाभेदाः का(सा)रणे (तिनि)गद्यते ।
सन्निविष्टा तथोत्क्षिप्ता तथा स्यादुभयात्मिका ॥ ६१९ ॥

---

१. A. ध्य । २. D. खां । ३. D. र्द्द । ४. A. ब्राह्मा । D. ब्रह्म । ५. A. यां तु सुधाकाः D. या तु सुधारकः । ६. D. कोदरकायां स्थितः । ७. D. हि धार्य च । ८. A. ये दृढं । ९. A. ष्ठा । १०. D. तुंबस्यो रिसारणं । ११. D. कया । १२. A. सा । १३. D. णा । १४. D. णा । १५. D. ततः कार्या । १६. A. त्यत्का । १७. D. वयोः । १८. A. दूर्ध्वं न प्रोक्ता सारिणा वैणिकैः सह ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तन्त्रीसङ्गममुत्सृज्य संसार(सरे)द्यत्र सारणा ।
सन्निविष्टा तु सा प्रोक्ता सारि(र)णा वैणिकैः सह (दा) ॥ ६२० ॥

[1]स्पृष्ट्वा स्पृष्ट्वा समुत्सृज्य [2]तन्त्रीमुद्याति सा[3]रणा ।
उत्क्षिप्ता सा समाख्याता [4]निष्कले (ला) सकलेऽ(ला)थवा
॥ ६२१ ॥

उत्क्षिप्ता च [5]भवेत्काऽपि संस्पृष्टावसरे क्वचित् ।
सारणा द्विक्रियायोगात्सा भवेदुभयात्मिका ॥ ६२२ ॥

इति [6]त्रिविध उदिष्टः सारणः [7]सरणक्रमः ।
वादनेष्वेव[8]तन्त्र्याश्च सर्वत्रैव विधीयते ॥ ६२३ ॥

मध्यमामुपरि[9] क्रान्तं तन्त्री संवाद्यते यदि ।
तर्जन्या [10]स तु विख्यातः[11] पूतो नाम विचक्षणैः ॥ ६२४ ॥

स पात इति विज्ञेयस्तर्जन्यैव यदाहति[12](:)
तर्जन्यान्तः प्रहरणं स लेखः (संलेखः) परिकीर्तितः ॥ ६२५ ॥

अन्तर्मध्यम[13]याघात उल्लेख इति कीर्तितः ।
[14]मध्य या वाद्यते घातः स तु स्यादवलेह्यकः ॥ ६२६ ॥

तर्जन्या पार्श्वतो हन्याद्धन्यते[15] वा(ऽना)मया हनिः (तिः) ।
[16]तदा तन्त्री[17] [18]समाख्यातो घातः[19]च्छि(तश्चि)न्नाभिधो बुधैः
॥ ६२७ ॥

मध्यमानामिकाभ्यां च बहिराहन्यते यदा ।
तन्त्री स सन्धितो नाम घातः ख्यातो मनीषिभिः[20] ॥ ६२८ ॥

[21]अतश्चतसृभिर्घातो द्रुतं भ्रमरसंज्ञकः ।
एवं दक्षिणहस्तेन क्रियते विविधा हतिः ॥ ६२९ ॥

---

१. A. स्पृष्टात्स्पष्टात्समुत्सृज्य । २. D. तंत्रा । ३. A. रि । ४. A निःक । ५, A. न । ६. A drops. त्रि । ७. D. क्रमस्तथा । ८. A. त्वेक तंत्राद्यः । ९. D. विकांता । १०. A. सा तु । ११. A. ता । १२. A. ति D. निः । १३ A. ग । १४. A. ध्येयो वाद्यने । १५, A. वेतंवासयावनि । १६. A. य । १७. D. तंत्रि । १८. D. भ । १९. D. त । २०. A. मि । २१. D. अचतसृभिःसंघातो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सारणा यत्र संलग्ना तन्त्र्या(:) पृष्ठे प्रक[1]म्पिता ।
स्फुरितो नाम स[2] ख्यातो घर्षणा[3]च्छ्वसितो भवेत् ॥ ६३० ॥

अङ्गुलीभि[4]श्चतसृभिर्हन्यते हन्य(स्त)योर्द्वु[5]तम् ।
बहिस्तन्त्री यदा तज्ज्ञैः कर्तरीति बु[6]धैः [7]स्मृता(तः) ॥ ६३१ ॥

केव[8]लं तु[9] नखैरेव चतुर्भिर्हि[10]न्यते द्रु[11]तम् ।
दक्षिणेनैव हस्तेन स[12]ङ्घा(घा)तो नस(ख)कर्तरी ॥ ६३२ ॥

अङ्गुष्ठपार्श्वसंस्पृष्टा कर्तरी च न (वच्च) हन्यते ।
कनिष्ठासारणाभ्यां च (वा) द्वाभ्यां निर्घोष उच्यते ॥ ६३३ ॥

अन्तस्त्वनामिकाघातो वाममध्याहति[13]र्बहिः ।
तदासौ रेफसंज्ञः स्याद्वैणिकैरभिभाषितः ॥ ६३४ ॥

अनामिकाबहिर्घात[14]स्तर्जन्या यदि धार्यते ।
नादस्तथा समाख्यातो [15]विन्दुर्नाम मनीषिभिः ॥ ६३५ ॥

सार[16]णं तु परित्यज्य तर्जनी निर्गता भवेत् ।
तया[17] चाहन्यते तन्त्री तदा निष्कोटितः[18] परः ॥ ६३६ ॥

सोत्क्षेपं हन्यते तन्त्री यत्र सा[19] सारणा [20]हतम् ।
दक्षिणे कर्तरीयोगः [21]स भवेत्स्खलिताभिधः ॥ ६३७ ॥

तर्जन्यङ्गुष्ट(ष्ठ)योरग्रे सकृ(कृष)त्तन्त्रिकां यदि ।
शुकवक्त्रं[22](क्त्रः) स विज्ञेयः करो वीणाविचक्षणैः[23] ॥ ६३८ ॥

तर्जन्याद्यं कनिष्ठा[24]न्तं द्विविधं परिपत्त(वर्त)नम् ।
तयोस्तु पार्श्वसंस्पर्शाद् भ्रमणं क्रियते करे ॥ ६३९ ॥

स्वरस्थाने यदा [25]वव्री (तन्त्री) द्रुतमायाति सारिता ।
मूर्च्छनासंज्ञको हस्तो [26]दृश्यते वैणिकैः सदा ॥ ६४० ॥

---

१. A. कंपते । २. संख्यातो । ३. णाच्छ । D. णातश्वसि । ४. A. श्चा तिसृभिः । ५. A. र्द्धम् । ६. A. धै । ७. A. क । ८. D. ब । ९. A. ह । १०. A. दतं । ११. A. ससंधातो न कर्तरी । १२. A. नि । १३. A. तो त । १४. A. विदुर्ना विदुर्नाम मनीषिभिः । १५. D. णां । १६. A. य बा १७. A. निष्कोटितां । D निःष्कोटितः । १८. A. स । १९. A. यु । २०. A. ग । २१. D. क्त्रं विज्ञेयः । २२. A. णै । २३. A. ष्टाद्यं विधं । २४. A. क्रमाद्भुत । २५. D. दर्शते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतस्रः संहता यत्र कुञ्चितोऽङ्गुष्ठकस्तले ।
कनिष्ठा[2]तर्जनीस्पर्शस्तन्व्या[3]श्चेत्पार्श्वतो भवेत् ॥ ६४१ ॥

सम्प्रसार इति ख्यातस्त्व[4]र्द्धच(श्च)न्द्रकरः परः ।
कनिष्ठा[5]ङ्गुष्ठसंस्पर्शा[6]द् दृश्यते वाद्यकर्मणि ॥ ६४२ ॥

तलेन हन्यते [7]तन्त्री यदा दक्षिणपाणिना[8] ।
वामतर्जनि[9]कास्पर्शात्तलहस्तः[10] प्रकीर्तितः ॥ ६४३ ॥

अङ्गुष्ठे[11]न सहाङ्गुल्यो यदा स्युः कुञ्चिता मनाक् ।
कनिष्ठा[12]ङ्गुष्ठसंस्पर्शस्तदा स्यात् कुह[13]राभिधः ॥ ६४४ ॥

तदधः[14] स्फुरितो हस्तः श्वसितेन समन्वितः ।
उत्क्षेपपरिवर्ताभ्यां कर्तरीरेफ[15]संयुतम् ॥ ६४५ ॥

उल्लेखरेफसहितं धाराख्यं[16] वादने विदुः ।
शुकस्फुरिततो घो(निर्घो)षैः करभेदैरलंकृता[17] ॥ ६४६ ॥

अर्धकर्तरिसंयुक्ता[18] कौकुटी(कौक्कुटी) नाम कथ्यते ।
स्फुरितैर्मूर्च्छितैर्युक्तः कर्तरीत्रि[19]तयान्वितम् ॥ ६४७ ॥

कङ्कालसंज्ञकं वाद्यं प्राहुर्वाद्यविशारदाः ।
स्पृष्टतारं तु यत्सम्यक्कर्तर्या[20]श्वसितेन च ॥ ६४८ ॥

कुहरेण समायुक्तं वाद्यं वस्तु तदुच्यते ।
कर्तरीश्वसिताभ्यां यत् संयुतं कुहरेण तु[21] ॥ ६४९ ॥

रेफभ्रमरनिर्घोषै[22]र्द्रुतं तत्करणं भवेत् ।
मूर्च्छितस्फुरितैर्हस्तैः कर्तव्या श्वसितेन च ॥ ६५० ॥

निर्वर्त्य[23]ते तु यद्वाद्यं गजलीलं तदुच्यते ।
हस्तौ[24] पर्यायतो[25] यस्मिन्नधश्चोर्ध्वं च गच्छतः[26] ॥ ६५१ ॥

---

१. A. तोंगुष्टक D. वांगुष्टक २. A. ष्टा । ३. A. वेत्याश्चंतो । ४. A. स्तद्वच्चंद्रकरः । ५. A. ष्टांगुल । ६. A. शार्द । D. शात् द । ७. A तत्री । ८. A. नी । ९. A. मि । १०. A. स्तं । ११. A. ष्टे । १२. A. ष्टांगुल । १३. A. कु । १४. A. धस्फु । १५. A. संस्पर्शस्तदास्यात्कुहरामिधः । तदधस्फुरितो हस्तःश्वसितेन समन्वितः । उत्क्षेपपरिवर्ताभ्यां कर्तरीरेफसंयुतं । १६. A. ख्य । १७. D. ताः । १८. A. क्तौकुटी D. क्ताः कौक्कुटी । १९. A. त्रनयान्वितः । २०. D. र्याः । २१. A. भु । २२. A. षेद्रु । २३. A. र्त्त । २४. A. स्तो । २५. A. तौ । २६. A. त ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रेफकर्तरिनिष्कोटैस्तलेनोपरिवाद्यकम् ।
निःशेषकरसंयोगाद् वाद्यं पक्ष(क्षि)रुतं भवेत् ॥ ६५२ ॥

एवं दशविधं वाद्यं प्राह सोमेश्वरो नृपः ।
उपयोगोऽस्य शिक्षायां विवादो नोपयुज्यते ॥ ६५३ ॥

वीणावादनसिध्द्यर्थं निर्मितं शङ्करेण हि ।
दृढास्तनः स्थिरमनाः प्रगल्भश्च जितेन्द्रियः ॥ ६५४ ॥

गात्रसौष्ठवसंयुक्तो हस्तयोर्विजितश्रमः ।
अभीरुश्च सुशारीरो रागरागाङ्गकोविदः ॥ ६५५ ॥

वीणावादनविद्यायां वीणाकारो वरो भवेत् ।
सकलं निष्कलं चेति द्विविधं वाद्यमीरितम् ॥ ६५६ ॥

एकनन्व्यास्त्वयं भेदः कथितः शम्भुना पुरा ।
जीवा लग्ना प्रकर्तव्या यथा नादोऽभिजायते ॥ ६५७ ॥

स्थूलो ध्वनिर्भवेद्यत्र वाद्यं तत्सकलं भवेत् ।
कलाहीना प्रकर्तव्या विन्दोरुत्पादहेतवे ॥ ६५८ ॥

तर्जनीमूलसंलग्ना तन्त्री वै निष्कलं भवेत् ।
नवमुष्टिर्वेणुदण्डस्त्वङ्गुलद्वयवेष्टन(:) ॥ ६५९ ॥

अङ्गुलद्वयविस्तारः ककुभो वक्त्र(क्र) उन्मुखः ।
मेषान्त(न्त्र)निर्मिता (तां)तन्त्री (न्त्रीं) सूक्ष्मा (क्ष्मां) श्लक्ष्णा (क्ष्णां) दृढा (ढां) समा (मां) ॥ ६६० ॥

अष्टादशाङ्गुलामाह तुम्बं वेदाङ्गुलाननम् ।
दन्तनाभिसमायुक्ता दोरीबन्धनवर्जिता ॥ ६६१ ॥

पत्रिका खर्परी(कर्पर?) हीना भवेदालवणी शुभा ।
निष्कलस्य प्रकारेण वाद्या ला(ल)वणिका सदा ॥ ६६२ ॥

---

१. A. कोटैस्तलेनोपरिवाद्यकं पंक्षरुतं भवेत् । २. D. भोगो । ३. A. या । ४. A. निमित्तं । ५. A. न । ६. A. म । ७. A. आभीरस्तु । ८. D. गांक । ९. A. ल । १०. A. च्छि । ११. A. वे । १२. D. विस्तरः मेषांतनिर्मिता । १३. A drops. दृढा । १४. D. नाह । १५. A. तं । १६. D. रा । १७. D. द्य ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बिन्दुनादसमोपेतां तुम्बं निक्षि[1]प्य वक्षसि ।
मध्यमानामिकाभ्यां च वाद्या दक्षिणपाणिना[2] ॥ ६६३ ॥

मन्द्रे मध्ये च तारे च त्रिस्थाने बिन्दुरिष्यते ।
तुम्बीमूलं समुत्पीड्य वामाङ्गुष्ठेन धारयेत् ॥ ६६४ ॥

इतराभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते ।
त्रिस्वरो दक्षिणो पाणिर्वाम[3]स्तत्र चतुःस्वरः॥ ६६५ ॥

एवं सप्रकमेकं स्यादाला(ल)वण्यां प्रतिष्ठितम् ।
किन्नरी द्विविधा प्रोक्ता द्वितुम्बा च त्रितुम्बिका ॥ ६६६ ॥

द्वितु[4]म्बिका भवेल्लघ्वी त्रितुम्बा बृहती भवे[5]त् ।
पञ्चाङ्गुलाधिकं[6] दैर्घ्यं वितस्तित्रयसम्मितम् ॥ ६६७ ॥

पञ्चाङ्गुल[7]परीणाहो वेणुरन्ध्रे सुरन्ध्रके ।
पञ्चाङ्गुलाग्रतः कार्यः सार्ध्द[8]द्व्यङ्गुलविस्तृ[9]तः ॥ ६६८ ॥

शा[10]ङ्कराक्ष(क्षा)मयोदग्र (ग्रः) ककुभः कीलकान्वितः ।
अर्धाङ्गुलेन हीना स्यात्ककुभात्पत्रिकायसी ॥ ६६९ ॥

दै[11]र्घ्या वि(र्घ्यवि)स्तारतश्चैव कूर्मपृष्ठोपमा व[12]रा ।
गृध्रपक्षास्थिनलिका दण्डपक्षेण[13] योजिता (ताः) ॥ ६७० ॥

[14]चतुर्दशमिताः कार्याः कनिष्ठाङ्गुलिविस्तृताः ।
अङ्गुलाद्यङ्गुलं यावत्क्रमशः किञ्चिदुच्छ्रिताः ॥ ६७१ ॥

वा[15]सोमसीविमिश्रेण पञ्चतेन्नविधारिताः ।
आरभ्य [16]व्यङ्गुलात्किञ्चिद्यावच्च चतुरङ्गुलम् ॥ ६७२ ॥

अग्राद् द्व्यङ्गुलमुत्सृज्य सुखि(षि)रं तत्र कल्पयेत् ।
ततोऽप्यङ्गुलमुत्सृज्य मेट(ढ़कं) शरपुङ्खवत् ॥ ६७३ ॥

---

१. A. ष्य । २. A. नां । ३. D. हस्तश्च । ४. D. तुंबी च । ५. A वे । ६. A. कंर्घ्यं । ७. A. लः । ८. र्द्धं । ९. A. स्त । १०. D. शाक । ११. D. र्घ्यादितरतश्चै । १२. D. च । १३. A. न । १४. D. drops this line । १५. D. drops this line । १६. A. अं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कर्तव्यमङ्गुलोत्सेधं [1]तन्त्रीधारणकारणम् ।
अयोमयीं[2] तत्र तन्त्रीं[3] गजकेशसमां[4] दृढाम् ॥ ६७४ ॥
वेष्टयित्वा चले शंसौ (कौ) तं च रन्ध्रे विनिक्षिपेत् ।
[5]षट्छिद्रोसौ भवेत्कण्ठे द्वितीयः स्थिरकीलकः ॥ ६७५ ॥
ऊर्ध्वरन्ध्रादधस्ताच्च[6] प्रथमः [7]शङ्कुरिष्यते ।
पुरतो मेटका (त्) [8]किञ्चित्स्थिर[9]शङ्कुर्निवेश्यते ॥ ६७६ ॥
[10]भ्रामयित्वा व(च)लं शङ्कु (ङ्कूं) तन्त्री (न्त्रीं) कुर्यात्तथा दृढाम् ।
आयसं कि (की)लकं लग्नं चलं शङ्कोर्गलस्थले ॥ ६७७ ॥
[11]स्थापयेत्स्थिरशङ्कौ तु स्थायिमान[12]प्रमाणतः ।
स्वराः(र)स्थानेषु संस्थाप्याः सारिकास्ताश्चतुर्दश[13] ॥ ६७८ ॥
दण्डस्य ककुभस्याधः [14]सन्धौ तच्च नियोजयेत् ।
[15]तृतीयतुर्ययोः सार्योर्मध्ये तुम्बं द्वितीयकम् ॥ ६७९ ॥
प्रथमं लघु [16]तुम्बं स्याद्द्वितीयं पृथुतुम्बकम् ।
कथिता किन्नरी लघ्वी तुम्बकद्वयभूषिता ॥ ६८० ॥
कथ्यते साम्प्रतं रम्या किन्नरी महती मया[17] ।
[18]द्विवितस्त्यधिकायामा परिणाहेङ्गुला[19]धिका ॥ ६८१ ॥
स्ना[20]युतन्त्री समायुक्ता तु[21]म्बकत्रयभूषिता ।
शेषं स्या[22]त्किन्नरीलक्ष्मसार(री)मेटकशङ्कुषु ॥ ६८२ ॥
ककुभे पत्रिकायां च बृहती कर्तरी (किन्नरी) भवेत् ।
अन्याश्च बहवः सन्ति वीणास्तासामिमा वराः[23] ॥ ६८३ ॥
ततस्त्वन्या मया[24]नोक्ता विनोदानुपयोगतः ।
सारीकक्कु[25]भयोर्मध्ये दक्षिणेन करेण तु ॥ ६८४ ॥

---

१. A. तत्री । २. A. यां । ३. A. तंत्री । ४. A. मा । ५. A. डुच्छि । ६. D. त्र । ७. A. शकु । ८. A. किचि । ९. A. शंर्ति । १०. This and the following line is dropped in D । ११. A. स्थ । १२. A. म । १३. A. शा । १४. A. संधो । १५. D. तुंबीय । १६. D. तुंबः । १७. A. था । १८. A. वितस्त्य । D. वितस्त्यभ्यधिकायामा । १९. A. णा । २०. A. स्नां । २१. A. तुबक । २२. D. त्कर्तरी लक्ष्मी । २३. A. रा । २४. A. न्योक्ता । २५. A. कुं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धारयेत्किं[1](त्कि)न्नरीदण्डं मुष्टया शिथिलबन्धया[2] ।
तर्जनीमध्यमायु[3]क्ता उ(तू)ल्लेखपरिलेखने ? ॥ ६८५ ॥

व्याधि (४वाद्य)यन्त्रे प्रयोगेषु तन्त्र्यापाद[5]नकर्मणि (वाद्ययन्त्र-प्रयोगेषु तन्त्रावादनकर्मणि) ।
तर्जनीमध्यमा[6]नाम(मा) सारीणा[7]मन्तरेन्तरे ॥ ६८६ ॥

प्रचा[8]र्यन्ते स्वरव्यक्त्यै(क्त्यै वा)मा:[9] किन्नरिवादने ।
बीजवृक्षशरीरोऽयं [10]कर्करैः सुदृढीकृतः ॥ ६८७ ॥

चर्मवद्वर्तुलो[11]ङ्गो (योऽ)सौ ब्रह्मणा निर्मितः पुरा ।
एकविंशाङ्गुला[12]यामो मध्ये किञ्चित्पृथुर्भ[13]वेत् ॥ ६८८ ॥

मध्या(सिध्य)ङ्गुलं मुखं वामं दक्षिणा[14]स्य (स्यं) त्रयोदश ।
एकाङ्गुलाधिके [15]वक्त्री [16]चर्मणी (णि) वर्तुले घने ॥ ६८९ ॥

मध्ये तयो[17]श्च रन्ध्रा[18]णि चत्वारिंशत् [19]पृथक् पृथक् ।
[20]प्रान्ते रन्ध्राणि कुर्वीत तेषा[21]मङ्गुलमन्तरम् ॥ ६९० ॥

तेषु रन्ध्रेषु वध्रं च सीव[22]नीक्रमतो न्यसेत् ।
तस्मि[23]न्रन्ध्रे तु प्रोतव्या विवरा[24] कर्करात्मिका ॥ ६९१ ॥

अधश्चोर्ध्वं च कर्तव्या पृष्ठोदरनिदर्शिनी ।
मध्यं विवेष्टयेत्प्राज्ञ[25]स्त्रिभि[26]र्वध्रैर्दृढं ततः ॥ ६९२ ॥

तत्र गोमू[27]त्रिकाबन्धं द्विरन्ध्रं स(सं)मुखं न्यसेत् ।
[28]प्रान्ते कुण्डलिके[29] कार्ये कच्छा(क्षा)बन्धनहेतवे ॥ ६९३ ॥

तत्र कच्छां (क्षां) विनिक्षिप्य सव्यतो द्विगुणं न्यसेत् ।
प्रोतां द्विगुणितां कक्षां वध्र[30]नद्धां द्विरश्वलाम् ॥ ६९४ ॥

---

१. D. त्किर्तरी । २. A. ना । ३. A. नाम । ४. A.D. ध्री । ५. A.D. वा । ६. D. मासारीणामंतरेतरे । ७. A. णां मेतरेतरे । ८. A. सार्थते । ९. A. मा । १०. D. कक्करैः । ११. D. प्रे । १२ D. लो । १३. A. भ । १४. A. ण । १५. A. च । १६. D. व । १७. D. पा । १८. A. ध्र । १९. A. drops one पृथक् । २०. A. प्रींत । २१. D. घ्रा । २२. D सावरीतु नतो । २३. A. नंध्रे । २४. A. च । २५. A. ज्ञा । २६. A. र्वध्रे । २७. A. गोमूंत्रिकावद्धं । D. गेसू । २८. A. प्राते । २९. A. ते । ३०. D. म ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुर्वीत यस्य तन्नाम मृदङ्ग इति कीर्तितम् ।
भूतिमिश्रं [1]तथा भक्तं [2]मृदितं च[3] सुचि[4]क्कणम् ॥ ६९५ ॥

पिण्डकं तत्र वामास्ये पूरिकामानतो न्यसेत् ।
तनुमात्रं[5] तथा भक्तं सव्यवक्त्रे विलेपयेत् ॥ ६९६ ॥

ततस्तस्य भवेन्नादः [6]श्रवणोत्सवकारकः ।
तकारश्च धिकारश्च थोंका[7]रो हेंकरस्तथा ॥ ६९७ ॥

[8]नकारश्च सदंकारो मृद[9]ङ्गे पाटवाचकाः ।
सर्वतु(तू)र्येष्वयं मुख्यो मृदङ्गो नादशोभनः[10] ॥ ६९८ ॥

अस्य संयोगमासाद्य वाद्यं सर्वं सुशोभते ।
[11]घातज्ञाः स्थूलवाद्याश्च न विन्द[12]त्य(न्त्य)नुयायिनाम्(ताम्)
॥ ६९९ ॥

अव्यक्त[13]पाठ(ट)का ज्ञेया निन्द्या मार्द[14]ङ्गिका बुधैः ।
मर्मृणे[15] वादने दक्षा गीतघातविशारदाः ॥ ७०० ॥

हौडु[16]क्किकस्यानुगताः श्रेष्ठा मार्द[17]लिका(:) स्तुताः ।
खदिरानोकनो[18](हो)द्भूतो मिता[19]स्यो मध्यमो महान् ॥ ७०१ ॥

त्रिवितस्तिर्भवेद्दे[20]र्घ्यात्(त्ष)ष्ठयङ्गुलसुविस्तृतः[21] ।
पञ्चाङ्गुलं भवेत्तस्य मुखं सव्यापसव्यकम् ॥ ७०२ ॥

चतुर्विंशाङ्गुलं लो(लौ)हं दक्षिणं[22] वलयं भवेत् ।
वामस्य वलयं वल्या[23](ल्लयाः) कुर्यात्किञ्चित्ततोऽधिकम् ॥ ७०३ ॥

चतुरङ्गुलमुत्सृज्य वामास्ये लोहपत्रिकाम् ।
अङ्गुलत्रयविस्तारां दृढं[24] कण्ठे विवेष्टयेत् ॥ ७०४ ॥

---

१. A. न । २. A. मदिनं । ३. A. ब । ४. A. विक्रर्ण । ५. D. नतया । ६. A. श्रा । ७. D. क । A. कारकाः । ८. A. नंकारश्चैव । ९. D. दंगो । १० A. नाः । ११. A. घृ । १२. A. दंत्यसमुधिनां । १३. D. क्तः पाको विज्ञेया । १४. D. ई । १५. D. णो वादना गीतविद्याघातविशारदः । १६. A. टुंकि । १७. D. ई । १८. A. तो । १९. मित्यास्यो । २०. A. धैर्य्यात्पिष्टागुल । २१. A. स्तता । २२. A. णे । २३. A. ल्या । २४. D. ढ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कलशा[1]श्च भवेत्सप्त रीतिकोटि(किट्ट?)विनिर्मि[2]ताः ।
परितः[3]कीलिता[4]स्तेषां चतुरङ्गुलमन्तरम् ॥ ७०५ ॥

रन्ध्राणि तेन मानेन कुर्यात्सव्या[5]स्यचर्मणि ।
आवेष्टय कलशांस्तांश्च वलयं लोहनिर्मितम् ॥ ७०६ ॥

आकृष्य सुदृढं कुर्यात्सप्तरन्ध्रनिबन्धनैः ।
[6]षण्मास(षण्मासि)कस्य वत्सस्य मृतस्यादाय पारिका[7]म् ॥७०७॥

[8]आङ्गुठयं (आगुष्ठ्य) वल्लीवलयं तया सुश्लक्ष्णभूतया ।
वामास्य (स्ये[9]) तत्समावेश्य[10]वलयं सप्तरन्ध्रकम् ॥ ७०८ ॥

कलशेषु निवन्धनीयाच्छिथिलं सूक्ष्मरज्जु[11]भिः ।
सव्यस्य[12] वलयस्यान्ते कल[13]शेभ्यो बहिस्ततः ॥ ७०९ ॥

बन्धनीया[14]दृढं कक्षा कटिवेष्टावधिस्थिता ।
एवं लक्षण[15]संयुक्तः पटहः[16] स्थानकाभिधः ॥ ७१० ॥

स्त्रीनृत्तस्योप[17]युक्तोऽयं कथितः सोमभूभुजा ।
दक्षिणास्ये[18] तु देकारः कवर्गस्य(श्च) द(ङ)वर्जितः ॥ ७११ ॥

टवर्गश्च तवर्गश्च पाट[19]वर्णाः प्रकीर्तिताः[20] ।
वामवक्त्रे[21] तु झे [22]ङ्कारस्त्व[23]धिकः परिहृष्य(ह्य)ते ॥ ७१२ ॥

व्युत्क्रमेण यथाशोभं वाद्यन्ते वाद्यवेदिभिः ।
बाह्यं शरीरजं चर्म [24]कवलं परिकीर्तितम् ॥ ७१३ ॥

आन्तरं जाठरं चर्म नाम्ना स्यादियमुद्दली ।
ईदृशः पटहो य[25]स्तु कवलाप्रमुखद्वयः[26] ॥ ७१४ ॥

नाटके घ[27]टते तज्ज्ञैरूर्ध्ववक्त्रस्तु वाद्यते ।
चतुर्वि(र्वि)शाङ्गुलायामा [28]सु(स्त्व)ष्टाविंशति [29]व(तिवे)ष्टनाः
॥ ७१५ ॥

---

१. A. सा । २. A. मि । ३. A. ताः । ४. A. ता । ५. A व्य । ६. D. षष्ठमासिक । ७. A. का । ८. D. आंगुल्य । ९. A. स्पे । १०. A. श्पा । ११. A. ज्जपुरिः । १२. A. व्यस्प । १३. D. ळ । १४. A. हमी । १५. A. क्षसंयुक्तः । १६. A. ह । १७. A. य । १८. D. स्या । १९. A. टर्णाः । D. टवर्गाः । २० A. ता । २१. A. क्रे । २२. A. सें । २३. D. स्व । २४. A. के । २५. A. ध । २६. D. यं । २७. A. घघवत्तत्तै । २८. D. स्व । २९. D. वेदना ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पिण्डेऽङ्गुलमिता सा स्याद[1]ष्टाङ्गुलमिता[2]न्तरा ।
एकादशाङ्गुले(लं)कार्ये (र्यं)[3] वल्लीमण्डलिके(लकं) शुभे(भम्)
॥७१६॥
उद्दलीपिहिते(तं) कार्ये(र्यं) षड्[4]न्ध्रे(न्ध्रं) सूत्रगुम्फिते(तम्) ।
अर्गलानि पुरस्त्रीणि द्विपार्श्वकलशानि च ॥ ७१७ ॥
पश्चाद्बं[5]धं (बन्धो) विधातव्ये (व्यः) तद्वत्कलशसंयुते ।
मध्ये सूत्रान्तराले च [6]भवेदुदरपट्टिका ॥ ७१८ ॥
तदन्त[7]र्वाद्यकाले [8]तु वामहस्तं विनिक्षिपेत् ।
रज्वा समं वितिपक्(क्ष) द्वये[9]ऽप्यु(योरु)त्कक्ष[10]कौ तयोः ॥ ७१९ ॥
तद्योजनाय द्विगुणा[11]कर्तव्या स्कन्धपट्टिका[12] ।
[12A]अङ्गुलस्य चतुर्भागं छिद्रमे[13]कं प्रकल्पयेत् ॥ ७२० ॥
[13A]हुडुक्कायाश्चतु[14]र्भागे नादार्थं वाद्यवाह(द)कः ।
कृतं भूलोकमल्लेन स्कन्धवाद्यस्य लक्षणम् ॥ ७२१ ॥
झे[15]ङ्कारोऽत्र हुडुक्का[16]यां [17]प्रधानः परिकीर्तित(:)
पादा(टा)क्षराणि सर्वाणि पटहे यानि [18]तानि तु ॥ ७२२ ॥
[19]स्कन्धकूर्परयोगेन [20]सञ्चो(श्चः) हौडुक्किकेऽ(पाटहिके)धमः ।
[21]अङ्गुष्ठ [22]मणिबन्धेन (च) म(स) श्चः पाटहिके वरः ।
पादकम्पप्रयोगेण स चो(सञ्चो) होडुकि(क्कि)को (केऽ)वरः ॥७२३॥
[23]कूर्परा (रे) मणिबन्धे च समुद्भूतस्तु[24] मध्यमः ।
स्कन्धदेशप्रकम्पोत्थ(:) करकूर्परसंयुतम् (तः) ॥ ७२४ ॥
पादकम्पविहीनश्च सचो (सञ्चो) हौडु[25]कि(क्कि)को (के)वरः ।
संचे(सञ्चे)न रहितावेतौ तथा तालेन दुर्लयौ ॥ ७२५ ॥

---

१. A. ह । २. A. तेतरा । ३. A. अलि । ४. A. ङ्घेव्येत्तः ५. A. द्वेधयितत्तद्व ६. A. भेंवेदुदरि । ७. D. दवत् द्विकाले । ८. A. नु । ९. A. यो । १०. D. कस्त । ११. D. णाः । १२. D. काः । १२A. This line is repeated on the next page. १३. A. मेकल्प । १३A. These three lines are repeated on the next page. १४. A. भा । १५. A. झ । १६. A. का । १७. D. प्राधान्यं परिकीर्त्तितं । १८. A. नानि । १९ D. gives this line after the following श्लोक । २०. D स्कंधश्चेदधमोत्तमः । २१. A. drops this stanza which is repeated on the next page. २२. D. मणिवणिवन्धेन । २३. A. कूर्पराणि विबंधाश्च समुद्भूतस्तु मध्यमः । २४. D. स्त । २५. A. ष्लौटुक्किको मतः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अलग्नाङ्गुलिहस्तौ च गीतनृत्य[1]बहि[2]ष्कृतौ ।
हाडु[3](हौडु)क्किकः पाटहिको[4] भि[5]न्द्यादे(निन्द्यावे)वंविधौ मतौ ॥७२६॥

अथ[6] मध्यमयोर्वक्ष्ये लक्षणं समयागतम् ।
सर्वपाटप्रयोगेषु ययोः सं[7]लगतः करौ[8] ॥ ७२७ ॥
[9]संच(सञ्च)हीनौ लयाभिज्ञौ [10]मध्यमौ तौ प्रकीर्तितौ ।
[11]सुसंचौ (सञ्चौ) लग्नहस्तौ च सर्वपाटविशारदौ ॥ ७२८ ॥
गीतनृत्तलयाभिज्ञौ तद्विपाटविचक्षणौ ।
बहुला(ल)प्रतिभायुक्तौ तौ पाट[12]वहुडुक्किकौ (पाटहिकहुडुक्किकौ) ॥ ७२९ ॥

वादकेषु समीचीनौ कथितौ वाद्यवेदिभिः ।
अङ्गुल[13]स्य चतुर्भागं छिद(द्र)मेकं प्रकल्पयेत् ॥ ७३० ॥
हुडुक्का[14]याश्चतुर्भागे नादार्थं वाद्यवाद[15]कः ।
अङ्गुष्ठमणिबन्धेन मञ्च(सञ्चः) पाटहिके वरः ॥ ७३१ ॥
पादकम्पप्रयोगेण सचो (सञ्चो)होडुकि(क्कि)केऽधमः ।
पटहस्य हुडुक्कायाः पञ्च सञ्चान्ब्रुवेऽधुना ॥ ७३२ ॥
स्कन्धकूर्परयोस्तद्वदङ्गुष्ठमणिबन्धयोः ।
वामस्य चरणस्यापि कम्पः सञ्चोऽभिधीयते ॥ ७३३ ॥
श्रेष्ठः पाटहिकः सञ्चादङ्गुष्ठमणिबन्धयोः ।
स्कन्धकूर्परसञ्चात्तु नीचः पटहवादकः ॥ ७३४ ॥
वरो हौडुक्किकोऽङ्गुष्ठकूर्परस्कन्धसञ्चतः ।
सञ्चाभ्यां मणिबन्धोत्थकूर्पराभ्यां तु मध्यमः ॥ ७३५ ॥
असौ वामाङ्घ्रिसञ्चेन वादनादधमो भवेत् ।
[16]ञ्च(ञ्चे)ङ्कारोऽत्र हुडुक्कायां प्रधानः[17] परिकीर्तितः[18] ॥ ७३६ ॥

---

१. A. ग्रांगु । २. A. त्त । ३. A. हिक्क । ४. A. होटुक्किकः D. होडुकिकः । ५. A. क्को । ६. D. भिंधा । ७. A. न्य । ८. A. सलगतं । ९. A. रौः । १०. D. स च । ११. A. तद्विघातविचक्षणौ । १२. A. drops this श्लोक । १३. A. टहुक्क । १४. A. ल्य । १५. A. का । १६. D. ह । १७. A. ञ्च । १८. D. नं । १९. D. तं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पादा(टा)क्षराणि सर्वाणि पटहे यानि तानि तु ।
सव्यास्य[1]मुद्दलीनध्दं[2] वामास्यं रज्जुयन्त्रितम् ॥ ७३७ ॥

हुडुक्का[3]या यदा चैवं तदा तद्ध[4]ट(ड)सं भवेत् ।
मध्यमाङ्गुलि[5]सन्धावङ्गुष्ठायां च(न्धौ चाङ्गुष्ठं च वि)नियोज्य च ॥ ७३८ ॥

एवं दक्षिणहस्तेन [6]मञ्चनो(दना)क्तेन घर्षयेत् ।
वामाङ्गुष्ठेन सम्पीड्य चाङ्गुलीभिस्तु वादयेत् ॥ ७३९ ॥

गोवा[7](ङ्का)रस्तत्र[8] मुख्यः स्याद् घर्षणादुपपादितः ।
द्वादशाङ्गुलदीर्घा स्यात्किञ्चिन्मध्य(ध्ये) कृशा भवेत् ॥ ७४० ॥

अश्ववालान्विते वक्त्रे हुडुका(क्का) चे[9]त्परावधिः ।
[10]कुडु(डु)पेन वादनीया हस्तेनापि विव(च)क्षणैः ॥ ७४१ ॥

[11]रुक्का(ढेङ्का)रस्त[12]त्र मुख्या[13](ख्यः) स्या[14]द्धस्तपातेन जायते ।
घटश्चैव तटश्चैव डगिश्च[15] कुडुपोद्भवाः ॥ ७४२ ॥

[16]पाटवर्णा इमे सर्वे ढक्कायां परिकीर्तिताः ।
षोडशाङ्गुलदीर्घा स्यान्मुखे चाष्टाङ्गुलान्तरा ॥ ७४३ ॥

मध्यप्रदेशे[17] कर्तव्या षोडशाङ्गुलवेष्टना ।
शेषं लक्ष्म[18] हुडुक्काव[19]त्का[20]ला(कण्ठा)र्गलविवर्जितम् ॥ ७४४ ॥

पाटाक्षरं हुडुक्कावन्म[21]ण्डीढक्कासु कल्पितम् ।
मण्डलीमध्यरज्जुं च वामहस्तेन पीडयेत् ॥ ७४५ ॥

[22]सव्यहस्तगतं वक्त्रं सव्यहस्तेन वादयेत् ।
शक्तिदैवतपूजायां चर्या[23]गानविधौ तथा ॥ ७४६ ॥

वादनीया प्रयत्नेन मण्डीढक्काविचक्षणैः ।
विंशत्यङ्गुलदीर्घा स्यात्सप्ताङ्गुलमिता मुखे ॥ ७४७ ॥

---

१. D. स । २. D. द्ध । ३. A. का । ४. A. तद्वर । ५. D. सन्ध्यायावंङ्गुष्ठाय । ६. D. मवनाकेन । ७. D. चा । ८. D. ट । ९. A. च परंवधि । १०. A. हुहुडुकानो । ११. A. ऋ । १२. D. त्रय । १३. D. रव्यो । १४. D. स्याधस्तपादेन जायते । १५. A. श्वडुपोद्भवाः । १६. D. प । १७. D. श । १८. A. क्ष्मा । १९. D. चे । २०. A. त्कठर्गला । २१. D. मडी । २२. D. सर्व । २३ D. मा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुष्टिप्रविष्टमध्या सा त्रिवली [1]लोहमण्डली ।
कवलानद्धवदना सप्तरन्ध्रैः सुयन्त्रिता ॥ ७४८ ॥
मध्ये च वेष्टिता रज्वा सूत्रनिर्मितया दृढ(ढा)म् ।
कक्षा(क्षां) स्कन्धे [2]निधायैषा सव्यदक्षिणपाणिना ॥ ७४९ ॥
[3]दंददोंद(दा)क्षरैः पादैः वा(टैर्वा) दनीया विचक्षणैः ।
मधुपानप्रमत्तानां योषितां लास्यनर्तने ॥ ७५० ॥
वादनीया विशेषेण [4]रुलोदो(दों)ध्वनिसंयुता ।
अष्टादशाङ्गुला दैघ्र्या (दैर्घ्ये) [5]रज्वा (रुज्जा) दृढतरा समा ॥ ७५१ ॥
एकादशाङ्गुले[6] वक्त्रे कवलानद्धकुण्डले ।
वामतुन्दे प्रकर्तव्यं तद[7]न्ते कुण्डलीद्वयं ॥ ७५२ ॥
तन्त्रीभिर्धारितं सम्य[8]क्करु(युं)कारार्थं तु वादकैः ।
रुंकारो (र) मुख्य(मुख्या) रुंकारो [9]बहुलो वादने भवेत् ॥ ७५३ ॥
रुंकाररंजि(रञ्जि)ता यस्मा[10]त्तस्मा[11]त् गुंजा(द्रुञ्जा) प्रकीर्तिता ।
षड्विंशत्यंगु(त्यङ्गु)लायामा त्रिंशदङ्गुलवेष्टना[12] ॥ ७५४ ॥
समाङ्गा सेल्लुका प्रोक्ता वीजदा[13]रुविनिर्मिता ।
तर्जनीमात्रके कुर्याद्वल्लीमण्डल[14]के दृढे ॥ ७५५ ॥
उद्दलीचर्मणा नद्धे द्वादशाङ्गुलविस्त[15](स्तृ)ते ।
षड्रन्ध्रे रज्जुभिर्बद्धे वामत[16]न्त्रीसुगर्भितम् ॥ ७५६ ॥
वामास्यं वामहस्तेन स[17]व्यं कोणेन वादयेत् ।
[18]धि(धिं)कारो दक्षिणे तुण्डे झिं(झें)कारो वामवक्त्रके ॥ ७५७ ॥
देवतानर्तने [19]यस्या वादनं परिकीर्तितम् ।
एकविंशाङ्गुलायामा सप्ताङ्गुलमिता मुखे ॥ ७५८ ॥

---

१. A. जो । २. D. वि. । ३. D. तदहोदा । ४. D. उरुलो । ५. A. डुंजा दड । ६. D. लादैर्घ्ये वक्त्रे संनद्धकुंडले । ७. A. दंतः । ८. A. घ । ९. A. करु । १० A. जंकारो बहुलो भवेत् । ११. A. यस्मो । १२. A. स्मा जा । १३. A. नी । १४. D. दोर । १५. D. लिके । १६. D. श्रु । १७. D. तंत्रि । १८. D. संध्य । १९. A. किंधारो दक्षिणे रुंझिकारो नामसु तुवक्त्रके । २०. D. यत्स्यात् वादनं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बीजदारुमयी कार्या समाङ्गी[1] मुखमध्ययोः ।
[2]संहतव्यङ्गुलां पीने वलये वल्लिनिर्मिते ॥ ७५९ ॥

नवाङ्गुलान्तरे वृत्ते सप्तरन्ध्रसमन्विते ।
कवलेन[3] पिनद्धास्ये स्थूलतंत्री (तन्त्री)सुयंत्रि(यन्त्रि)ते ॥ ७६० ॥

[4]मच(द)नालिप्तकोणाभ्यां [5]कटुवां (कुडुवां) वादयेत्सुधीः ।
केङ्कारस्त्वत्र [6]मुख्यः स्याद्देवतास्तोत्रहेतवे ॥ ७६१ ॥

अन्ये पाटाः[7] प्रयोक्तव्याः पटहे ये प्र[8]कीर्तिताः ।
विस्तस्तिमात्रः[9] कर्तव्यः सोऽष्टाङ्गुलमुखद्वयः[10] ॥ ७६२ ॥

त्रिवलीवन्मनाक् क्षा[11]मो मध्ये डमरुको भवेत् ।
मुखयो[12]श्चर्मणा नद्धो[13] मण्डली[14]द्वयमण्डितः[15] ॥ ७६३ ॥

बद्धः[16] सूत्रगणैर्गाढं[17] मध्ये चैव निपीडितम् (तः) ।
अष्टाङ्गुलायतावन्यौ कार्यौ वचन(मदन)गोलकौ ॥ ७६४ ॥

मध्ये वि[18]धार्य हस्ताभ्यां वाद्यो डवडवाक्षरैः ।
चत्वारिंशाङ्गुलावेष्टा सैकविंशाङ्गुलायता ॥ ७६५ ॥

द्वादशाङ्गुलवक्त्रा च बीजवृक्षोद्भवा समा ।
[19]वलये [20]कवलः कर्तव्यः (कार्यो)लोहजे सूत्रवेष्टिते ॥ ७६६ ॥

तयोर्वेष्टनमुद्दिष्टं त्रिचत्वारिंशदङ्गुलम् ।
कर[21]टास्ये विधातव्या तिस्र[22]स्तंत्र्यः (स्तन्त्र्यः)समावृता(:)॥ ७६७॥

वलये कवलच्छन्ने मुखयोरुभयो [23]र्न्यसेत् ।
रन्ध्राणि तत्र कुर्वीत समभागे[24] चतुर्दश ॥ ७६८ ॥

विज्जि(ग्नि)के तत्र संयोज्ये रन्ध्रेष्वेकान्तरेषु च ।
संमुखे तेन[25] बध्नीयात्[26] मध्ये मत्स्याकृति[27]र्भवेत् ॥ ७६९ ॥

---

१. D. मांगिमुख । २. D. संहतं त्र्यंगुला । ३. A. नापिनध्देन । ४. A. मंच । ५. A. कटुकां । ६. A. ख्यादेवतास्तोभहेतवे । ७. D. दाः । ८. D. त्र । ९. D. त्रका । १०. A. या । ११. A. क्ष्या । १२. A. यो च । १३. D. द्धं । १४. D. लि । १५. D. तं । १६. A. द्ध । १७. A. टं । १८. A. विवाधार्य । १९. A. व । २०. A. तव कर्तव्यो हजे सूत्रवेष्टिते । २१. D. व्यास्य । २२. D. स्तव्यंश । २३. D. न्य । २४. A. गैश्चतुर्दिशं । २५. A. नि । २६. A. न् । २७. A. र्यथा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कच्छया वेष्टयेत्प्रान्तं शेषं [1]स्कन्धि(न्धे) कटौ न्यसेत् ।
करटा सा[2] विनिर्दिष्टा वक्त्रद्वयनिवादिभिः ॥ ७७० ॥

ककारश्च [3]टकारश्च रिकारो रेफमस्तकः ।
उत्सवे च विवाहे च यात्रायां नृपमन्दिरे ॥ ७७१ ॥

इत्यादि सर्वकार्येषु करटा विनियुज्यते ।
दन्तजा शृङ्गजा वापि लोह[5]वक्त्रद्वयान्विता ॥ ७७२ ॥

पञ्चाङ्गुलायता श्लक्ष्णा मुखे च चतुर[6]ङ्गुला ।
मेषा(षो)द[7]लिकया नद्धा पञ्चर[8]न्ध्रसुयन्त्रिता ॥ ७७३ ॥

मध्ये[9] सूत्रेण संवेष्ट्य नातिगूढं न च श्लथम् ।
अनामिकां [10]मध्यसूत्रे निधाय वदने पुनः ॥ ७७४ ॥

तर्जनीमध्यमाङ्गुल्यो[11](ल्यौ) वि[12]वृते च क्रियागते ।
अङ्गुष्ठमन्यचक्रे तु कृत्वै[13]काञ्चनिकां ततः ॥ ७७५ ॥

वादयेच्च[14]ञ्चुनादेन[15] डक्कली[16]यं प्रकीर्तिता ।
सुपक्वं च घनं श्लक्ष्ण[17]मल्पवक्त्रं मनोहरम् ॥ ७७६ ॥

चर्मणा नद्धवदनं पाणिभ्यां वादयेद्[18]घटम् ।
वितस्तिद्वयदैर्ध्या सा[19] (र्घ्योऽसौ) द्वादशाङ्गुलव[20]क्त्रका (कः)
॥ ७७७ ॥

[21]षट्त्रिंशत्परीणाहो वल्ली[22]वल्लयवेष्टितः[23] ।
कवलानद्धवदनः सप्तरन्ध्रनियन्त्रितः[24] ॥ ७७८ ॥

सूत्ररज्ज्वा दृढं[25] बद्धो दक्षिणे[26] [27]कुटुपाहतः ।
वामे वामकराघात[28](:) स्कन्धकक्षासमन्वितः ॥ ७७९ ॥

---

१. D. स्कंधिकयै । २. D. स्याद्वि । ३. A. टि । ४. A. च । ५. A. रां । ६. D. द । ७. A. यंत्र । ८. A. ध्ये । ९. A. का । १०. A. ल्यै । ११. A. वि– संते च क्रियापदे । १२. A. त्वे । १३. A. चंचु । १४. A. देनदेन । १५. A. टकुली । १६. D. क्ष्णंअ । १७. D. त् । १८. A. स्फो । १९. A. चक्रकः । २०. A. षड्विंशति । २१. A. वल्लंवलयवेल्लि । २२. D. ता । २३. D. ता । २४. D. ढ । २५. D. णः । २६. A. कटु । २७. D. तं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

डकारबहुलो वाद्ये डमरः[1] परिकीर्तितः ।
अस्मादप्यधिका[2] ढक्का टेंका[3] (ढेङ्का)रबहुला यतः[4] ॥ ७८० ॥

ततोऽधिका भवेद्[5] भेरी भूरिगम्भीरनिःस्वना ।
सूतभूजात(चूतद्रुजाति)सञ्जातो महाकायो महारवः॥७८१॥

कांस्यभाजन[6]गर्भोऽसौ वल[7]याभ्यां विवर्जितः ।
चर्मणा नद्धवदनो वध्रैर्बद्ध (द्धः) समन्ततः ॥ ७८२ ॥

सारङ्ग[8]शृङ्गदण्डेन [9]वाद्यते दुन्दुभिर्दृढ[10]म् ।
मेघध्वनिसमो नादे जयमङ्गलकादि[11]षु ॥ ७८३ ॥

उत्सवे देवतागारे वादनीयो महाबलः[12] ।
एकवक्त्रं[13] ताम्रकृतं अ(म्र)धोहस्वं मुखे वृहत् ॥ ७८४ ॥

खरचर्मनिबद्धास्यं वध्रीवध्दं समन्ततः ।
[14]निःसाण इति विख्यातं[15] महानादं भयङ्करम् ॥ ७८५ ॥

चर्मणा कृतदण्डेन वाद्यते परि[16]भीषणम् ।
एवंविधा च [17]या लघ्वी [18]टम्मकी (तम्बकी) सा प्रकीर्तिता
॥ ७८६ ॥

एवमानद्धवाद्यानां क्रियाभेदो निरूपितः[19] ।
अङ्गुष्ठपार्श्वमाक्रम्य तर्जनीमूलमादरात् ॥ ७८७ ॥

प्रसारिता समा सर्वा किञ्चिद्वि[20]लिता[21] द्रुता[22] ।
करशाखा लगन्त्यन्तर्वर्जयित्वा तलं यदा ॥ ७८८ ॥

[23]तदा कर्तरिसंज्ञोऽसौ[24] हस्तपाटो[25] विधीयते ।
हस्तद्वयेन सञ्जातः[26] समकर्तरिसंज्ञकः ॥ ७८९ ॥

---

१. A. सः । २. A. कां । ३. D. टेका । ४. A. त । ५. D. त् । ६. A. नर्भो । ७. A. लभ्यां । ८. D. मृग । ९. A. व । १०. A. ढी । ११. D. रि । १२. D. ले । १३. A. क्त्रांताम्रसं अधो । १४. A. निसार । १५. A. नं । १६. A. र । १७. D. मा । १८. A. टंबकी । १९. A. तम् । २०. A. रु । २१. A. त । २२. D. ता । २३. D. कर्तरी नाम संज्ञो सौ । २४. A. सो । २५. D. दौ । २६. D. त ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्यत्ययेन भवेदस्य संज्ञा विषमकर्तरिः[1] ।
[2]अङ्गुल्यः संहताः सर्वाः सांगु(साङ्गु)ष्ठाश्च प्रसारिताः(ः) ॥ ७९० ॥

यदा लगन्ति वेगेन तदासौ समपाणिकः ।
अङ्गुल्यः संहताग्राश्चेदङ्गुष्ठ[3]श्च प्रसारिताः (तः) ॥ ७९१ ॥

पृथग्लग[4]न्ति करयोः स स्यादुभय (विषम)पाणिकः ।
अङ्गुल्यो विरलाः सर्वाः साङ्गुष्ठा[5]स्ताडयन्ति [6]चेत् ॥ ७९२ ॥

पाणिहस्त इति ख्यातो हस्तपाटो मनीषिभिः ।
तलघातस्तथाङ्गुष्ठः[7] करशाखाक्रमेण [8]चेत् ॥ ७९३ ॥

लगन्ति सममानेन तदा [9]पाटः स सङ्ग्र(मग्र)हः ।
[10]एकैकपाणि[11]रित्थंचेत्पर्यायेण लगेत्पुटे[12] ॥ ७९४ ॥

तदावघटनामासौ करपाटः प्रकीर्तितः ।
अभिवादप्रकारौ[13] तु यदैकस्मिन्पुटे करौ[14] ॥ ७९५ ॥

लगतः स तु विख्यातो[15] [16]वशिको (स्वस्तिको) नामतो बुधैः ।
वामो दक्षिणवक्त्रे चेद्दक्षिणा (णो) वाममण्डले ॥ ७९६ ॥

[17]यदा तूर्यस्य गतिना गाढ(नाग)बन्ध(न्धः) प्रकीर्तितः ।
मध्यमाक्रम्य तर्जन्या हन्यते पटहादिकम् ॥ ७९७ ॥

[18]अङ्गुष्ठतलवक्त्रादिकरशाखाभिताडनम् ।
द्रुतमानेन पर्यायाद्विविधैः[19] पातनक्रमैः ॥ ७९८ ॥

वाद्यते तु यदा तज्ज्ञै[20]र्षटि(स्ताट)वादः प्रकीर्तितः ।
[21]दे(दें)कार(रः) पटहस्यादौ हुडुक्कायां [22]तु झेकृ(झेंकृ)तिः ॥
॥ ७९९ ॥

---

१. D. री । २. A. drops this stanga ३. A. ष्टश्च D. ष्टस्य । ४. A. ग्लांतिक करयोः । ५. A. ष्टा । ६. A. वै । ७. A. ष्टः D. ष्टक । ८. D. च । ९. A. पदः । १०. A. एकक D. एकैकः । ११. D. रंघ्रे । १२. D. टैः । १३. D. रे । १४. D. रे । १५. A. तः । १६. A. ससिको । १७. D. यदा कुर्यादस्य गत्या मागधः परिकीर्तितः । १८. A. अगुष्ट । १९. A. धै D. धौ । २०. A. धोंटनादः । २१. A. देकापटह । २२. A. तुलेंकृति D. रुझेत्कृतिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]ढक्कायां चैव [2]क्रेंकारः [3]थोंकारो मर्दले तथा।
[4]दोंकारस्त्रिवलीवाद्ये करटायां च दें[5] (टें)कृतिः ॥ ८०० ॥

प्रथमं [6]वाद्यते यत्र स्मृता वोल्लावणी तु सा।
[7]चार्यतेऽनन्तरं [8]यत्तु [9]पाटैः कर्तरि[10]कादिभिः ॥ ८०१ ॥

चातुः (रु) श्रवणिका नाम[11] सां(सा)प्रोक्ता वाद्यवेदिभिः।
[12]कर्तरीसमपाणिभ्यां वाद्यते च घडने (ऽवघटेन) च ॥ ८०२ ॥

परिश्रव(णि)का नाम प्रोक्ता वाद्यविचारकैः (शारदैः)।
खुक्कारबहुलं वाद्यं नादो यत्र न मुच्यते ॥ ८०३ ॥

कुचुंब[13] (चुम्बि)णीति नाम स्या[14]दुदल्या पिहिते मुखे।
केवलैर्हस्तपाटै[15]स्तु विविधैर्यत्र वाद्यते ॥ ८०४ ॥

[16]करचा(वा)रणका सा स्यात् कोणे(णैः) कुडुपवा[17]रणा।
हस्तद्वयेन यत्रैकः पाटो निष्पत्ति[18]माप्नुयात् ॥ ८०५ ॥

[19]ऋजुपातो दक्षिणे [20]चेद्दण्डहस्तः स कीर्ति[21]तः।
विहाय कुण्डलीस्पर्शं[22] वाद्यते [23]कुडुपेन तु ॥ ८०६ ॥

अलगो(ग्रो) नाम विख्यातः पाठ(टः)कोणो(णा)[24]भिताडने।
दक्षिणे[25] लुलितो घातः कुडु[26]पेन विधीयते ॥ ८०७ ॥

वामेन तलघात[27]श्चेदुदरं(दुडवो)नाम तद्भ(सो भ)वेत्।
उभाभ्यामथ चैकेन विविधैः पा[28]टकल्पनैः[29] ॥ ८०८ ॥

निरन्तरलसन्नादो भवेद्दा[30]न(द्धन)रवाभिधः।
वाद्यप्रका[31]राः पाटाश्च वादकानां गुणागुणाः[32] ॥ ८०९ ॥

---

१. A. ट। २ A. रुं। ३. A. थुं। ४. दो। ५. A. द्रे। ६. D. वा। ७. A. रे। ८. A. तु। ९. A. र्क। १०. ममोप्रोक्ता D. मप्रोक्तावाद्य- विचारकैः। ११. D. drops this stanza। १२. A. व। १३. A. दंगुल्या। १४. A. टैः स्तु। १५. A. करसंचारणा त्स्यात्। १६. A. चारण। १७. A. ति। १८. A. सजु। १९. A. चैव। २०. A D. र्त्ति। २१. A. र्शं। २२. D. पटहेन। २३. D. ना। २४. A. णो। २५. A. ड D. ट। २६. A. तःश्चेदुदरं D. तांश्च दुर्दुरं। २७. D. प। २८. A. ने। २९. A. द्दानरं D. दान। ३०. D. क। ३१. A. णा।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कथिताः साम्प्रतं वक्ष्ये प्रबन्धान् वाद्यसङ्गतान् ।
कालछन्दः(च्छन्द) प्रब[1]न्धो(न्धे)यो विरामो वानिरन्तरः
॥ ८१० ॥

[2]यतिर्निगद्यते सा नु (तु) प्रबन्धे वाद्यकर्तृभिः ।
तालपा[3]तसमानैर्या पाटवर्णैः प्रकल्पिता[4] ॥ ८११ ॥

उत्ता[5]ना नाम सा ख्याता कैश्चित्केदार उच्यते ।
उद्ग्रा[6]हद्वितयं यत्र वारमेकं तथा ध्रुवः ॥ ८१२ ॥

पुनर्ग्राहेण मोक्षश्चेदवच्छेदः स कीर्तितः ।
द्विवारमेकवारं वा[7] यत्रोद्ग्राहो विधीयते ॥ ८१३ ॥

ध्रुवो (व) नामा[8]भिधो यत्र मलय(प)न्तं प्रचक्षते ।
[9]मलयं (पं) वादयित्वा तु तदङ्गम्प्रतीतस्त(प्रततिस्त)था ॥८१४॥

पुनर्मलय(प)वादेन मलया(पा)ङ्गमुदीरितम् ।
विषमै[10](:)पाटवर्गैश्च मलयः[11](पः) क्रियते यदि ॥ ८१५ ॥

प्रोक्तो[12] मलपपाटो[13]ऽसौ वा[14]द्यविद्याविचक्षणः(णैः) ।
प्रस्तुतस्यानुसारेण गीतवाद्यस्य सन्धितः ॥ ८१६ ॥

माने[15]न वाद्यते यत्तु[16](स्तु)स भवेदन्तराभिधः ।
उपर्युपरि पाटैस्तु[17] क्रियते यच्च लाघ[18]वम् ॥ ८१७ ॥

[19]खोज्जो नाम स च ज्ञेयो निबडः(बिडः) पाठ(ट) वर्णकैः ।
खण्डपाटै[20]ः(टः) प्रकर्तव्यो यतिभिश्चात्र खण्डकैः ॥ ८१८ ॥

एवं निरन्तरं वाद्यं तत्ख[21]ण्डयति कथ्यते ।
वादयित्वा यतिं[22] पूर्वं पाटेनान्ते विमुच्यते ॥ ८१९ ॥

वाद्यप्रबन्धमध्ये तत्पदमित्युच्यते बुधैः ।
प्राञ्जलैः पाट[23]वर्णैश्च निबिडै[24]र्वाद्यते यतिः ॥ ८२० ॥

---

१. D. बंधा । २. D. येते । ३. A. ला । ४. A. ताः । ५. A. ताना D. उत्ताना मानु । ६. A. द्वा D. द्धा । ७. D. च । ८. A. नाविधो । ९. D. drops this stanza । १०. D. मे । ११. D. यं । १२. A. क्ता D. क्ते । १३. A. टौ । १४. A. वाद्यविचक्षणः । १५. A. नो । १६. A. तु । १७. D. दै । १८. A. प । १९. D. खोजातो मनसिवित् ज्ञेयो मिबिडवर्णकैः । २०. A. ड्रैः । २१. A. त्सं । २२. A. तिः । २३. A. द । २४. A. डे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अङ्गुपाटः स विज्ञेयो [1]वाद(द्य)विद्याविशारदैः ।
तालपातप्रमाणेन यतिश्चेत्खण्डिता[2] भवेत् ॥ ८२१ ॥

स खण्डक इति ख्यातः प्रबन्धः पूर्वसूरिभिः ।
[3]छित्त्वा छित्त्वा तु यद्वाद्यं विकृतं यत्र वाद्यते ॥ ८२२ ॥

वृत्तै[4](द्रुतै)र्हस्ततलाघातैः स च्छेद इति कीर्तितः ।
यत्स्रोतोगतया [5]यत्या कृतं तत् खण्डहुल्लकम् ॥ ८२३ ॥

युक्तच्छेदेन [6]व्यक्तस्थे (श्चेत्) खण्डच्छेदो[7]ऽभिधीयते ।
[8]द्विरुद्ग्राहो ध्रुवाभोगो (गौ) ध्रुवश्चेदङ्गरूपकम् ॥ ८२४ ॥

गीतनृ(नृ)त्तसमं [9]कृतं समं [10]तत्किल कथ्यते ।
उद्ग्राहध्रुवकाभोगाः पुनरुद्ग्राह[11]को भवेत् ॥ ८२५ ॥

हुडुक्क इति वाद्येषु कथितः सोम [12]भूभुजा ।
एकवारं [13]गृ(ग्र)[14] कृत्वा द्विःकुर्यान्मधुकं(द्ध्रुवकं) यदि[15] ॥८२६॥

ध्रुवको नाम सः [16]ख्यातः प्रबन्धेषु मनीषिभिः ।
आतोद्यानि समस्तानि वाद्यन्ते च पृथ[17]क् पृथक् ॥ ८२७ ॥

खण्डे खण्डे यदा तज्ज्ञै(ः) पै[18]सारः स तु कथ्यते ।
एवं प्रबन्धा विविधा गीतनृत्तो[19]पयोगिनः[20] ॥ ८२८ ॥

मार्गदेश्यनुसारेण कथितः(ताः)सोम भू[21]भुजा ।
वदने त्र्यङ्गुलं कार्यं मध्यं निम्नं सुवर्तुलम् ॥ ८२९ ॥

तत्राङ्गुलमितं पिण्ड[22](ण्डं) विस्तारेणाङ्गुलद्वयम् ।
कांस्येन घटितं श्लक्ष्णं कर्तव्यं तालकद्वयम् ॥ ८३० ॥

एकरूपप्रमाणं च घनं[23] छिद्रेण संयुतम् ।
नाना पद्मं च (वस्त्राश्च)लाग्राणि तच्छिद्रे रज्जुवत् क्षिपेत् ॥ ८३१ ॥

---

१. A. वाद्याविशारदैः । २. A. तो । ३. D. drops one छित्त्वा । ४. A. तौ । ५. A. यत्पा । D. पत्या । ६. D. वक्तृस्थे । ७. A. द इतिकीर्तितः and the whole stanza repeated again । ८. A. यत्स्रोतोगतया यत्पाकृतं वश्चे देगरूपकं । ९. A कृ । १०. D. ता । ११. A. ह उच्यते । १२. A. भूजा । १३. A. गृहे । १४. A. दिः । १५. A. drops this । १६. A. थक्तृथक् । १७. A. यैः सरः । १८. D. त्यो । १९. न । २०. A. भूजा । २१. A. खण्ड । २२. A. न ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुहराभ्यन्तरे कुर्याद् ग्रन्थिबन्धमनोहरम् ।
आवेष्टय[1] तर्जनी (नीं) वामामङ्गुष्ठेन[2] प्रपीडयेत् ॥ ८३२ ॥

तिर्यङ्मुखो विधातव्यस्तालमध्ये विचक्षणैः ।
कनिष्ठा[3]नामिकामध्या[4]ः करशाखाः प्रसारयेत् ॥ ८३३ ॥

ताभिर्विधारयेन्नादं कल्पना सा प्रकीर्तिता ।
तलमध्ये [5]तलं कृत्वा लम्बितं दक्षिणे करे ॥ ८३४ ॥

विन्यस्योपरि तर्जन्या[6] अङ्गुष्ठाग्रेण पीडयेत् ।
तेन तालाग्रभागेन मध्ये [7]चालं (तालं) प्रपीडयेत् ॥ ८३५ ॥

वादयेद्विविधैर्मानैर्लघुद्रुतगुरुप्लुतैः ।
सावधानो[8] दृढमतिः[9] कल्पनापातकोविदः ॥ ८३६ ॥

तालमानप्रगल्भैश्च [10]श्रेष्ट(ष्ठ)स्तालधरः स्मृतः ।
न तालेन विना गीतं न वाद्यं तालवर्जितम् ॥ ८३७ ॥

न नृत्यं तालहीनं स्यादतस्तालोऽत्र कारणम् ।
गीतं वाद्यं तथा नृत्यं त्रितयं येन लभ्यते ॥ ८३८ ॥

तेन ताल इति ख्यातः सोमेश्वरमहीभुजा ।
चतुर[11]स्रा(स्रा)स्तथा श्रस्रा(त्र्यस्रा)मिश्राः खण्डा भवन्ति हि ॥८३९॥

एवं चतुर्वि(र्वि)धास्तालास्तेऽन[12]न्ताः परिकीर्तिताः ।
चत्वारो गुरवो यत्र गुरुद्वितयवर्धि[13]ताः ॥ ८४० ॥

हीना वा[14] गुरुयुग्मेन तालास्ते चतुरस्रकाः ।
गुरुत्रयं भवेद्यस्मिन् षड्भिः षड्भिर्विवर्धि[15]तम् ॥ ८४१ ॥

त्र(त्र्य)स्रः स तालो विज्ञेयः प्रस्तारेषु बहुष्वपि ।
चतुरस्रे[16] गुरुर्यत्र[17] त्र्यस्रे च गुरुयुग्मकम् ॥ ८४२ ॥

---

१. A. वि । २. A ष्टे । ३. A. ष्ठा । ४. A. ध्या । ५. A. त । ६. D. चात्र । ७. D. ना । ८. D. वेष्टधरधरः स्मृतः । ९. D. स्तालविषया । १०. A. नंतीः । ११. D. जिं । १२. D. श्च । १३. A. र्धितः । १४. A. स्रोर्गु । १५. A. र्यत्रस्रो च D. र्यत्रत्रसे च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रवेश्यते स बोद्धव्यस्तालो मिश्रसमाख्यया ।
त्र्य[1]स्रे वा चतुरस्रे वा भे[2]द्यते गुरुलक्षणम् ॥ ८४३ ॥

यत्र तालः स विज्ञेयः खण्डनामाङ्कितो बुधैः ।
[3]ऋजुर्भवेल्लघो[4]र्लेखा गुरुर्वक्रोभयाननः[5] ॥ ८४४ ॥

गुरु(रो)र्लेखा शिखायुक्ता प्लुतस्य परिलिख्यते ।
द्रुतस्य वर्तुला [6]लेखा [7]विन्दुःस्या[8]द्द्रुतकस्य च ॥ ८४५ ॥

प्रस्तारलेखानामानि वर्णितानि महीभृता ।
ह्रस्व[9]पञ्चाक्षरो[10] वर्गो[11] वेगादुच्चा[12]र्यते यदा ॥ ८४६ ॥

मात्राभिधः स कालः स्यात्स एव लघुरुच्यते ।
एकमात्रो लघुः प्रोक्तो द्विमात्रो गुरुरुच्यते ॥ ८४७ ॥

त्रिमात्रस्तु प्लुतो ज्ञेयो [13]द्रुतः स्य(स्या)दर्धमात्रिकः[14] ।
द्रुतार्धको भवेद्यस्तु बिन्दु(:)स्याद्[15] द्रुतकाभिधः ॥ ८४८ ॥

इति तालगतः[16] कालः सोमभूपेन भाषितः ।
एक एव ततस्तालो गीतवाद्यानुसारतः ॥ ८४९ ॥

कदाचिच्छीघ्रतां याति विलंबं[17](लम्बं) याति कर्हिचित् ।
[18]वार्तिकं दक्षिणं चित्रं तुर्यं[19] चित्रतरं तथा ॥ ८५० ॥

एवं [20]चतुर्विधं मानं तालपाते प्रकीर्तितम् ।
य[21]द्वर्तते निजं मानं वार्तिकं तत्प्रकीर्तितम् ॥ ८५१ ॥

वि(वि)लम्बितेन मानेन दक्षिणं परिकीर्तितम् ।
शीघ्रमानेन चित्रं स्याद[22]तिशीघ्रं तदेव चेत् ॥ ८५२ ॥

प्राहु[23]श्चित्रतरं मानमिति मानविनिर्णयः ।
अविरामो लघुर्योसावेकपातनियोजितः ॥ ८५३ ॥

---

१. A. त्र्यं । २. A. भज्यतेवासवै गुरुं । ३. A. रुर्जु । ४. D. घु । ५. A. ना । ६. A. रे । ७. A. विदुः । ८. D. स्यात्द्रु । ९. D. स्त्रायं । १०. D. रा । ११. D. गौ । १२. A. चा । १३. A. द्र । १४. A. काः । १५. D. त् । १६. D. प्रकारोयं । १७. A. लयं । १८. D. कर्तिकं । १९. A. र्य । २०. A. चु । २१. D. drcps this stanza । २२. D. त् वृतिः । २३. A हुत्रतरं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आदितालः स विज्ञेयस्तालानामुद्भवो [1]यतः ।
द्रुतकत्रितयं यत्र तत्रा[2]द्यः कल्पनायुतः ॥ ८५४ ॥

शोभितो यस्त्रिभिः पातैः सोऽपि स्यादादितालकः[3] ००ह १ ।
आदौ [4]द्रुतद्वयं यत्र[5] लघुरन्ते प्रयुज्यते ॥ ८५५ ॥

तालो[6] द्विती[7]यको नाम पातत्रयविराजितः[8] । ००ल २
प्रथमो [9]द्रुत एकः[10]स्याल्लघु[11]द्वयमतः परम् ॥ ८५६ ॥

ईदृशः प्रतितालः स्यात्पात[12]त्रयविराजितः[13] ।
भवेतां गुरुणी[14] पूर्वं लघुः[15]स्यात्तदनन्तरम् ॥ ८५७ ॥

समकङ्कालना[16]माऽयं पातत्रयविभूषितः[17] ॥ ५ ॥ ऽऽ । ४ ।
लघुरादौ गुरुः पश्चात्कङ्काले विषमाभिधे ॥ ८५८ ॥

पातत्रयं भवेद्यस्य [18]तूर्यत्रयविधिं प्रति[19] ॥ ६ ॥ ऽऽ । ० ॥ ऽ ।
[20]द्रुतद्वयं गुरुद्वन्द्वं खण्ड[21]कङ्कालसंज्ञिते ॥ ८५९ ॥

ताले पातचतुष्कं स्याद्[22] गीतवाद्य[23]क्रियादिषु[24] ॥ ०० ऽऽ ० ।
आदौ [25]द्रुतचतुष्कं स्याद्[26] गुरुरन्ते ततो लघुः[27] ॥ ८६० ॥

[28]पातषट्कं भवेत्ताले [29]पूर्णकङ्काल[30]संज्ञिते । ००० ऽ ॥ ।
[31]द्रुतत्रयं लघुश्चैकस्ताले गारुगि[32]संज्ञिते ॥ ८६१ ॥

पाताश्चत्वार एते[33]स्युर्निर्णीताः सोमभूभुजा ॥ ९ ॥ ००० ॥
चत्वारो लघवः पूर्वं धृतनादास्ततो गुरुः ॥ ८६२ ॥

लघु[34]नी बद्ध(मण्ठ)तालेऽस्मिन् सप्तपाताः सुशोभनाः[35] ॥१०॥ऽ॥
लघुद्वयं गुरुश्चैकस्तालेऽस्मिन् पाशमन्द्रके[36] ॥ ८६३ ॥

---

१. A. यत् । २. D. द्य । ३. A. कः ह२ । ४. A. वृत्त । ५. A. त्रघुरं । ६. D. ल । ७. D. त । ८. A. तः ल२ । ९. A. द । १०. A. क । ११. A. यु । १२. D. त्र । १३. A. तः छ३ D. तः ॥ ४ । ० । ३ ।१ ४. D. णा । १५. A. घु । १६. A. मायानं । १७. A. तं ॥ ऽऽ ॥ ४ ॥ । १८. A. तु । १९. A. ॥ ऽऽ छ ऽ ॥ । २०. A. दतद्वय । २१. A. काकास । २२. D. त् । २३. A. यं । २४. A. ॥ ०० ऽऽ छ ॥ । २५. A. द्व । २६. D. त् । २७. A. घु । २८. A. णनतषङ्कं २९. D. र्वं । ३०. A. संज्ञि ५३ ॥ ०००० ऽ ॥ । ३१. A. द्द । ३२. D. गिससंज्ञिते A. गिसंजिते । ३३. A. ता । ३४. A. घूनि च द्वितस्त । ३५. A. omits this । ३६. D. मर्द्दके ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पातत्रयं भवे[1]द्द्रुयो गीतवाद्यानुसारतः ॥ ११ ॥ ऽ[2] ।
द्रुतकद्वितयं पूर्वं तत्रा[3]द्यः कल्पितो[4] भवेत् ॥ ८६४ ॥

त[5]तः परं लघुद्वन्द्वं तालोऽयं यतिसंज्ञकः । ॥ ०० ।
द्रुतद्वयं भवेदादौ लघु[6]नीं(नी) तदनन्तरम् ॥ ८६५ ॥

स ताल(:) [7]कुद्रको नाम चतुःपा(ष्पा)तः[8] प्रवर्तते[9] ॥ ५८ ॥ ०० ॥ ।
लघुरेको भवेदादौ[10] द्रुतद्वयमतः परम् ॥ ८६६ ॥

तालस्तृती[11]यको नाम त्रिभिः[12] पातैर्विराजितः[13] ॥ १४ ॥ ०० ॥ ।
द्रुत एको लघुश्चैकः[14] पातद्वयसम[15]न्वितः ॥ ८६७ ॥

नि(:)सा[16]रुर्नाम तालोऽयं विलम्बेनाऽपि भण्यते[17] ६० ० ।
द्रुतत्रयं भवेत्त[18]स्य यस्यान्त्यः सविरामकः ॥ ८६८ ॥

तालोऽयमन्तरक्रीडः[19] पातत्रयविभूषितः[20] १६ ॥ ००० ।
[21]द्रुतमेकं नव(भवे)दादौ ततोऽपि द्रुतकद्वयम् ॥ ८६९ ॥

सपा(म)तालः स विज्ञेयः पातत्रयसमन्वित(:) ६२ । ००० ॥
एक एव द्रुतो यस्मिन् पूज्यमानो निरन्तरः[22] ॥ ८७० ॥

एकतालः स विख्यातः पातेनैकेन भूषितः[23] ६३ । ० ।
द्रुतकद्वितयं यस्मि[24]न्नन्त्यश्च विधृतध्वनिः[25] ॥ ८७१ ॥

एकतालीति विख्यातस्ताल(:)पातलयान्वितः[26] १८ । ०० ।
द्रुता[27] द्वादश यत्र स्युस्तूर्य(स्तुर्यः) [28]सूर्यो(स्तुर्यो) विरामवान्
॥ ८७२ ॥

प्लुतो गुरु[29]र्द्रुतद्वन्द्वं गुरुरेको लघुद्वयम् ।
गुरुरन्ते भवेद्यस्य पातविंशतिसंयुतः[30] ॥ ८७३ ॥

---

१. D. वेत्भू । २.A. omits this । ३. D. त्रधा । ४. D. ता । ५. D. तत्तद्वयं लयं-द्वंद्वं तोलोयं मतिमद्वकं ॥ १२ । ०० ॥ ६. D. घूनि । ७. D. द्रुतको । ८. D. ते ॥ ९. D. ते ॥ १३ । ००। १०. A. द्यो । ११. A. तीयको । D. तीयकं । १२. D. भिः । १३. A. तै ५९ ॥ ०० ॥ १४. D. को । १५. A. मा । १६. D. शा । १७. D. ॥ १५ ॥ १८. A. त्तस्यान्त्यः सविरामकः । १९. D. डा । २०. A. ६१००॥ छ । २१. D. drops this stanza । २७, D. रम् । २३. D. ॥ १७॥ ० । २४. D. स्मिन् अंतश्च । २५. D. नि । २६, A. त । २७, A. त । २८. A. स्तुर्ये । २९. A. रुर्द्द D. रुद्रु । ३०, D. तं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]तुर्यतालोऽयमाख्यातस्तालवर्णनकोविदैः[2] ॥२०॥ ०००००००००० ॥
ऽ ०० ऽ ॥ ऽ ।
चत्वारो लघवः पूर्वं गुरुद्वयमतः परम् ॥ ८७४ ॥
द्रुतमे[3]कं सप्तपातो वर्णतालो परैः[4] स्मृतः[5] २१ ॥ ऽऽ० ।
आदौ लघु(:)द्रुतद्व[6]न्द्वं लघुरेको गुरुद्वयम् ॥ ८७५ ॥
द्वौ द्रुतावष्टपातोऽयं व[7]र्णतालाभि[8]धोऽपरः[9] । ४ । ०० ॥ ऽऽ ०० ॥ छ
दश द्रुता भवन्त्यस्मिन् ल(स्मिंल्ल)घुरन्ते प्रयुज्यते ॥ ८७६ ॥
प्रथमश्च चतुर्थ[10]श्च सप्तमश्च सकल्पना (नः) ।
रुद्रसङ्ख्यान्वितैः[11] पातैस्ताल[12]इछन्दं सु(न्दश्च)चचरि (चरी) ॥८७७॥
वसन्तस्योत्सवे तज्ज्ञै[13]र्गातव्या [14]सा हि च[15]त्वरि[16](चरी) ॥ २४ ॥
०००००ऽ ।
प्रथमं लघुनी[17] यत्र तयोर्मध्ये[18] गुरुं[19] न्यसेत् ॥ ८७८ ॥
उमात्रि(उन्मातृ)कश्चतुष्पातः[20] सोऽन्तेप्लुत समन्वितः[21] ऽऽछ ।
[22]लघुरेको गुरुश्चैको लघुयुग्मं[23] [24]द्रुतत्रयम् ॥ ८७९ ॥
प्लु[25]तान्तः सप्तपाता[26]श्च जयतालः स कीर्तितः[27] ॥ २६ ॥ ऽ ॥ ०० ।
गुरुरेकः प्लुतश्चैकस्ततो [28]गुरुलघुप्लुताः ॥ ८८० ॥
पञ्चपातः[29] समाख्यातो राजतालो मनीषिभिः[30] ॥ ७३ ॥ ऽ ऽ' ऽ । ऽ' ॥
आदौ गुरु[31]र्लघुः पश्चात् प्लुतत्रयमतः परम् ॥ ८८१ ॥
गुरुरन्यः[32] प्लुतश्चान्यो द्रुतत्रयमनन्तरम् ।
दशसङ्ख्या समोपेते (त) पातमालाविराजितः[33] ॥ ८८२ ॥
[34]लयतालः समाख्यातो रिपूणां लयकारणः[35] ॥ ७५ ॥ ऽ ।
ऽ'ऽ'ऽ'ऽऽ' ००० ॥
गुरुत्रयं लघुः पश्चा[36]त् प्लुत एको गुरुद्रुतौ ॥ ८८३ ॥

---

१. A. तूर्णं । २. A. ०००० ००० ००० ।' ऽऽ०० ॥ छ । ३. D. के । ४. A. रै । ५. A. त ॥ ऽऽ० छ ॥ ६. A. द्वद्वं । ७. A. र्णः क । ८. A. धिधो D. भिदो । ९. D. रः ॥२२॥ ०० ॥ ऽऽ ०० । १०. A. र्थं । ११. A. तै । १२. D. लंछंदं सुचत्वरि । १३. A. ज्ञा । १४. D. स । १५ A. व । १६. A. री ००० ००० ००० । १७. D. ना । १८. D. ध्य । १९. D. रुन्र्य । २० A. नः । २१. D. ॥ २५ ॥ ऽ । । २२. A. ज । २३. A. ग्मे । २४. A. द्व । २५. D. तातः । २६. D. ताश्च । २७. A. तः ७२ ॥ ऽ ॥ ०० ऽ' । २८. D. लघुगुरुप्लुताः । २९. D. त । ३०. D. भिः ॥ २७ ॥ ऽ । ३१. D. ल । ३२. D. न्य । ३३. D. ता । ३४. D. यत । ३५. D. णः । ३६. ऽ'ऽ'ऽऽ' ००० ॥ । ३७. A. श्च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पार्वतीलोचनो[1] नाम पातैर्नवभिरायतः[2]। ऽऽऽ। ऽ'ऽऽ००। छ।
चत्वारो[3] ला(ल)घवो यस्मिनं(न्न)न्त्यश्च ध(धृ)तनादकः॥८८४॥

गजलीलेति तालोऽयं चतुःपातैः प्रयुज्यते। ०॥।
चत्वारो द्रुतका यत्र तत्रान्त्यः कल्पितो[4] भवेत्॥ ८८५॥

[5]तनुपातसमाख्यातो नाम्ना तुरगलीलकः[6] ००००'।
लघुः[7] प्लुतो गुरुश्चैको लघुप्लुत[8]मतः परम्॥ ८८६॥

पञ्चपातान्वितो[9] नित्यं कीर्तितालः प्रकीर्तितः[10] ऽ'ऽ। ऽ'।
गुरुश्चैको[11] लघुश्चैको(कः) प्लुतश्चैको भवेत्क्रमात्[12]॥ ८८७॥

कोकिलाप्रियनामासौ [13]पातैस्त्रिभिरलङ्कृतः[14] ऽ। ऽ'।
एवं [15]केचित्समादिष्टा [16]नामलक्षणलक्षिताः॥ ८८८॥

ताला[17](लाः) प्रस्तारसंयुक्ताः सोमेश्वरमहीभुजा।
त्रयोदशाङ्गुला[18](लः) कार्या[19](र्यः) कांस्यताल[20](लः)तनु-
र्महान्॥ ८८९॥

लघुताल[21]समाकारःश्छिद्रं[22](रश्छिद्र) रज्जुसमन्वितः।
वामहस्तक्रियायोगा(गो) दक्षिणेनापि धार्यते॥ ८९०॥

[23]तस्य पाटा रुणकटा वाद्यमार्गविधौ बुधैः।
सार्थं डमरुढक्काभ्यां कड[24](कुडु) वा सेलु(ल्ल)सङ्गताः॥ ८९१॥

घडसे च त्रिवल्यां च [25]करि(र)टामण्डिवढक्कयोः(मण्डिडक्कयोः)।
सङ्गतो वाद्यते तज्ज्ञैर्यतिमान[26]प्रदर्शकः॥ ८९२॥
अन्यैरपि महावाद्यैर्जयघण्टा हि वाद्यते।
[27]संभारि(गम्भारी) दारुघटितश्चतुरस्रा[28]यतो दृढः[29]॥ ८९३॥

---

१. A. नं। २. D. तः॥ ३०॥ sss। sss००। ३. D. drops this stanza। ४. D. ता। ५. A. सतु पातः। ६. D. कः।॥ ३१। ०००। ७. A. घु। ८. A. तंम। ९. D. ते। १०. D. तः॥ ३२॥ ऽऽ। ऽ'। ११. A. कोप्लुतश्चैकोभवेक्रमात्। १२. A. न्। १३. D. याते। १४. D. तः॥ ३३॥ ऽ॥। १५. A. केश्चि। १६. A. नामदिष्टानामलक्षणलक्षिताः। १७. D. ल। १८. A. लं। १९. A. र्य। २०. A. तांकतनुर्महान्। २१. D. ले। २२. A. द्रे। २३. A. तस्यां पाटा रुणंकं च वाद्यामार्गविदोवुद्धैः। २४. D.कवसेतत्रसंगता। २५. D. मंडितं-प्रौढढक्कयोः। २६. D. वर्तकः। २७. A. शंभारी। २८. D. श्रा। २९. A. दढः D. दृढ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्यादेकहस्तविस्तारः[१] सार्धहस्ता[२]यतो भवेत् ।
अङ्गुलद्वयमुत्सृज्य परितो मध्यत[३]स्तनुः[४] ॥ ८९४ ॥

अधोभागे विधातव्यो निम्नोऽसावङ्गुलद्वयम् ।
[५]सार्धयुग्माङ्गुलघनः समन्तात्पट्टको भवेत् ॥ ८९५ ॥

[६]पृष्ठदेशे तथा कायः[७](र्यः) श्लक्ष्ण[८]सिक्त(क्थ)कलेपितः[९] ।
[१०]तनूकृतेषु स्थानेषु शिष्यतेऽङ्गुलमीहितम् ॥ ८९६ ॥

शलाका लोहजा तत्र कि(ङ्कि)णीग्रथिना(ता) भवेत् ।
अधोभागे तथा तिर्यक् नव सप्त दशा[११]थवा ॥ ८९७ ॥

अङ्गुष्ठमध्यमाकर्षा[१२]द्वाद्यते पट्टवाद्यकम् ।
धुरु [१३]खुरु [१४]तररटखराधडव[१५]णे(र्णे)न संयुताः ॥ ८९८ ॥

पाट[१६]वर्णा इमे[१७]प्रोक्ताः[१८] [१९]पट्टवाद्यविशारदैः ।
द्वादशाङ्गुलविस्तारश्चतुरस्रो घनः पटः ॥ ८९९ ॥

अङ्गुष्ठतर्जनीयोगादुपान्ते[२०]ऽसौ[२१] विधार्यते ।
करयो[२२]र्मध्यतः कृत्वा वाद्यते पट्ट[२३]वाद्यकम् ॥ ९०० ॥

[२४]द्रुतं खटपटाशब्दो यथातालानुगो भवेत् ।
सुपक्काश्च (च) [२५]घना कम्रा द्वादशाङ्गुलदीर्घिका[२६] ॥ ९०१ ॥

विस्तारे ह्यङ्गुला कार्या[२७] पिण्डे चार्धा[२८]ङ्गुला मता[२९] ।
[३०]किञ्चिच्छिथि[३१]लिते धार्ये[३२] परस्परसमं गते ॥ ९०२ ॥

[३३]एकैकस्मिन्करे [३४]कम्रे द्वे द्वे वाद्ये विचक्षणैः ।
मणिबन्धप्रकम्पेन वाद्यन्ते कम्रिका [३५]घना (ः) ॥ ९०३ ॥

---

१. D. र । २. D. स्तो । ३. A. ति । ४. D. नु । ५. A. साधुयुग्मांगुलंमानः समंतान्पट्टकोभवेत् । ६. A. प्र । ७. D. र्यं । ८. D. सछक । ९. D. सः । १०. D. drops this stanza । ११. D. शस्तथा । १२. A. र्षेत्रा । १३. A. वु । १४. A. तरटखरा । १५. A. घ । १६. A. ठ । १७. A. म । १८. A. क्ता । १९. A. द । २०. D. पाः ते । २१. A. सो । २२. A. मतः । २३. A. द । २४. A. drops this line । २५. A. यनाः । २६. A. र्घकाः । २७. A. प्रोक्ताः । २८. D. र्द्धं । २९. A. ताः । ३०. A. किंचि । ३१. A. धिलि । D. थिल । ३२. A. परसमंगते । ३३. D. पाके । ३४. A. कक्षे । ३५. A. धमा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किरिकिट्टा[1]क्षरैः पाटैः[2] कम्रावाद्यं विधीयते ।
यद्वा दक्षिणहस्तेन कृत्वानामिकयान्तरम् ॥ ९०४ ॥
वामाङ्गुष्ठ[3]प्रघ[4]र्षेण वादये[5]त्तलताडनैः ।
निम्नां[6] लोहमयीं शुक्तिं[7] स्ति(ति)र्यग्रेखा[8] भिराजिताम् ॥९०५॥
एणशृङ्ग[9]सरूपेण लोहकोणेन घर्षयेत् ।
किरि[10]किट्या(ट्य)क्षरोपेतं[11] यक्षाणामतिवल्लभम् ॥ ९०६ ॥
शुक्तिवाद्यमिदं प्रोक्तं यतिमात्रावबोधकम् ।
इत्येवं घनवाद्य[12]स्य क्रियायोगो निरूपितः ॥ ९०७ ॥
पाटवर्णप्रभेदश्च कथितः सोमभूभुजा ।
पञ्चाङ्गुला[13]त्समारभ्य यावद[14]ष्टादशाङ्गुलम् ॥ ९०८ ॥
फूत्कारः(र) सुषिरस्याधः[15] ता(धस्ता)ररन्ध्रस्य पूर्वतः ।
अङ्गुलानामियं सङ्ख्या सुसङ्ख्याता पृथक् [16]पृथक् ॥ ९०९ ॥
तारारन्ध्राणि कुर्वीत [17]वंशेऽष्टौ समभागतः ।
पञ्चाङ्गुलो भवेद्वंशः षोडशाङ्गुलमायतः ॥ ९१० ॥
फूत्काररन्ध्रादारभ्य गणना तत्र कीर्तिता ।
स[20]मभागाष्ट [21]रन्ध्रेषु सार्धभागं समुत्सृजेत् ॥ ९११ ॥
एवं [22]वंशेषु सर्वेषु सुषिराणि प्रकल्पयेत् ।
फूत्कार[23]रन्ध्रादूर्ध्वं स्याच्चतुस्त्रिव्यङ्गुलं क्रमात् ॥ ९१२ ॥
सर्ववंशेषु कुर्वीत यथाशोभं यथारुचि[24] ।
पञ्चाङ्गुलात्समार[25]भ्य यावदष्टादशाङ्गुलम् ॥ ९१३ ॥
अङ्गुलं[26] क्रमतो वृद्धिं (द्धिः)वंशानां दीर्घता मता ।
फूत्काररन्ध्रं कर्तव्य[27]मङ्गुष्ठा[28]ग्रप्रवेश[29]नम् ॥ ९१४ ॥

---

१. A. द्य । २. A. दै । ३. A. ष्ट । ४. A. क । ५. A. यैत्त D. येत । ६. A. म्ना । ७. A. यी । ८. A. क्ति । ९. D. क्रे । १०. A. स्वाभि धीयते । ११. D. म । १२. D. किंवृ । १३. A. पोतं D. तत् यक्षा । १४. A. द । १५. A. लस । १६. A. ष्टदशाङ्गुलः । १७. A. रमुखिर स्याधे । १८. A. drops one पृथक् । १९. A. शेष्यै D. शोष्टौ । २०. A. मा । २१. D. करन्ध्रेणार्ध । २२. A. वंसे । २३. A. रं । २४. A. चिं । २५. A. मात्भ्य । २६. A. लः । २७. D. व्यअं । २८. A. ष्टा । २९. A. क ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किञ्चिदाय[1]तवृत्तं स्यात्सर्ववं[2]शेष्वयं विधिः ।
कर्क[3]न्धुवीजवाहीनि तार[4]रन्ध्राणि कल्पयेत् ॥ ९१५ ॥

कनिष्ठा[5]ङ्गुलिमानेन वंश[6]रन्ध्रं विधीयते ।
त्रयोदशाङ्गुलं वर्ज्यं तथा पञ्चदशाङ्गुलम्[7] ॥ ९१६ ॥

वंशभेदेषु सर्वेषु तथा सप्तदशाङ्गुलम् ।
अशोभनमनायुष्यं वंशत्रयमिदं[8] यतः ॥ ९१७ ॥

तस्मात्तत्क[9]र्तृभिर्वर्ज्यं वादकैश्च विशेषतः[10] ।
फूत्कारो यमलस्तोक [11]स्व(स्व)लित[12]स्तन्तवस्त(न्तुवत्त)था
॥ ९१८ ॥

एते निन्द्या(:) समाख्याता वंशविद्याविशारदैः ।
[13]वहणिः (नं) शिरसः कम्पः स्वस्वास्थानासि(स्थानानाप्रि)
रेव च ॥ ९१९ ॥

वृथाप्रयोगबाहुल्यमज्ञता गीतवादने ।
एते दोषा महानिन्द्या वांशिकस्य विशेषतः ॥ ९२० ॥

वर्जनीयाः समाख्याता वंशविद्याविशारदैः ।
सुरसत्त्वं निबिडता [14]समत्वं फूत्कृते[15]र्गुणाः ॥ ९२१ ॥

अमुक्तिरर्धमुक्तिश्च मुक्तिश्चेद[16]ङ्गुलीवहा ।
गमकानाञ्च सप्ताना[17]मङ्गुली[18]सारणा[19]क्रिया ॥ ९२२ ॥

सुस्थानत्वं सुरागत्वं वांशि[20]कस्य गुणास्त्व[21]मी ।
गीतवादन[22]दक्षत्वं रा[23]गरागाङ्गवेदिता ॥ ९२३ ॥

क्रियाभाषाविभा[24]षासु कौशलं वांशिके गुणाः ।
सु(स्व)स्थाने चा[25]प्यवस्थाने रागनिर्माणनैपुणम् ॥ ९२४ ॥

---

१. A. यु । २. A. शेविधिः । ३. A. कंन्धू । ४. A. रः । ५. A. ष्ठा । ६. A. शं । ७. A ल । ८. A. दंशत्रयमिदं यतः । ९. D. त्कर्म । १०. A. कः । ११. A. स्स । १२. A. तस्तूत्कत । १३. A. drops these two slokas । १४. D. गुरुत्वं । १५. A. गुणः । १६. A. त्यंगु । १७. D. नांअं । १८. D. लि । १९. A. णे । २०. D. शी । २१. A. त्व । २२. D. व । २३. A. गा । २४. A. भासु । २५. A.. थवा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व[1]र्णिता वांशिकस्यैते गुणा गीतविचक्षणैः ।
एवं लक्षणसंयुक्ता वांशि[2]काः शोभना मताः ॥ १२५ ॥
[3]गा[4]तृ(तृ)णां स्थानदातारस्तेषां दोषवि(पि)धायकाः ।
मुहुरस्य[5](खमस्याः) विषाणं वा दारुजं वा प्रकल्पयेत् ॥ १२६ ॥
अष्टाविंशतिरङ्गुल्यस्तस्य दैर्घ्यं विधीयते ।
मुखरन्ध्रं [6]च तस्य स्यादाढकीवीजवाहि च ॥ १२७ ॥
[7]अग्रतो व्यङ्गुलं छिद्रं कर्तव्यं काहलाकृति[8] ।
चतुरङ्गुलदीर्घा तु [9]सुतन्वी ताम्रनालिका ॥ १२८ ॥
मुख[10]रन्ध्रे ससूत्रा स्यात्क्षे(सा क्षे)प्तव्या यवमात्रकम् ।
ऊ[11]र्ध्वं तस्याः पि(वि)धातव्या व्यङ्गुला [12]शुक्तिच[13]क्रिका ॥ १२९ ॥
दन्तजा वा विधातव्या मध्यरन्ध्रसमन्विता ।
देवनालकृ[14]ता शुक्ति(क्तिः) काशपुष्पसमाकृतिः ॥ १३० ॥
क्षीरपा[15]कमृदू[16]भूतां चक्ररन्ध्रे नियो[17]जयेत् ।
[18]शृङ्गे रन्ध्राणि कुर्वीत विहाय [19]चतुरङ्गुलम् ॥ १३१ ॥
द्वादशाङ्गुल[20]वंशस्य प्रमाणेन वि[21]चक्षणः ।
शृङ्गवक्त्रादधोदेशे रन्ध्रदेशादधस्तथा ॥ १३२ ॥
छिद्रमन्यत्प्रकर्तव्यमेवं मुहुरिका भवेत् ।
अङ्गुली वं(र्वं)शमार्गेण छिद्रास्येषु विधारयेत् ॥ १३३ ॥
अध[22]श्छिद्रं पि[23]धातव्यं वामाङ्गुष्ठमुखेन तु ।
वितस्तिमात्रिका [24]पावी स्थौल्येनाङ्गुष्ठमात्रिका ॥ १३४ ॥
वैणवी सा प्रकर्तव्या कनिष्ठा[25]ग्रप्रवेशिनी ।
मुखर[26]न्ध्रं भवेदेकं [27]स्वरार्थं रन्ध्रपञ्चकम् ॥ १३५ ॥

---

१. A. र्ण्यते । २ D. शीका । ३. D. मा । ४. A. तृहाणां । ५. D. श्व । ६. A. व । ७. A. अतो । ८. A तिः । ९. A. सुवत्तन्वी । १०. A. रंससूत्रा स्याक्षेप्तयाथवमात्रकं । ११. A. र्ध्वं । १२. A. सू । १३. D. क्र । १४. A. तांकोशां विकासिकुसुमाकृति । १५. A. कां D. कान् । १६. A. दु D. दद्भुतान् । १७. A. जयोजयेत् । १८. A. शृंग । १९. A. धतुरंगुली । २०. A. वर्ण । २१. A. पि । २२. D. धः छि । २३. A. वि । २४. D. वापि । २५. A. ष्टा । २६. A. रंध्रे । २७. A. ख ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वक्षोदेशे वाहनीया नादेनोचतरा हि सा ।
नवाङ्गुलप्रमाणेन कर्तव्यः पावसंज्ञकः ॥ ९३६ ॥

तारन्ध्रप्रमाणेन मुखरन्ध्रं प्रकल्पयेत् ।
ग्रन्थिस्तस्य न भेत्तव्यो मुखरन्ध्राय धीमता ॥ ९३७ ॥

स्वल्पध्वनिनिविष्टोऽयं पावः कर्णसुखावहः ।
हस्तद्वयाधिका दीर्घा तारन्ध्रचतुष्टया ॥ ९३८ ॥

मुखरन्ध्रेण संयुक्ता सुचुलि(मुरली) श्रुतिशोभना ।
शङ्खं निर्दोषमादाय नाभि(भिं) तस्य समुद्धरेत् ॥ ९३९ ॥

एकादशाङ्गुलायामं कर्तव्यं शिखरं ततः ।
क्रमशो हीयमानं च धातुसिक्ष(क्थ)कनिर्मितम् ॥ ९४० ॥

अर्धाङ्गुलं मुखे रन्ध्रमन्तरा माषमात्रकम् ।
विधार्य करयुग्मेन श्वासेनापूरितोदरः ॥ ९४१ ॥

बद्धः कराक्षरैः पादैर्हुंभुं पाटसमन्वितैः ।
धत्तूरपुष्पवदना रन्ध्रदण्डा सुदीर्घिका ॥ ९४२ ॥

कार्या तामयमयी रौप्यसुवर्णघटिताथवा ।
काहला नाम सा प्रोक्ता वु(चु)का दीर्घतरा भवेत् ॥ ९४३ ॥

तित्ती(त्ति)री यमला ह्रस्वा तथैव च निरूपिता ।
शृङ्गं च माहिषं श्लक्ष्णं सर्वदोषविवर्जितम् ॥ ९४४ ॥

फूत्कार सुरसं क्षिप्तदन्तिदन्तोपशोभितम् ।
धोकारनादगम्भीरं तुतुकारविराजितम् ॥ ९४५ ॥

कृष्णेन निर्मितं वाद्यं शृङ्गं गोपालवल्लभम् ।
हस्ताङ्गुलप्रमाणेन तूर्यवत्कथितं पुरा ॥ ९४६ ॥

---

१. A. क्ष । २. A. द । ३. A. चदेतराहिसा । ४. D. व्यं । ५. A. तं । ६. A. खं । ७. D. यावत्क । ८. A. द्व । ९. A. चुली । १०. D. र्घो । ११. A. क्थ । १२. A. वंधः । १३. A. रे । १४. A. भुं । १५. A. द । १६. A. रंध्रे । १७. D. सामृन्मयी । १८. A. क्तादीर्घतरा-भवेत् । १९. A. खा तथैचेयं । २०. A. सुचिर । २१. A. मादरं । २२. D. तत्रु । २३. D. ली । २४. D. वित् । २५. A. राः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पाटवर्णाश्च ये तत्र तत्र ये वाद्यकोविदाः ।
तानाहूय महीपालः सुसन्तुष्टः प्रियावृतः ॥ ९४७ ॥

उत्सवे वा तथोद्याने कुर्याद्वाद्यविनोदनम् ।
इति वाद्यविनोदोऽयं लक्ष्यलक्षणसंयुत(तः) ॥ ९४८ ॥

भूलोकमल्लदेवेन विस्तरेण निरूपितः ।

इति वाद्यविनोदः ।

चतुःप्रकारभिन्नस्य लक्ष्म वाद्यस्य वर्णितम् ॥ ९४९ ॥

साम्प्रतं वर्णयिष्यामि नृत्यं लक्षणसंयुतम् ।
उत्सवे विजये हर्षे कामे त्यागे विलासके ॥ ९५० ॥

विवादेऽथ परीक्षायां कार्यं नृत्यविनोदनम् ।
विवाहपुत्रजन्मादिभूतमातृवसन्तकम् ॥ ९५१ ॥

एवमादिनिमितो(त्तो)त्था जनैरुत्सवसंज्ञिताः ।
जयश्च प्राप्यते यत्र द्यूताह्वयरणादिषु ॥ ९५२ ॥

सन्तोषजनकः सम्यग्जयः परिकीर्तितः ।
मिष्टान्नपानभोगाश्च(च) दुप्रा(दुष्प्रा)प्यप्रापणेन च ॥ ९५३ ॥

गीतवाद्यरवाच्चेतोविकासो हर्ष उच्यते ।
उद्दीपनार्थं चित्तस्य प्रत्यङ्गोपाङ्गवीक्षणम् ॥ ९५४ ॥

रूपयौवनयुक्तानां काम इत्युच्यते बुधैः ।
इ(ई)दृग्विधं ममास्ती ति स्त्रीरत्नं यत्प्रदृश्यते ॥ ९५५ ॥

नर्तकी पररूपाणां विलासः स तु कथ्यते ।
आ(अ)मर्षस्तु समापन्नो नृत्यविद्याविशारदैः ॥ ९५६ ॥

नृत्त.....पेक्षौ वि(विद्याजयापेक्षैर्वि)वादः स तु कथ्यते ।
नृत्यं(त्य) विद्यागमे सम्यक् प्राविण्यं विद्यते न वा ॥९५७॥

---

१. D. त । २. A. drops this तत्र । ३. A. नू । ४. A. ल । ५. A. ष्ट । ६. A. चा । ७. D. मे । ८. D. तं । ९. A. त्य । १०. A. ग । ११. D. च । १२. A. ने । १३. D. त्र । १४. D. विनोदो । १५. A. भिः । १६. D. कृवि । १७. D. संभोगतृप्तिकारणमेवच । १८. A. रहा । १९. D. यां । २०. A. सी । २१. D. नृत्तकी । २२. D. शालः । २३. A. नृतंविद्यागतः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रियालोको हि तस्यैतत् परीक्षा सा प्रकीर्तिता ।
नानादेशसमायातयाचकाश्चारणादयः ॥ ९५८ ॥

तेषां दानार्थमालोकस्त्याग इत्यभिधीयते ।
नाट्यं लास्यं ताण्डवं च लाघवं विषमं तथा ॥ ९५९ ॥

विकटं चेति निर्दिष्टं नर्त्तकं(नं) षट्प्रकारकम् ।
आहार्यैर्वाचिकैश्चैव सात्विकैराङ्गिकै रसाः ॥ ९६० ॥

व्यज्यन्तेऽभिनयैर्नृत्यैस्तन्नाट्यमिति कथ्यते ।
पादपाटविहीनञ्च करणाभिनयोज्झि (ज्झि)तम् ॥ ९६१ ॥

ललितैरङ्गहारैर्यैश्च तल्लास्यं परिकीर्तितम् ।
तन्न(त्र)व्यक्तमुदारञ्च लालित्येन विवर्जितम् ॥ ९६२ ॥

पुरुषैः प्रायशःकृप्तं नृ(त्यं)ताण्डवमीरितम् ।
स्वस्तिकैः करणैर्युक्तमचि(श्चि)ताद्यैरलङ्कृतम् ॥ ९६३ ॥

कौतुकोल्लासजननं लघु नृत्यं तदिष्यते ।
विचित्रैः पदपाठै(टै)श्च नानाभङ्गिविवर्जितैः ॥ ९६४ ॥

भ्रमणोत्क्षेपविक्षेपैकम्पाद्यैर्विषमं भवेत् ।
विकृतैर्मुखहस्तैश्च जठराङ्घ्रिविलोचनैः ॥ ९६५ ॥

विरूपं नृत्यते यत्तु विकटं तत्प्रचक्षते ।
नर्तकाः षट् प्रकाराः स्युर्नर्तकी नटनर्तकौ ॥ ९६६ ॥
वैतालिकाश्चारणाश्च तथा कोल्लटिका अपि ।

सुरूपा तरुणी तन्वी श्यामा चारुपयोधरा ॥ ९६७ ॥

प्रगल्भा सरसा चित्ते नर्तकी सा प्रशस्यते ।
पाठको बहुभाषासु बहुभावविशारदः ॥ ९६८ ॥

---

१. A. व । २. A. क्य । ३. A. नाड । ४. A. बि । ५. A. आहायो D. अहार्यै । ६. A. वांचि D. वाच । ७. A. सा । ८. D. वाद्यते । ९. A. ठ । १०. A. रैर्यतालास्यं । ११. A. रतब्धं । १२. A. धै । १३. A. नृताण्डव D. तत्ताण्डवमुदीरितम् । १४. D. त्तं । १५. A. राजि । १६. D. ज्ञेयं । १७. D. र्भुय । १८. A. तु । १९. A. ङ् । २०. A. वे । २१. A. सू । २२. A. रुह । २३. A. श्य D. स्या । २४. A. रू । २५. A. तैं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रसाभिनयविज्ञाता[1] नटो वाऽथ नटी[2] वरा[3] ।
स्वभ्यस्तः पदपाटेषु[4] हस्तपाट[5]विचक्षणः ॥ ९६९ ॥

शि[6]क्षको नृत्यविद्यायां सुरेखो[7] नर्त[8]को वरः[9] ।
बहुभाषाप्रगल्भो यः परि[10]हासविचक्षणः[11] ॥ ९७० ॥

परि[12]वादपरो नृत्ये[13] सम्यग्[14] वैतालिको वरः ।
किङ्किणीचालने दक्षो[15] गीतधा[16]रणकोविदः ॥ ९७१ ॥

हास्य[17]वाक्यप्रगल्भश्च सुस्वरश्चारणो वरः ।
[18]क्षुरिकां [19]वश्चयत्यङ्गे [20]मृद्वङ्गैः परिवर्तते ॥ ९७२ ॥

लघुप्लवो भारसहो [21]नृत्य(त्ये) कोलटिको वरः ।
नर्तकाः कथितास्त्वेवं नृत्यभेदो (ऽ)भि[22]धीयते ॥ ९७३ ॥

अङ्गै[23]रुपाङ्गैः प्रत्यङ्गैर्युक्तं [24]यत्प्रतिपाद्यते ।
शिरःस्क[25]न्धस्तथा वक्षो जठरं पा[26]र्श्वयुग्मकम् ॥ ९७४ ॥

कटिश्चेति भवन्त्यत्र [27]षडेवाङ्गानि [28]मुख्यता(तः) ।
भ्रुवौ नेत्रे तथा नासा कपो[29]लौ[30] हनू[31]स्तथा ॥ ९७५ ॥

[32]दन्ता जिह्वा भवन्त्यष्टा[33]व(वु)पाङ्गानि मते[34] मम ।
[35]बाहु(हू) च मणि[36]बन्धौ च करशाखा[37]स्तथैव च ॥ ९७६ ॥

जानुजङ्घे पदा[38]ङ्गुल्यः प्रत्यङ्गानि षडेव च ।
अङ्गान्यु[39]पाङ्गान्युक्तानि प्रत्यङ्गसहितानि च ॥ ९७७ ॥

[40]क्रियास्तेषां प्रवक्ष्यामि विनियोगेन संयुताः ।
आकम्पितं च विधुरं (कम्पितं च) द्रुतं विधर(धुत)मेव च ॥९७८॥

---

१. A. ना । २. A. दी । ३. D. नरः । ४. A. सा । ५. D. ठे । ६. D. द । ७. D. वीक्ष । ८. A. को ९. A. नृत्त । १०. A. चः । ११. A. री । १२. A. णा । १३. A. र । १४. D. त्तैः । १५ D. क् । १६. A. क्षौ । १७. A. वा । १८. वां । १९. D. क्ष । २०. A. का । २१. A. द्वंगौ । २२. D. लाटिको नृत्यको वरः । २३. D. वि । २४. A. र । २५. D. यः प्र । २६. A. स्कंधेस्त । २७. D. खंडेवां । २८. A. मुच्यते । २९. D. पा । ३०. D. ष्ठौ । ३१. A. नूत । ३२. A. दंत । ३३. D. ष्टउ । ३४. A. धतेमम । D. मतेर्मम । ३५. A. हौ । ३६. D. बंधे । ३७. A. खत । ३८. D. दागुल्फः । ३९. A. न्यपांगयु । ४०. D. drops this stanza ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अवधूतं [1]तथा धूतमञ्चितं न्यञ्चितं तथा ।
परिवाहि[2] परावृत्तमुत्क्षिप्तमधोगतम् ॥ १७९ ॥

[3]लोलितं [4]चेति विज्ञेयं त्रयोदशविधं [5]शिरः ।
अधश्चोर्ध्वं शनैः कम्पाद्वेदाकम्पितं शिरः ॥ १८० ॥

तथैव कम्पितं शीघ्रं बहुशः कम्पितं [6]शिरः ।
पृच्छो(च्छो)पदेशसंज्ञा[7]सु निर्देशे भाषणे तथा ॥ १८१ ॥

आवाहने च निर्दिष्टं तज्ज्ञैराकम्पितं शिरः ।
वितर्के तर्जने कोपे[8] विज्ञाने च निवारणे ॥ १८२ ॥

तथा [9]सातिशय[10]प्रश्ने कम्पितं विनियुज्यते ।
शिरस्तु[11] [12]परितस्तिर्यग् धूतं विधुतमुच्यते ॥ १८३ ॥

तदेव यदि मन्दं स्याद् द्रुतमित्युच्यते तदा ।
पाता(ना)वसाने शीतार्ते [13]स्वा(श्वा)सिते ज्वरिते तथा ॥ १८४ ॥

भीते चैव[14] प्रयोक्तव्यं तज्ज्ञैस्तु विधु[15]तं शिरः ।
[16]अनीप्सिता (ते) विस्मये च विषादे प्रत्यये तथा ॥ १८५ ॥

नास्तीति वचने चैव प्रतिषेधे धू(द्रु)तं शिरः ।
शिरोधः सकृदाक्षिप्तमवधूतमुदाहृतम् ॥ १८६ ॥

[17]तिर्यग्गू(गू)र्ध्वं समुत्क्षि[18]प्तमाधू[19]तं शिर उच्यते ।
आवाहने च सन्देश[20]श्रवणे श्रावणे तथा ॥ १८७ ॥

संज्ञाप्रदर्शने चैव शिरः[21] स्यादवधूतकम् ।
अमर्षे च तथा गर्वे विस्मये हर्षणेऽपि च ॥ १८८ ॥

स्मृता[22]वपि प्रयोक्तव्यं शीर्षमाधूतसंज्ञकम् ।
हस्त[23]पार्श्वे[24] तथा (नत)ग्रीवं शिरो विज्ञेयमञ्चितम् ॥ १८९ ॥

---

१. A. gives तथा धूतं twice। २. A. हपरावृत्तमुक्षि। ३. A. ला। ४. A. वे। ५. A. सि। ६. A. तं शितं शिरः। ७. D. ज्ञाः सु। ८. D. शे। ९. A. शा। १०. D. ये। ११. D. स्तू। १२. A. पतितं तिर्थं श्चूतं। १३. A. त्रा। १४. D. नै। १५. A. धुरं। D. धृतं। १६. A. drops this verse। १७. A. तिर्यंगृ। १८. A. क्षि। १९. D. धु। २०. A. शे। २१. A. रस्यादवधूभकम्। २२. A. वा। २३. A. स्तं। २४. A. र्श्वं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बाहुमूर्धनि संसक्तं [1]न्यञ्चितं परि[2]चक्षते ।
प्रसन्ने व्याधिते भीते मू[3]र्च्छि[4]ते दुःखिते तथा ॥ ९९० ॥

चिन्तानिमग्नके [5]दैवे कार्ये स्यादञ्चितं शिरः ।
विलास (से) ललिते गर्वे [6]विलोके(व्योके) कि[7]लकिञ्चिते ॥९९१॥

(मोट्टायिते कुट्टमिते) माने स्तम्भे च न्यञ्चितम् ।
[8]नानाभावरसे वर्णे(र्ण्ये) परि[9]वाहितमुच्यते ॥ ९९२ ॥

पराङ्मुखं भवेद्यत्तु तत्परावृत्त[10]मुच्यते ।
विषा[11]दे साधने हर्षे विचारे स्मरणे तथा ॥ ९९३ ॥

विह्व[12]तामर्षली[13]लासु परिवाहितमिष्यते ।
[14]पु(पृ)ष्ठवद्धे [15]तु विक्षिप्य(प्तं) बाणाहरण[16]कर्मणि ॥ ९९४ ॥

[17]पाश्चात्यवी[18]क्षणे [19]चैव तथा कम्पनहेतुके ।
(मुखापहरणे चैव परावृत्तं शिरः स्मृतम्) ॥ ९९५ ॥

अवाङ्मुखं शिरो य(त्स्या)त्तदधोमुखमिष्यते ।
(उत्क्षिप्तं चापि विज्ञेयमुन्मुखावस्थितं शिरः) ॥ ९९६ ॥

प्र[20]णामे चैव लज्जायां दुःखे [21]चिन्तोपता[22]पयोः ।
निम्नस्थव[23]स्तुवीक्षायां जायते[24]ऽवनतं शिरः ॥ ९९७ ॥

[25]यत्किञ्चिदुत्तरं वस्तु यदा नभसि संस्थितम् ।
तस्य संवीक्षणे कुर्याच्छिरः[26] प्र[27](र उ)त्क्षिप्तसंज्ञकं(कम्) ॥९९८॥

(सर्वतो लोलनाच्चापि शिरः स्यात्परिलोलितम्)
मदवैकल्यरोगेषु ग्रहावेशे नियुज्यते ॥ ९९९ ॥

उच्छ्रितः[28] स्वस्त(स्रस्त) एकान्तः [29]संलग्नो लोल एव च ।
स्कन्धः पञ्चविधः प्रोक्तो नृत्ये[30] नाट्ये च कोविदैः ॥ १००० ॥

---

१. A. नंचि । २. A. च । ३. D. र्छि । ४. A. चैव । ५. A. दिविशो । ६. A लि । ७. A. drops नानाभावरसेवर्णे । ८. A. रवाहितदुच्यते । ९. A. त । १०. A. साये । ११. A. दि । १२. D. ला । १३. D. प्र । १४. A. तु क्षिप्त वाणा । १५. A. णा । १६. A. पश्चाश्चाल्य । १७. A. वि । १८. A. वैव आवाङ्मुखं शिरो—यतदाहुरधोमुखं । १९. A. र । २०. D. चित्तो । २१ A. ना । २२. A. स्थ । २३. A. शिरः प्रक्षिप्तसंज्ञकः । २४. A. D put this stanza before the preceding one । D. किंचिच उत्तरं वस्तु । २५. A. स्थिरः । २६. D. क्षिप्तसंज्ञकं । २७. A. तं । २८. A. संलज्जो । २९. A. ते । ३०. A. दै ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मदात्समुन्नतः[1] स्कन्ध उच्छ्रितः परिकीर्तितः ।
अधोगतो[2] भवेत्स्क[3]न्धः (स्रस्तः) (श्लेषे संलग्न उच्यते) ॥१००१॥

(क्रोधात्समुच्छ्रितः स्कन्ध एकान्तः परिकीर्तितः) ।
स्कन्धः प्रचलिते(तः) ख्यातो लोल[4] इत्याभिसंज्ञया ॥ १००२ ॥

क्षवथावभिमाने च सम्मदे च विशेषतः[5] ।
उच्छ्रितो[6] विनियोक्तव्यः[7] स्कन्धो नाट्यविशारदैः ॥ १००३ ॥

[8]शमे मदे च मूर्च्छायां दुःखे स्रस्तः प्रयुज्यते ।
मुष्टिप्रहारे कुन्ते च[9] (एकान्तो विनियुज्यते) ॥ १००४ ॥

हुडुक्कावादने हासे विट[10]चुभ्ये च लोतके (विटनृत्ये च लोलकः) ।
अ(आ)भुग्नं चै[11]व निर्भुग्नं व्याकम्पितमथापि वा ॥ १००५ ॥

उत्प्रसारि समं [12]चेति वक्षः [13]पञ्चविधं स्मृतम् ।
आभुग्नमुन्नते पृष्ठे[14] निर्भुग्ने[15] (ग्नं) निम्नपृष्ठके ॥ १००६ ॥

[16]उरः कम्पसमायुक्तं व्याकम्पितमुदीरितम् ।
[17]हृच्छल्यकर्षणे शीते लज्जायां वेदने भये[18] ॥ १००७ ॥

विषा[19]दमूर्च्छाशोकेषु वक्ष आभुग्नमुच्यते ।
स्तम्भे सुनामश्रवणे सत्ये[20] शीताभिघाञ्छने ॥ १००८ ॥

वञ्चने पृष्ठ[21] घातस्य [22]गर्व(र्वे) निर्भुग्न[23]मीर्यते ।
दीर्घोच्छ्वासे च [24]कुम्भे च तुङ्गवस्तुविलोकने ॥ १००९ ॥

उत्प्रसारितकं कार्यं समं सौष्ठव[25]कर्मणि ।
क्षामं [26]खलं (ल्लं) तथा पूर्णं रिक्तं [27]पूरं तथैव च ॥ १०१० ॥

एवं चतुर्विधं प्रोक्तं जठरं नाट्यवेदिभिः ।
ईषन्नतं भवे[28]त्क्षामं खल्लं[29] स्यात्पृष्ठभागतः[30] ॥ १०११ ॥

---

१. A. त । २. A तौ । ३. A स्कंधः प्रवलितः ख्यातो लोल इत्यभिसंज्ञया । D. भवेचैव...। ४. D. व । ५. A. त । ६. A. ता । ७. A. व्यं । ८. A. शांमामादे । ९. A. च हुडुक्कावादने तथा । D. च... । १०. A. वनेर्भुग्नं । ११. A. वे । १२. A. पंचं । १३. A. ष्टे । १४. D. ग्ने । A. ग्न । १५. A. रकंप । १६. A. हृत्वल्य । १७. A. वे । १८. A. शा । १९. D. त्य । २०. A ष्ट । २१. D. प्रवनीर्भुग्न । २२. A. भुग्न । २३. D. लंभे । २४. A. ष्ट । २५. A. लक्षं । २६. D. पूर्ण । २७. A. द्वाम । २८. D. लं । २९. A. त ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]क्षामं स्याज्जृम्भणे (हासे)क्षुधि (क्षुधार्ते खल्लमिष्यते)
[2]खल्लं स्यात्प्रेतवेताल[3]चण्डिकाभिनयेषु च ॥ १०१२ ॥

तुन्दिलाभिनये गर्भे[4] तथा[5] श्वासनिरोधने ।
जलोदरे चाल्य[6]शने पूर्णं जठरमिष्यते ॥ १०१३ ॥

[7]उदाने विकृते कोपे श्रमे स्वासे (श्वासे) तथैव च ।
रिक्तपूरं प्रयोक्तव्यं जठरं नाट्यवेदिभिः ॥ १०१४ ॥

नतं समुन्नतं चैव प्रसारितविवर्तितम् ।
तथा [8]प्रसृतमित्येवं पञ्चधा पार्श्वमुच्यते ॥ १०१५ ॥

[9]किञ्चिद् वक्रं ततः (नतं) पार्श्वमुच्छ्रितं स्यात्समुन्नतम् ।
त्रिकस्य च(चा)लनात्तिर्यग् विवर्तितमुदा[10]हृतम् ॥ १०१६ ॥

तदेवान्तर्यदा पृष्ठं तदा प्रसृतमुच्यते ।
उपसर्पे त्वधोवेधे[11] पार्श्वतोऽधो निरीक्षणे ॥ १०१७ ॥

त्रासे च विनियोक्तव्यं नतं पार्श्वं[12] प्रयोक्तृभिः ।
ऊर्ध्वं[13]वध्येऽग्नितापे च पार्श्वकण्डूयने तथा ॥ १०१८ ॥

प्रियगात्रोपसंस्पर्शे पार्श्वं[14] योज्यं समुन्नतम् ।
ऊर्ध्वस्थानां[15]पदार्थी[16]नां [17]कर्षणेबाहुयुग्मतः ॥ १०१९ ॥

जलावतरणे पार्श्वं[18] कर्तव्यं स्यात्प्रसारितम् ।
परिवृत्ताव[19]ग(ङ्ग)मोटे[20] विवर्तितमुदाहृत[21]म् ॥ १०२० ॥

परिवृत्यापसारे च कुर्यादपसृतं बुधः ।
छिन्ना विवृत्ता च तथा रेचितान्दोलितापि च ॥ १०२१ ॥

उद्वाहिता चेति कटी[22] पञ्चधा परिकीर्तिता ।
तिर्यग्विनिर्गता छिन्ना विवृत्ता चलिता भवेत् ॥ १०२२ ॥

---

१. D. drops this line। २. A. लं। ३. D. लश्चंडिका। ४. A. तें। ५. D. धोच्छ्वा। ६. A. न्य। ७. D. drops these stanzas। ८. A शीस्क। ९. D. drops this line। १०. A. दापृष्ट्र ... तमुच्यते। ११. A. धो। १२. D. र्श्व। १३. A. र्ध्वंव्यधो। १४. A. र्श्व। १५. A. न। १६. A. द्यानां। १७. D. कंकणे। १८. D. र्श्वं। १९. A. चंग। २०. A. डे। २१. A. नं। २२. A. टि।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रकम्पनक्रियायुक्ता रेचिता परिकीर्तिता[1] ।
शनैस्तिर्यक् प्रचलिता भवेदान्दोलिता कटिः[2] ॥ १०२३ ॥

क्रमात्पक्ष[3]द्वयोत्क्षिप्ता कटिरुद्वाहिता मता ।
वक्रस्याभिनये छिन्ना विकारे च [4]नियुज्यते ॥ १०२४ ॥

पश्चाद[5]धोविलोके च[6] विवृ[7]ता कटिरिष्यते ।
[8]नृत्ये तु रेचिता योज्या कुब्ज[9]वामनखञ्जयोः ॥ १०२५ ॥

गमनाभिनये[10] काया[11] (र्या) बुधैरान्दोलिता कटिः[12] ।
स्थूलानां[13] गमने योज्या स्त्रीणां लीलागतावपि ॥ १०२६ ॥

उद्वाहिता प्रयोक्तव्या कटिर्नाट्यविशारदैः ।
अङ्गानां लक्षणं नाम विनियोगश्च कीर्तितः ॥ १०२७ ॥

उपाङ्गभेदो(दः) सर्वोऽपि वक्ष्यते विस्तरेण च[14] ।
उत्क्षि[15]प्ता पतिता चैव भ्रुक(भ्रूः कु)ट्या सहिता तथा ॥ १०२८ ॥

चतुराकुञ्चनोपेता स्फुरिता सहजापि च ।
पृथग्वा युगपद्वापि प्रोन्नता भ्रू[16] (भ्रूः) भवेदादि ॥ १०२९ ॥

उत्क्षिप्ता सा समाख्याता साधश्चेतत्पतिता तथा ।
भ्रुवोर्मूल[17] समुत्क्षेपाद् भ्रूकुटिः सा निगद्यते ॥ १०३० ॥

[18]अपाङ्गोन्नतिसंयुक्ता चतुरा परिकीर्तिता ।
एकस्या उभयोर्वापि वक्रतायां[19] निकुञ्चिता ॥ १०३१ ॥

एकैव ललितो[20]त्कम्पा स्फुरिता भ्रूरुदाहृता ।
निजस्थानस्थिता प्रोक्ता(ता) सह[21]जेत्यभिधीयते ॥ १०३२ ॥

भ्रुवो[22]र्लक्षणमित्युक्तं विनियोगो निगद्यते ।
[23]वितर्कामर्षहेलासु निकटश्रवणेऽपि च ॥ १०३३ ॥

---

१. A. ताः । २. D. वटी । ३. A. व्य द्वयोः । ४. D. वि । ५. A. द्वा । ६. A. न । ७. D. कृ । ८. A. वृत्ते । ९. A. व्जा । १०. D. यः । ११. D. र्यं । १२. A. टि । १३. A. ना । १४. A. हि । १५. D. च्छि । १६. A. भू । १७. A. ले । १८. A. अगांगो । १९. A. र्या । २०. A. ता । २१. A. हाजे । D. सज्जे । २२. A. वांल २३. A. चितका ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एकोक्षिप्ता[1] प्रयोक्तव्या भ्रूलता नाट्यकोविदैः ।
ऊर्ध्वस्थवीक्षणे हर्षे विस्मये दूरदर्शने ॥ १०३४ ॥

उत्क्षिप्ते द्वे[2] प्रयोक्तव्ये प्रयोग[3]निपुणौ[4] भ्रुवौ (णैर्भ्रुवौ) ।
हासे घ्राणे जुगु[5]प्सायामसूयायामथाऽपि वा ॥ १०३५ ॥

भ्रूलते[6] पतिते योज्ये सर्वदाभिनये बुधैः ।
सूक्ष्म[7]रन्ध्रावलोके च[8] सूर्य[9]विद्युन्निरीक्षणे ॥ १०३६ ॥

अतिक्रोधे प्रयोक्तव्ये भ्रु(भ्रू)कुटीसञ्ज्ञिते[10] भ्रुवौ ।
शृङ्गारे ललिते सौम्ये दर्शने चतुरा भवेत् ॥ १०३७ ॥

[11]सो(मो)द्वायिते कुहु(ट्ट)मिते विलासे स्यान्निकुञ्चिता ।
एतेष्वेव[12] प्रयोक्तव्या स्फुरिता भ्रूलता बुधैः ॥ १०३८ ॥

रसाभि[13]नयहीनेषु[14] भावेषु सहजा मता ।
कान्ता भयान[15]का चैव हास्या च[16] करुणा तथा ॥ १०३९ ॥

अद्भुता च तथा रौद्री वीरा बीभत्सया सह ।
एता रसाश्र[17]याश्चाष्टौ दृष्टयः परिकीर्तिताः ॥ १०४० ॥

भावाश्रया निगद्यन्ते तथैवाष्टौ मयाऽधुना ।
[18]स्निग्धा हृष्टा च क्रूरा च[19] कृता (दीना) दृप्ता भयान्विता ॥१०४१॥

जुगुप्सिता विस्मिता च स्थायीभावाश्रया [20]इमाः ।
शून्या च मलिना श्रान्ता सलज्जा ग्लानिसंयुता[21] ॥ १०४२ ॥

शङ्किता च विषण्णा[22] च मुकुलाकुञ्चितापि च ।
अभितप्ता च जिह्मा[23] च [24]म(ल)लितान्यवितर्किता[25] ॥ १०४३ ॥

तथार्ध[26]मुकुला भ्रान्ता विप्लुता केकरापि च ।
विकोशा त्राससंयुक्ता [27]मदिरा चेति दृष्टयः ॥ १०४४ ॥

---

१. A. का । २. A. द्वा । ३. A. गेः । ४. A. ण । ५. A. हु । ६. A. तेज्ये । ७. A. रंध्रवि । ८. A. व । ९. D. द्युति । १०. A. तो । ११. A. drops this line । १२. A. वं । १३. A. वि । १४. D. हीनेषु । १५. A. निकांश्चै । १६. A. व । १७. A. ववा । १८. D. स्निग्धा च हृष्टा च । १९. A. कृता दप्ता । D. कृदप्ता । २०. A. द्वामाद्रमाः । २१. A. drops this ता । २२. A. णा । २३. A. ह्वा । २४. D. चा । २५. D. का । २६. D. कुंडलीभ्वंता । २७. . मं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षट्[1]त्रिंशन्नामतः प्रोक्तास्तासां वक्ष्यामि लक्षणम् ।
सहर्षा च[2] प्रसन्ना च सका[3]मापाङ्ग सङ्गता ॥ १०४५ ॥
कान्ता दृष्टिस्तु सम्भोगशृङ्गारे विनियुज्यते ।
स्फुरदुद्वृ[4]त्ततारा च स्तब्धोद्वृत्तपुटद्वया ॥ १०४६ ॥
दृष्टिर्भयानका योज्या भयोत्पादनकर्मणि ।
क्रमशः [5]कुञ्चितपुटा विभ्रान्ता स्वल्पतारका[6] ॥ १०४७ ॥
हास्या[7] दृष्टिः प्रयोक्तव्या [8]कुतुके हास्यकर्मणि ।
मन्दमन्थरतारा च पतितोर्ध्वपुटा तथा ॥ १०४८ ॥
घोणाग्र[9]दायिनी दृष्टि : करुणा कर(रु)णे रसे ।
समाकुञ्चितपक्ष्माग्रा मनागुद्वृत्ततारका ॥ १०४९ ॥
सौ[11]म्या विक[12]सितप्रान्ता सा[13]द्भुता दृष्टिरद्भुते[14] ।
[15]रूक्षा क्रूरारुणोद्वृत्ता नि[16]ष्टब्धा(निष्टब्ध) पुटता[17]रका ॥ १०५० ॥
रौद्री[18] दृष्टिः प्रयोक्तव्या रसे[19] रौद्रे विचक्षणैः ।
क्षुब्धा [20]विकसिता दीप्ता गम्भीरा मध्य[21]तारका ॥ १०५१ ॥
उत्फुल्लो[22]त्फुल्लदृष्टिस्तु वीरा वीररसे स्मृता ।
नि[23]कुञ्चितपुटप्रान्ता [24]घाणा[25]विष्कृततारका ॥ १०५२ ॥
सरुद्ध[26]पक्ष्मा बीभत्सा वीभत्से[27] विनियुज्यते ।
हृष्टा प्रफुल्ला मधुरा स्मेरदा[28](ता)राभिकाङ्क्षिणी ॥ १०५३ ॥
स्निग्धेयं[29] कथिता [30]दृष्टि(ष्टी) रतिभावसमाश्रया ।
हासगर्भा विश[31]त्तारा चञ्चला च निमेषिणी ॥ १०५४ ॥
हासे विकुञ्चिता दृष्टि[32]र्हृष्टा हास्ये[33] नियुज्यते ।
अर्धस्रस्तोत्तरपुटा मनाक् संरुद्धतारका ॥ १०५५ ॥

---

१. D. ड्वि । २. A. द । ३. D. चसन्ना च । ४. A. कां । ५. D. दूधृत । ६. A. कुचि । ७. D. ता । ८. A. स्य । ९. A. कटुके । १०. A. म्र । ११. D. सौमा । १२. A. सत । D. सिता । १३. A. स । १४. A. ता । १५. D. रु । १६. A. निटब्ध । १७. A. त । १८. A. द्र । १९. D. सैरोद । २०. A. पि । २१. A. त्त । २२. D. ल्लमध्या । २३. A. न । २४. A. घ्रा । २५. D. विकृत । २६. D. द्र पद्मा । २७. A. त्सेति विनियुज्यते । २८. A. चा । २९. A. वं । ३०. A. दृष्टिरभाव । ३१. A. शात्ताचंचला । ३२. A. ष्टिह्र । ३३. D. से ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सवा[1]ष्पा मन्दसञ्चारा दीना शोकेऽभिनीयते ।
स्थिरोद्वृत्तपुटा रूक्षा संस्तब्धोद्वृ[2]त्ततारका ॥ १०५६ ॥
इयमेवं[3] विधा [4]दृष्टिः क्रुद्धा क्रोधे[5] विधी[6]यते ।
स्थिरतारा[7] समुत्फुल्ला प्रसादगुणशालिनी ॥ १०५७ ॥
हृष्टा दृष्टिः प्रयोक्तव्या [8]भाव उत्साहनामनि[9] ।
विस्फारितपुटद्वन्द्वा त्रासचञ्चलतारका ॥ १०५८ ॥
निष्का[10]न्तमध्या [11]दृष्टिस्तु भय[12]भावे भयान्विता ।
सङ्कोचित[13]पुटव्यामो(व्यामा)[14]दृष्टिः पिहिततारका[15] ॥ १०५९ ॥
लक्ष्या विलोकनोद्विग्ना दृष्टिर्भा[16]वे जुगुप्सिता ।
उन्नम्य तारकामग्न[17]पुटद्वन्द्वा विकासि[18]नी ॥ १०६० ॥
समा[19] दृष्टिः समाख्याता[20] विस्मये विस्मिताभिधा ।
रसभावाश्रयाः[21] प्रोक्ता अष्टावष्टौ पृथग्द (ग्द)शः ॥ १०६१ ॥
सञ्चारिभावसम्बन्धाः कथ्यन्ते दृष्टयोऽधुना ।
निष्कम्पी (म्पा) समतारा च बाह्यार्थग्राहिणी च या ॥ १०६२ ॥
शून्या दृष्टिः[22] समाख्याता[23] चिंता(न्ता)यां व्यभिचारिणी ।
इषदस्पृ[24]ष्टपक्ष्माग्रा किञ्चिदर्शिततारका ॥ १०६३ ॥
निर्वे[25]दे वाथ वैवर्ण्ये मलिनेयम्प्रयुज्यते ।
सशै[26]थिल्याञ्चितपुटा क्षामा पतिततारका ॥ १०६४ ॥
श्रान्ता दृष्टिः प्रक्[27]र्तव्या श्रमाभि[28]नयकर्मणि ।
किञ्चिदञ्चितपक्ष्मा[29]ग्रा पतितोर्ध्व[30]पुटा च या ॥ १०६५ ॥
व्रीडाऽधोगततारा च व्रीडायां लज्जिता भवेत् ।
श्लथकर्मपुटा मन्दा क्लमस्याभिनयं प्रति ॥ १०६६ ॥

---

१. D. वारव्या । २. D. दधृ । ३. D. व । ४. A. दष्टि । ५. D. धा । ६. A. ही । ७. D. रामुत्फु । ८. D. A. ता । ९. A. नी । १०. A. निक्रांत । D. निक्रान्तः । ११. A. द । १२. D. या । १३. D. पटव्यामा । १४. A. द । १५. A. काः । १६. D. भाग । १७. A. म्नं । १८. D. शि । १९. A. म । २०. A. ता विस्मिताभिधा । २१. D. या तारा बाह्यार्थग्राहिणी च या । २२. A. ष्टि । २३. D. ता ख्याता या व्यभिचारिणी । २४. D. स्प । २५. D. वेंवाथ । २६. D. शिथि । २७. A. व । २८. D. सि । २९. A. क्षांता । ३०. D. र्धं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उन्नता चञ्चला किञ्चिदूर्ध्व[1] चकितता[2]रका ।
शङ्किता दृष्टिराख्याता शङ्कायां सा प्रयुज्यते ॥ १०६७ ॥

मनाग्[3] निष्टब्धतारा या स्रस्तापा[4]ङ्गा निमेषिणी ।
विषा[5]दविस्तीर्णपुटा विषादे सा[6] विषादिनी ॥ १०६८ ॥

चलदाश्लिष्टपक्ष्मान्ता मुकुलोर्ध्व[7]पुटाञ्चिता ।
सुखामीलि[8]ततारा च [9]मुकुला गन्धसम्मदे ॥ १०६९ ॥

[10]किञ्चित्कुञ्चितपक्ष्माग्रा [11]कुञ्चत्तारापुटान्विता ।
कुञ्चिता दृष्टिराख्याता चक्षु(क्षू) रोगे प्रयुज्यते ॥ १०७० ॥

मनागलसतारा य[12](या) चलितैश्च पु[13]र्युता ।
निर्वेदे चाभितापे[14] च कार्या दृष्टिरुपप्लुता ॥ १०७१ ॥

प्रलम्बाकुञ्चितपुटा तिरश्ची रूक्षदर्शना ।
गूढतारा निगूढा च जिष्णा(ज्ञा) सूया[15](सोर्यो)पयोगिनी ॥१०७२॥

ईषदाकुञ्चितप्रान्ता मधुरा च समन्मथा ।
सस्मिता ललिता दृष्टि[16]र्ललिते[17]ऽर्थे प्रयुज्यते ॥ १०७३ ॥

उद्वर्त्ति(र्ति)तपुटद्वन्द्वा तथैवोत्फुल्लतारका ।
[18]अधोविकासा दृष्टिः स्यात् (द्)वितर्के तु वितर्किता ॥ १०७४ ॥

अर्धसम्फुल्लतारा च युक्तार्धमुकुलैः पुटैः ।
गन्धस्पर्शरसास्वादे योज्यार्धमुकुला बुधैः ॥ १०७५ ॥

[19]चलत्पुटा[20] चलत्तारा[21] विवृता मध्यभागतः ।
आवेशे[22] सम्भ्रमे[23]भ्रान्तौ [24]विभ्रान्ता दृष्टिरीरिता ॥ १०७६ ॥

प्रस्फुरत्त(त्स्त)म्भितपुटा विच्छायो[25]द्वृत्ततारका ।
[26]चापलोन्माददुःखार्तिमरणे विप्लु[27]ता भवेत् ॥ १०७७ ॥

---

१. A. र्ध्व । २. D. ताशंकिता । ३. A. म्मिष्टश्च । D. कृनिःस्तब्ध । ४. D. यागो । ५. D. वा । ६. A. परिकीर्त्तिता । ७. A. र्ध । ८. A. जि । ९. D. कुमुला । १०. A. किचि । ११. D. कुंचिता । १२. D. च । १३. A. पेतापेच । १४. A. र्यो । १५. A. र्लतेर्थे । १६. D. तोर्ध्व । १७. A. सा दृष्टिःस्याद्वितर्के तु प्रोक्ता दृष्टिवितार्किता । १८. A. व । १९. A. टाराचल । २०. A. रा विवृत्ताविवृताम । २१. D. श । २२. D. भ्रांतो । २३. A. भ्रांतदृष्टिःसमीरिता । २४. D. योद्धतारका । २५. A. वाप । D. चोप । २६. A. प्लु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आकुञ्चितपुटप्रान्तसङ्गतार्धनिमेषिणी ।
मुहुर्व्यावृत्त[1]तारा च लोकेषु केकरा स्मृता ॥ १०७८ ॥

विकासितपुटद्वन्द्वा निमेषपरिवर्जिता ।
चलत्तारा विकोशा स्याद्[2] विव्वोकेऽमर्षगर्वयोः[3] ॥ १०७९ ॥

[4]उद्वर्तवर्त्म(उद्वृत्तवर्त्मा) या दृष्टिस्तथो[5]त्कम्पिततारका ।
प्रस्फुरत्फुल्लमध्या च त्रस्ता त्रासे प्रयुज्यते ॥ १०८० ॥

दृष्टिर्विकसित[6]प्रान्ता क्षमान्ता घूर्णतारका[7] ।
तथा विकासितापा[8]ङ्गा मदिरा तरुणे मदे[9] ॥ १०८१ ॥

[10]चलत्तारापुटा किञ्चिदनवस्थितिदर्शना ।
इयं मध्यमदे योज्या मदिरा दृष्टिकोविदैः ॥ १०८२ ॥

कदाचिदनिमेषा या कदाचिच्च निमेषिणी ।
अधोनिरीक्षणपरा मदिरोक्ताधमे मदे ॥ १०८३ ॥

षड्(ट्)[10]त्रिंश[11]द् दृष्टयः प्रोक्ताः सोपयोगाः[12] सलक्षणाः[13] ।
भूलोकमल्लदेवेन[14] सार्वभौमेन धीमता ॥ १०८४ ॥

नता मन्या विकृष्टा च [15]स्वेच्छसा(सोच्छ्वासा) च विकूणिता ।
खा(स्वा)भाविकी चेति बुधैः [16]षड्विधा नासिका स्मृता ॥१०८५॥

अत्यर्थं[17]संश्लिष्टपुटा नासिका कथिता [18]नता
[19]उच्छेदने रोदने(ऽ)स्या[20] विनियोगः प्रकीर्तितः ॥ १०८६ ॥

ईषल्लग्नपुटा नासा मन्दा च परिकीर्तिता ।
निर्वेदचिन्ताशोकेषु प्रयोक्तव्या मनीषिभिः ॥ १०८७ ॥

[21]अत्यन्तसम्फुल्लपुटा[22] विकृष्टा नासिका मता ।
कोपे हर्षे च कामे च बहलो[23]च्छ्वास इष्यते ॥ १०८८ ॥

---

१. A. त्तारा च उक्ता लोकेषु केकरा । २. D. त् विवोके । ३. D. या । ४. D. उधतामर्ष । ५. D. यो । ६. D. ता क्षामा क्षमांता तद्तारिका । ७. A. ताः । ८. A. पंगा । ९. A. omits the following two slokes । १०. D. ट्वि । ११. A. शां । १२. D. गा । १३. D. णा । १४. A त । १५. A. व साध्वसाव । १६. D. षट्विधा । १७. A. थं । १८. D. मता । १९. A. उच्छिद्यते । २०. D. स्यात् । २१. A. अन्यंत । २२. A. भिकृष्टो नाम नासिका । २३. A. छ्वा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सोच्छ्वासा नाम नासा स्यात्(न्) मनाक्(ग्) वक्त्रितसम्पुटा ।
घ्राणे सुरभिगन्धीनां दीर्घोच्छ्वासे च युज्यते ॥ १०८९ ॥
सङ्कोचितपुटा नासा नाम्ना सा स्याद्विवर्णिता(कूणिता) ।
वेदनायां च हासे च नियोक्तव्या नियोक्तृभिः ॥ १०९० ॥
विकाररहिता घोणा भवेत्स्वाभाविकी समा ।
उक्तादन्यत्र सर्वत्र प्रयोक्तव्या विचक्षणैः ॥ १०९१ ॥
क्षाम उत्फुल्ल पूर्णो च कम्पितः कुञ्चितः समः ।
इति गण्डाः षडुद्दिष्टास्तेषां वक्ष्यामि लक्षणम् ॥ १०९२ ॥
क्षामस्त्ववनतो ज्ञेयो दुःखेषु स नियुज्यते ।
उत्फुल्लः स्यात्वि(द्वि)कसितः प्रहर्षे स तु युज्यते ॥ १०९३ ॥
पूर्णः समुन्नतो ज्ञेय उत्साहे स नियुज्यते ।
स्फुरितः कम्पितो गण्डो रोम हर्षे स युज्यते ॥ १०९४ ॥
सङ्कोचितः कुञ्चितः स्याच्छीतस्पर्शे भये ज्वरे ।
समः स्यात्प्राकृतो गण्ड उक्तादन्यत्र युज्यते ॥ १०९५ ॥
मुकुलः क(कू)णितोद्वृत्तौ रेचितः कम्पितायतौ ।
सन्दष्टश्च विकासी च प्रसारितनिगूहितौ ॥ १०९६ ॥
इत्यष्टा (त्योष्ठो) दशधा प्रोक्तो नामतो लक्ष्म वक्ष्यते ।
विनियोगस्तथा तेषां नाट्याभिनयनं प्रति ॥ १०९७ ॥
निष्क्रान्तौ मिलितौ चोष्ठौ मुकुलौ परिकीर्तितौ ।
फूत्कृते चुम्बने दुःखे विनियोगस्तयोर्मतः ॥ १०९८ ॥

---

१. A. च्छा । २. A. स्यान्मनागुत्फुल्लसंपुटा । घ्राणे सुरभिसं । ३. A. च्छा । ४. A. drops this stanza । ५. D. drops this घोणा । ६. A. भा । ७. D मा । ८. A. ल्लसंपूर्णः । ९. D. ष्ड । १०. A. drops this line । ११. D. यो । १२. A. सं । १३. A. स्फरित । १४. D. गंडे । १५. A. षे । १६. D. स हि युज्यते । A. स योज्यते । १७. A. कुंचित कुंचितः । १८. D स्यात् शी । A. स्याच्छित्र । १९. A. र्श । २०. A. यो । D. वे ज्वरः । २१. A. त्प्र । २२. D. त्र स युज्यते । २३. D. क्क । २४. D. र । २५. A. सदष्टमश्च । D. सदष्ट । २६. D. कासि । २७. D. ष्ट । २८. A.D. क्ता । २९. D. क्ष्यतोपिवा । ३०. D. माधा । ३१. A. ष्कांता । ३२. A. ता । ३३. D. ओ । ३४. D. वक्त्रे । ३५. D. adds the following here नानाभावप्रकारे च तथैव च विलासके । हावभावकलायां च प्रसिद्धसुखगायने ॥ हस्तयोर्लाघवं कुर्याद् येन प्रीणाति भूपतिः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुकुलौ तिर्यगावृत्तौ चूणि(कूणि)तौ गदितौ बुधैः ।
अमर्षे रोदने स्त्रीणां विनियुक्तिस्तयोर्मता ॥ १०९९ ॥

अधरः[२] पीडितो य[३]स्तु नासासंलग्न उद्धतः ।
[४]औष्ठौ[५] यत्र च संलग्नौ सृक्(क्क)देशे[६] प्रसारितौ ॥ ११०० ॥

आयतौ तौ तु विज्ञेयौ विनियोगस्तथा स्मिते ।
अधरो ह(द)श्यते दन्तैः[७] सन्द[८]ष्टः स[९]प्रकीर्तितः ॥ ११०१ ॥

तस्याभिनयमिच्छन्ति कोपे मन्मथवे(चे)ष्टिते ।
उर्ध्वपङ्क्तिस्थदन्तानां विकासी[१०] दर्शनाद्[११] भवेत् ॥ ११०२ ॥

[१२]प्रियसन्दर्शने हासे प्रयोग[१३]स्तस्य वर्ण्य[१४]ते ।
अधरोष्ठौ[१५] विनि[१६]ष्क्रान्तः प्रसारित उदाहृतः ॥ ११०३ ॥

रतौ रागवि[१७]लेपे च वदनं क्षतवीक्षणे[१८] ।
आकृष्टौ [१९]द्वावपि मुखे कथितौ तौ निगूहितौ ॥ ११०४ ॥

शोके[२०] दुःखे च कर्तव्यौ[२१] प्रयोगनिपुणैरिमौ ।
इत्यष्टौ[२२] च(त्योष्टौ) दशधा प्रोक्तौ[२३] नामलक्ष्मप्रयोगतः ॥११०५॥

भूलोकमल्लदेवेन निर्जितारातिभूभुजा ।
व्या[२४]दीर्घा शिथिला वक्त्रा नानाभावसमन्विता ॥ ११०६ ॥

प्रचला[२५] प्रस्फुरा चैव[२६] लोला चेत्यष्टधा हनुः ।
व्यादी[२७]र्घाभ्य(त्य)र्थविवृता [२८]जृम्भायां भाषणे वमौ ॥ ११०७ ॥

स्थूलवस्तुनिरासे[२९] च हनुस्तज्ञैः प्रयुज्यते ।
एकाङ्गुलमधःस्रस्ता शिथिला हनुरुच्यते ॥ ११०८ ॥

निद्रायां भोजने श्रान्ते युज्यतेऽद्भुतदर्शने ।
हनुस्तिर्यग्गता वक्त्रा ग्रहावेशे[३०]ऽर्दिते(ता)भवेत् ॥ ११०९ ॥

---

१. A. य । २. A. रोत्पा । ३. A. या । ४. D. ओ । ५. A. drops this stanza । ६. D. शं च प्रसारितौ । ७. D. दंते । ८. D. संदष्टः । ९. D. परिकीर्तितः । १०. D. शं । ११. D. त् । १२. D. विप्र । १३. D. युक्त । १४. A. र्ण । १५. A. ष्ट । D. ष्ठौ । १६ D. निः । १७. D. लये । १८ D. णैः । १९. A. द्ववपिकथितौ । २०. A. क । २१. D. व्यः । २२. D. ष्टा । २३. D. क्ता । २४. A. drops this line । २५. A. ल । २६. A. चेवं । २७. A. र्णाल्यर्थ । २८. A. जंभायां । २९. D. शे । ३०. D. शोदिते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

संहता[1] मिलिता मौने हनुस्तम्भे च [2]युज्यते ।
[3]चलिता [4]लगिता या च[5] हनुः स्याच्चलसंहता ॥ १११० ॥

स्त्रीभोगे[6] कवले योज्या वृद्धताम्बूलचर्वणे ।
मुहुर्विकाससंरोधा[7]त्प्रब(च)ला हनुरीरिता ॥ १११९ ॥

कोपे प्रयुज्यते जल्पे शष्कुल्यादेश्च चर्वणे ।
द्रुतप्रचलिता किञ्चिद्विका[8]सा प्रस्फुरा[9]हनुः ॥ १११२ ॥

शीते शीतज्वरे तस्याः प्रयोगः कथितो बुधैः ।
तिर्यक्प्रचलिता तज्ज्ञैर्लोला नामोच्यते बुधैः ॥ १११३ ॥

[10]रोमन्त्वे(न्थे) कवलावृत्तौ गण्डूषे च प्रयुज्यते ।
[11]मर्दनाः खण्डनाश्चैव कर्त्तना[12] धारणास्तथा ॥ १११४ ॥

निष्कर्षणाश्च विज्ञेया [13]दन्ता(:) पञ्चविधा बुधैः ।
मर्दना[14] दलनाद्दन्ताश्चणकादिषु भक्षणे ॥ १११५ ॥

ताम्बूले ते समायोज्या अपूपादिषु खादने ।
[15]छेदनात्खण्डनाः प्रोक्ता दन्ता योज्या विशारदैः ॥ १११६ ॥

[16]वीटिकाच्छेदने चैव मध्ये[17] चार्द्रकभक्षणे ।
दंष्ट्रानिपीड[18]नाद्दन्ताः कर्त्त[19]नास्तान् नियोजयेत् ॥ १११७ ॥

[20]इक्षुत्वगपसारे च नलकास्थिविचक्षणैः(दारणे) ।
समदन्तक्रियायोगाद(दृद)शनाः स्युर्निकर्षणाः ॥ १११८ ॥

स्वल्पोद्धारे दन्तधावे योज्या मर्कटरोधने ।
ग्रहणाद्वा(द्धा)रणाः प्रोक्ता दन्ता योज्या विशारदैः ॥ १११९ ॥

भयादङ्गुलिदंशे च तृणादीनां च चर्वणे ।
[21]ऋज्वी वक्रा नता लोला प्रोन्नता वे(चे)ति पञ्चधा ॥ ११२० ॥

---

१. D. स्ता । २. A. यो । ३. A. वलिता । D. चलिते । ४. गलिता । ५. A. श्च । ६. A. ग । ७. A धाप्र । ८. A. कोंश । ९. A. रत्तनुः । १०. A. drops this stanza । ११. A. दलना । १२. D. व्या । १३. A. दता । १४. A नाद् । D. लाद । १५. A. छेदनाः प्रोक्ता दंता योज्या विशारदैः । १६. D. व । १७. D. ये । १८. D. डितादंता । १९. A. र्त्तना । D. र्तव्या । २०. A. drops these five lines । २१. A. स ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जिह्वा प्रोक्ता[1] प्रवक्ष्यामि तस्या लक्षम मयो[2]दितम् ।
[3]निष्क्रान्तदीर्घात्स(न्तिदैर्घ्याद्द)ज्वी स्याद् जिह्वा सा च[4] प्रयुज्यते
॥ ११२१ ॥

जिह्वा निर्लेखने ले[5]हे श्वापदश्रमदर्शने ।
सृक्कलेहा[6]भ(दृभ)वेद्रू[7]का जिह्वा तस्याः प्रयोजनम् ॥ ११२२ ॥

क्रोपस्याभिनये चैव तथा [8]मृ(भृ)ष्टस्य भक्षणे ।
नता जिह्वा समाख्याता बुधैश्चिबुकचुम्बिनी[9] ॥ ११२३ ॥

अधर[10] क्षतसंस्पर्शे[11] योज्या [12]न मुखदर्शने ।
अन्तर्भा[13]गे भवेल्लोला जिह्वा[14] सा तु प्रयोज्यते ॥ ११२४ ॥

[15]दोलने बालमश्वस्य जिह्वायाः [16]पतने तथा ।
प्रोन्नता कथिता जिह्वा नासिकाभिमुखी[17] बुधैः ॥ ११२५ ॥

श्रमे शोर्षे[18] भये[19] चैव सा प्रयोज्या प्रयोक्त[20](क्तृ)भिः ।
सहजश्च प्रस[21]न्न(सन्न)श्च रक्तः श्यामस्तथैव च ॥ ११२६ ॥

मुखरागो[22]ऽत्र कथितश्चतुर्थाभिनयं प्रति ।
सहजो निज[23]वर्णः स्यात्प्रसन्नः कान्तिभूषितः ॥ ११२७ ॥

रक्तः कोक्कनदच्छायः श्यामो नी[24]लघनच्छविः ।
सहजो विनियोक्तव्यः स्वभावाभिनयं प्रति ॥ ११२८ ॥

[25]भयानके च बीभत्से रागः श्याममुखो भवे[26]त् ।
शृङ्गारहास्ययोः कार्यः[27] प्रसन्नस्त्वद्भुते तथा ॥ ११२९ ॥

वीरे रौद्रे च करुणे मदादौ रक्त इष्य[28]ते ।
[29]उपाङ्गान्येवमुक्तानि नामलक्षमप्रयोजनैः[30] ॥ ११३० ॥

---

१. D. तु । २. A. यागतम् । ३. D. निशांते दीर्घऋज्वीग्ल्यात् । ४. A. घुपु । ५. D. लो । ६. A. हो । ७. A. वक्राद्वजिव्हा । ८. D. ओष्टस्य । ९. A मी । १०. D. रं । ११. D. र्शे । १२. D. तन्मु । १३. A. भ्रांता । १४. A. व्हारसानुनियु । १५. A. लो । १६. A. पा । १७. A. खै । १८. D. के । १९. A. थे । २०. D. त्कृ । २१. D. शांत । २२. A, गे । २३. A. ज्वर्णस्पा । २४. D. ना । २५. A. drops this line here and takes it after वीरेरौद्रेवकरुणेमदादौरक्त इयानके च । २६. D. gives the line उपांगान्येवमुक्तानि after this line । २७. A. र्यं । २८. A. यानके । २९. D. takes this line two lines above । ३०. D. ने ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]प्रत्यङ्गानि निरूप्यन्ते विस्तरेण मयाऽधुना ।
सरलः प्रोन्नतो न्यञ्चः[2] कुञ्चितो ललितस्तथा ॥ ११३१ ॥

लोलितोच[3]लितो बाहुः परावृत्तस्तथाष्टमः ।
पुरतः पा[4]र्श्वतो वाऽपि सरळः[5](लः) स्यात्प्रसारितः ॥ ११३२ ॥

पक्षानु[6]करणे माने स्पन्दनालिङ्गने भवेत् ।
ऊर्ध्वं[7] च प्रेरितो बाहुः प्रोन्नतः [8]सोङ्गमोट(ट्ट)ने ॥ ११३३ ॥

फलाद्याकर्षणे [9]चोर्ध्वं(र्ध्व) वस्तूनां धारणे भवेत् ।
अधः प्रसारितो [10]न्यञ्चो बाहुः स्याद्भूमिवेधने ॥ ११३४ ॥

[11]श्रमे दुःखे मदे मोहे स्तम्भे च विनियुज्यते ।
[12]कुञ्चितः कम्पितो बाहुर्नामित[13]स्तीक्ष्णकूर्परः[14] ॥ ११३५ ॥

शस्त्रादिधा[15]रणे योज्यो प्रहारे [16]पानयो(भो)जने ।
ईषन्नि[17]म्नस्तु ललितः[18] स स्यान्मालादिधारणे ॥ ११३६ ॥

स्तवने याचने तोय[19]प्लवने च नियुज्यते ।
आन्दोलितो लोलितः स्यात्संयोज्यो बालरोदने ॥ ११३७ ॥

नृत्तवृश्चिकवं(दं)शे च नवनी[20]तावकर्षणे[21] ।
भ्रमितः कूर्परोदेशे [22]चलितः [23]कर इष्यते ॥ ११३८ ॥

[24]खड्गादिभ्रामणे योज्यो[25] वृत्त(न्त)हस्तस्य मोचने ।
पश्चात्सारी[26] परावृत्तो बाणा[27]कर्षणकर्मणि ॥ ११३९ ॥

चूडिकाबन्धने योज्यो [28]वीटिकाग्रहणे तथा ।
आकुञ्चितो निकु[29]म्ब(ञ्च)श्च भ्रमितश्च सम[30]स्तथा ॥ ११४० ॥

---

१. D. त्येकंच । २. D. श्च । ३. A. च । ४. A. र्वं । ५. A. drops this लः । ६. D. त्तु । ७. A. र्ध्वप्रसारितो । ८. A. संग । ९. D. चारु । १०. D. वंधोनामितस्तीक्ष्णकूर्परे । ११. D. drops this stanza । १२. A. कुंचिःत । १३. तःस्तीक्ष्ण । १४. D. रे । १५. D. ह । १६. A. ण । १७. A. न्नम्रःस्तु ! १८. D. तं । १९. D. यं । २०. D. तस्यचर्वं । २१. A. र्ण । २२. A. च्च । २३. D. स्तु तथा परः । २४. A. ष । २५. D. ज्या । २६. D. रि । २७. A. ण । २८. D. वि । २९. D. कुंबि । ३०. D. ग ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुर्धा [1]मणिबन्धोऽथ[2] नामतः कथितो मया ।
[3]आकुचि(कुञ्चि)तो बहिर्वक्रः सोऽपसारे[4] नियुज्यते ॥ ११४१ ॥

[5]भ्रामणे भ्रमण (:) प्रोक्तः खड्गादेश्चारणे भवेत् ।
स्थूलश्चेत्सम(त्स समः) प्रोक्तो योज्यः पुस्तकधारणे ॥ ११४२ ॥

[6]बाहुश्च मणिबन्धश्च[7] प्रोक्तो लक्षणसंयुतः ।
असं[8]हतान्संहतांश्च नृत्तहस्तान्वदाम्यहम् ॥ ११४३ ॥

पता[9]का हंसपक्ष[10]श्च चतुरोऽहिफण[11]स्तथा ।
अर्धचन्द्रो मृगशिरास्त्रिपताकस्त[12]थैव च ॥ ११४४ ॥

कर्तरीमुखनामा च[13] पद्मकोशो[14] ह्यरालकः ।
शुकतुण्डकला[15](का)ङ्कूला(लौ)[16] लग्न(चाल)पद्मोर्णनाभकैः
(कौ) ॥ ११४५ ॥

मुकुलो हंस[17]चक्रश्च भ्रमरः स्यात्करोऽपरः ।
[18]सन्दंशस्ताम्रचूडश्च मुष्टि[19]ः शिखर एव च ॥ ११४६ ॥

कपित्थः[20] खटिकाचक्रः सूचीमुखसमाह्वयः ।
असंहताः[21] कराः प्रोक्ता[22]श्चतु[23]र्विंशतिसङ्ख्यया ॥ ११४७ ॥

अञ्जलिश्च कपोत[24]श्च कर्कटस्वस्तिकाव[25]पि ।
खटकावर्धमानश्च उत्सङ्गो नि[26]षधस्तथा ॥ ११४८ ॥

दो[27]ल(:) पुष्पपुटश्चैव तथा मकर एव च ।
गजदन्तावहित्थश्च (त्थौ च) वर्धमानस्तथैव च ॥ ११४९ ॥

इत्येते संहता हस्ता मया प्रोक्तास्त्रयोदश[28] ।
नृत्त[29]हस्तान् प्रवक्ष्यामि नामतः सप्तविंशतिः ॥ ११५० ॥

---

१. A. ब । २. D. त्था । ३. D. आकृतो वहिवक्रश्च । ४. D. रौर्नि । ५. A. drpos this and up to श्वेत् समः प्रोक्तो of the next line । ६. D. बहु । ७. A. श्चं । ८. D. संगतान् संगतांश्च । ९. D. त । १०. A. क्षं । ११. A. णा । १२. A. का । १३. A. य । १४. D. सो । १५. A. लांगुल्यः । १६. A. बलपद्मोर्णनाभके । १७. D. व । १८. D. सदंश । १९. A. ष्टि । २०. D. त्थकटिका । २१. A. स्तः । २२. A. क्ताः च । २३. D. र्वि । २४. A. ति । २५. D. अ । २६. D. नै । २७. D. दा । २८. A. शां । २९. A. त्य ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुरस्रौ[1] तथोद्वृत्तो (त्तौ) तथा तलमुखौ स्मृतौ ।
स्वस्तिकौ विप्रकीर्णौ[3] वाप्यरालखटकामुखौ[4] ॥ ११५१ ॥
आविद्धवक्त्रौ (क्त्रौ) सूच्यास्यौ रेचितावर्धरेचितौ[5] ।
उत्तानना(न)वञ्चितौ[6] वापि पल्लवौ[7] च तथा करौ[8] ॥ ११५२ ॥
नितम्बौ[9] चापि विज्ञेयौ केशबन्धौ लताभिधौ ।
करिहस्तौ च विख्यातौ पक्षवञ्चितकौ[10] करौ ॥ ११५३ ॥
पक्ष[11]प्रद्योतक[12]श्चै(कौ चै)व तथा गरुडपक्षकौ ।
दण्डपक्षौ समाख्यातौ[13] ऊ(तावू)र्ध्वमण्डलिनौ तथा ॥ ११५४ ॥
पार्श्वमण्डलिनौ वापि वक्षोमण्डलिनौ तथा ।
तथा[14] करौ परौ प्रोक्तावुरःपार्श्वोर्द्वमण्डलौ[15] ॥ ११५५ ॥
स्वस्तिकौ [16]चापि नलिनीस[17]दृशौ पद्मकोशकौ ।
अल्ल[18]पल्लवधुन्वानौ नृत्तहस्ता इति स्मृताः ॥ ११५६ ॥
अं[19]संहता युग्महस्ता नृत्तहस्ता[20] त(स्त)थैव च ।
चतुःषष्टिकराः[21] प्रोक्ता नाट्यस्याभिनयं प्रति ॥ ११५७ ॥
संहता[22] ऋजवोऽङ्गुल्यस्तर्जनीमूलसंस्थितिः ।
अङ्गुष्टो[23] यस्य न(च) ग्राह्यः[24] स पताकः करो मतः ॥ ११५८ ॥
छे[25]दाभिनयने गर्वे भुजास्फाले प्रहर्षणे ।
लताभिघाते कर्तव्यः पताकः संहताङ्गुलिः ॥ ११५९ ॥
केशानां [26]विचये चैव नोदने वह्निपा[27]तने ।
क्रि[28]यतेऽभयदाने च पताको विरलाङ्गुलिः ॥ ११६० ॥
[29]तडि(कटि)कम्पे निषेधे च स्यादूर्ध चल (र्ध्वश्चलि) ताङ्गुलि(ः)
वृषे (वर्षे) च पुष्पवृत्तौ (ष्टौ) च कर्तव्योऽसावधोमुखः ॥११६१॥

---

१. A. स्रो । २. A. तो हस्तो । ३. D. क । ४. A. च प । ५. A. त्तना । ६. A. नौ । ७. A. वे । ८. A. रे । ९. A. तंबे । १०. A. को वरौ । ११. A. प्रा D. प । १२. A. कोवे- तथा गरुड । १३. A. तैधूर्तं । १४. A. पारौ करौ । १५. A. र्ध्व । १६. D. वा । १७. D. कथितौ । १८. D. लप्रत्वल । १९. A. स । २०. A. स्तथैवर्त च । २१. A. रा । २२. A. तात्सजवोगुल्यस्त D. ताऋजवाग्वल्य तर्ज । २३. A. ष्टो । २४. A. ह्यं । २५. A. दन्निन्न । २६. A. निचयो । २७. A. तापने । २८. D. याकर्तामिदाने । २९. D. drops this line ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पताकस्यैव हस्तस्य यदोर्ध्वा स्यात्कनीयसी ।
हंसपक्षस्तदाख्यातः प्रयोगस्तस्य कथ्यते ॥ ११६२ ॥
मुखरागविलेपे च कुन्तला(ल)स्योर्ध्वसंयमे ।
प्रतिग्रहादौ कर्तव्यो हंसपक्षो मनीषिभिः ॥ ११६३ ॥
अस्यैव हंसपक्षस्य मध्यमाङ्गुलिमूलगः ।
अङ्गुष्ठश्चेत्कुञ्चितः स्यात्तदाऽसौ चतुरः करः ॥ ११६४ ॥
श्रोत्रियाभिनये स्वल्पे सन्देहे वेदभाषणे ।
हस्तोऽयं विनियोक्तव्यश्चतुरश्चतु रैर्जनैः ॥ ११६५ ॥
पताकस्तु यदा हस्तो भवेन्निम्नतलोदरः ।
विज्ञेयोऽहिफणा(णो) नाम कर्म चास्य प्रचक्ष्यते ॥ ११६६ ॥
सेचने जलपा(दा)ने च प्रोक्ता नो(नः) पावनो भवेत् ।
अधोमुखः स्यादास्फाले कुञ्जादीनां प्रदर्शने ॥ ११६७ ॥
अभये सान्त्वने चैव सर्पयानप्रदर्शने ।
ऊर्ध्वश्चाहिफणः कार्यो हस्तलक्षणकोविदैः ॥ ११६८ ॥
अहिवक्त्रे यदाङ्गुष्ठो विवृतः स्यात्तदा भवेत् ।
अर्धचन्द्राभिधो हस्तो तन्नियोगे(गो) निगद्यते ॥ ११६९ ॥
सम्मार्जने लोडने च नितम्बालम्बने तथा ।
अधोमुखस्तु कर्तव्यः शशिलेखाकरो बुधैः ॥ ११७० ॥
विस्मये वर्णने चैव चन्द्राभिनयसूचने ।
अयमुत्तानितः कार्य ऊर्ध्वश्चासोर्ध्वसंज्ञिकः
(ऊर्ध्वश्चेदूर्ध्वसंज्ञकः) ॥ ११७१ ॥
सर्पशीर्षस्य हस्तस्य कनिष्ठाङ्गुष्ठकं तथा ।
भवेदुन्नतसंस्थानं तदा मृगशिराः करः ॥ ११७२ ॥

---

१. A. व । २. A. लो । ३. D. स्यार्ध । ४. A. ह । ५. A. व्यौ । ६. A. सक्षौमं मनिषिभिः । ७. A. यः । ८. A. ष्टाः कुंचितश्चेत्स्यात्तदासौ । ९. A. व्यश्चतुरैजनैः । १०. D. ला । ११. A. का । १२. D. वाहस्ते । १३. A. णे । १४. A. पवक्ष्यते D. प्रचक्षते । १५. D. सवने । १६. A. क्तोमोयार्चनो । १७. D. उर्द्ध । १८. A. च । १९. A. न्न । २०. D. ट । २१. D. सलिलेभ्या । २२. A. रे । २३. A. चितो । २४. D. कं कार्यम् । २५. A. स्यो D. सोर्द्ध । २६. A. भा । २७. A. रः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वेदाप[1]नयना[2]ह्वाने सम्मुखातपवीक्षणे ।
अधोमुख(मृग)शिराः कार्य उत्तानस्त[3]प(स्त्व)क्षपातने ॥ ११७३ ॥
पादालक्तकर[4]जने(रागेण)लेख[5]ने स्यादधोमुखः ।
अङ्गुष्ठे[6]न सहाङ्गुल्यो विरला[7]कुञ्चितग्रहाः ॥ ११७४ ॥
[8]पद्मकोशः स विज्ञेय उन्मुखे(खो)ऽधोमुखोऽपि वा ।
कपित्थबिल्वग्रहणे बालानां हस्तदर्शने ॥ ११७५ ॥
मुखम्लानौ च योक्तव्यः पद्मकोशः[9] करो बुधैः ।
[10]पद्मकोशस्य हस्तस्य तर्जनी प्रसृता यदि ॥ ११७६ ॥
अरालो नाम हस्तोऽयं तदा ज्ञेयो मनीषिभिः ।
आशीर्वादे वर्णने च [11]छत्राङ्कुशविधारणे ॥ ११७७ ॥
अद्भुतालोकने[12] वायमरालः परिकल्प्यते ।
अना[13]मा च यदा वक्रा स्यादरालकरे [14]तदा ॥ ११७८ ॥
शुकतुण्डो भवेद्धस्तः क्रिया तस्य प्रवक्ष्य[15]ते ।
नास्तीति वचने द्यूते[16] कपर्दकनिपातने ॥ ११७९ ॥
अव[17]ज्ञायां तिरस्कारे शुकतु[18]ण्डो विधीयते ।
अङ्गुष्ठतर्जनीमध्या [19]भिन्नास्ते[20] तमवस्तिता (त्रेतामव
स्थिताः) ११८० ॥
वक्रानामा च ला(का)ङ्गूले योज्या चो[21]र्ध्वा कनीयसी ।
[22]फलप्रमाणे च तथा तथान्येषु लघुष्वपि ॥ ११८१ ॥
ला(का)ङ्गूलो[23] योज्यते हस्तो बालानां चिबुकग्रहे ।
पार्श्वागता विकीर्णाश्च[24] तलमध्यमुपागताः[25] ॥ ११८२ ॥
आवृ[26]त्तमध्याङ्गुलयस्तदा स्यादलपद्मकः ।
आत्मस्तुतौ निषेधे च [27]कस्य त्वमिति भाषणे ॥ ११८३ ॥

---

१. A. य । २. D. दा । ३. D. स्वक्ष । ४. A. चरने । ५. D. खान । ६. A. ष्टे । ७. A. लानांहस्तदर्शने । ८. A. drops these two lines । ९. A. श । १०. A. drops these two lines । ११. D. वंशांकुशव । १२. D. च्छाया । १३. D. निमाम । A. नामाव । १४. A. य । १५. A.D. क्ष । १६. A. तकपर्दक पर्दकनिपातने । १७. A. वि । १८. A. र्त्तुडो । १९. A. द्धि । २०. D. तमिवस्थिता । २१. A. चोध्वा । D. वर्धा । २२. फलप्रमाणे तथान्येषु..धुष्वपि । २३. D. ले । २४. D. चअंतर्म । २५. D. ता । २६. D. आवर्त । २७. D. कश्मलस्यच ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शून्योक्तौ तु[1] नियोज्यः स्यादलपद्मो मनीषीभि ।
पद्मकोशस्य [2]हस्तस्य यदाङ्गुल्यः प्रकुञ्चिताः ॥ ११८४ ॥

अङ्गुष्ठ[3]स्य(श्च) तदा तज्ज्ञैरू[4]र्णनाभः करः स्मृतः ।
[5]आदाने च सुवर्णादेः सिंहव्याघ्रनिरूपणे ॥ ११८५ ॥

शिरःकण्डूयने चैवमु(मू)र्णनाभः प्रकीर्तितः ।
अङ्गुष्ठ[6]स्य यदाङ्गुल्यश्चाग्रभागेन सङ्गताः ॥ ११८६ ॥

कदलीपुष्पसङ्काशा[7]स्तदासौ मुकुलः करः ।
सुवर्णगणने तिर्यगूर्ध्वो मुकुलदर्शने ॥ ११८७ ॥

देवपूजोपहारे च योज्योऽधो मुकु[8]लः करः ।
मुकुलं(ले)तु यदा मुक्तो(क्ता) भवेदूर्ध्वा कनीयसी ॥ ११८८ ॥

अनामा च तथा वक्रा हस्तो[9] हंसमुखस्तदा ।
श्लक्ष्णाल्पमृदुसंज्ञायां [10]प्रस्फुरः क्रियते बुधैः ॥ ११८९ ॥

पुष्पाघा[11]णे स्थिरः स स्या[12]द्वंश(द्वंस)वक्त्राभिधः करः ।
मुकुलस्य यदानामा कनिष्ठा च प्रसारिता ॥ ११९० ॥

ऊर्ध्वा प्रदेशिनी वक्रा तदाऽसौ भ्रमरः करः ।
[13](ग्रहणे दीर्घनालानां पुष्पाणामयमिष्यते ॥ ११९१ ॥

कर्णपूरे तालपत्रे कण्टकोद्धरणादिषु) ।
अरालाङ्गुष्ठतर्जन्यौ लग्नाग्रे निम्नतां गतः ॥ ११९२ ॥

किञ्चिच्चेत्तलमध्यः स्यात्तदा सन्दंश उच्यते ।
स त्रेधा स्यादग्रजश्च मुखजः पार्श्वजः क्रमात् ॥ ११९३ ॥

प्राङ्मुखः सम्मुखः पार्श्वमुख इत्यस्य लक्षणम् ।
कण्टकोद्धरणे सूक्ष्मकुसुमावचयादिषु ॥ ११९४ ॥

---

१. D. नु । २. A. drops this हस्तस्य । ३. A. ष्ट । ४. A. सूर्णा । ५. A. drops this stanza । ६. A. ष्टोन । ७. A. श । ८. A. क । ९. D. स्ते । १०. D. सस्फर । ११. D. ग्रेण स्थितः । १२. A. द्वंसः स्यार्द्धसवक्राभिधः करः । १३. Taken from संगीत रत्नाकर as the portion is missing here.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रयोक्तव्योऽग्रसन्दंशो धिगित्युक्तौ तु रोषतः, ।
मृजायां यज्ञसूत्रस्य कर्पूराद्यवचूर्णने ॥ ११९५ ॥

[1]वीटिकाग्रहणे योज्यः[2] पार्श्वसन्दंश[3]कः करः ।
अलङ्ख्ये (आलेख्ये) भूविनिर्माण(णे) मणौ गुणनिवेशने ॥ ११९६ ॥

रञ्जने नें[4]त्रयोर्वर्त्या मुखसन्दंशकः करः ।
मुकु[5]लस्य यदा चोर्ध्वा कुञ्चिताग्रा प्रदेशिनी ॥ ११९७ ॥

तलेऽनामा कनिष्ठा[6] च ताम्रचूडः करो भवेत् ।
[7]बालविश्वासने शैघ्ये छोटिकाकरणे रणे ॥ ११९८ ॥

जृम्भणे च तथा राज्ञां ता(म्र) चूड (:) करो भवेत् ।
तलमध्यस्थिताः सर्वास्त्वङ्गुल्योऽङ्गुष्टपीडिताः ॥ ११९९ ॥

अङ्गुल्योङ्गुष्ठ[8]गर्भा वा हस्तोऽसौ मुष्टिरिष्यते ।
[9]धावने च प्रहारे च खड्गचापविधारणे ॥ १२०० ॥

अङ्गुष्ठपीडितो मुष्टिः कर्तव्यो नाट्यवेदिभिः ।
दोहने मल्लयुद्धे च पार्श्वभागप्रताडने ॥ १२०१ ॥

मुष्टिरङ्गुष्ठगर्भः स्याद् द्विधैवं मुष्टिरीरिता ।
मुष्टिहस्ते यदाङ्गुष्ठ[10] [11]ऊर्ध्वश्च रु(ऋ)जुतां गतः ॥ १२०२ ॥

शिखरो नाम हस्तोऽयं तस्य वक्ष्मि प्रयोजनम् ।
[12]घटा(ण्टा)नादेऽङ्गसंवाहे शक्तितोमरमोक्षणे ॥ १२०३ ॥

रश्मिवल्गाविदा(धा)रे च प्रयोज्यः शिखरः करः ।
शिखराख्य[13]स्य हस्तस्य तर्जन्यङ्गुष्ठ[14]पीडिता ॥ १२०४ ॥

बहिर्गता च वक्रा च कपित्थाख्य[15]स्तदा करः ।
घटते चि (चे)तिवाक्ये च तथा चक्रस्य मोक्षणे ॥ १२०५ ॥

---

१. D. वेष्टिका । २. D. ज्या । ३. A. श. करः । ४. A. नर्ध्वो । ५. A. कलस्ययदावो । ६. A. ष्ठा । ७. D. drops this stanga । ८. A. ष्ठ । ९. D. वने चैव । १०. A. ष्ठ । D. ष्ठं । ११. A. ऊर्ध्वश्चजु D. उर्ध्वश्चरु । १२. A. घंडावादें । १३. A. क्ष । १४. A. ष्ठा । १५. A. ख्यं करं न्यसेत् and drops the following two lines ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अस्त्रमुद्राप्रयोगे च कपित्थाख्यं करं न्यसेत् ॥ ।
अनामा[1] च कनिष्ठा च वक्रा[2]चोत्क्षेपसंयुता ॥ १२०६ ॥

अस्यैव [3]तु कपित्थस्य तदाऽसौ खटि[4]कामुखः ।
छत्रचामरकुन्तानां धारणे दर्पणस्य च ॥ १२०७ ॥

केशपाशग्र[5]हे चैव योज्यते खटिकामुखः ।
मुष्टिहस्ते यदा चैका तर्जनी[6] निर्गता भवेत् ॥ १२०८ ॥

तदा सूचीमुखो हस्तो वक्रक[7]म्प(म्प्र)प्रसारितः ।
प्रयोगे व(श)स्त्र[8]वस्तूनां रोद[9](ध)ने वक्र इष्यते ॥ १२०९ ॥

सूच[10]ने तर्जने कार्यः[11] सूचिहस्तः प्रसारितः ।
कर्णकण्डूयने चैव [12]चक्रस्य भ्रामणे तथा ॥ १२१० ॥

साधुवादे च[13] झम्पायां [14]कम्रः(म्प्रः) सूचीमुखः करः ।
अङ्गुष्टः करशाखाश्च करभाङ्गुष्ट[15]मूलके ॥ १२११ ॥

संश्लिष्य यदि तिष्ठ[16]न्ति सर्पशीर्षकरद्वये ।
तदासावञ्जलिर्नाम करः[17] प्रोक्तो मनीषिभिः ॥ १२१२ ॥

देवतानां गुरूणां च प्रणामे विनियुज्यते ।
[18]पताकौ तु यदा हस्तौ सन्मुखौ तलसङ्गतौ ॥ १२१३ ॥

अङ्गुल्यस्तु[19] तदा लग्नाः[20] स कपोतः[21] करः[22] स्मृतः ।
[23]स्वामिविज्ञापने(ना)शीलो(ले) विनये विनियुज्यते ॥ १२१४ ॥

[24]हर्षणे [25]कु(वृ)द्ध्वाक्येषु ख(खि)दिराङ्गुलिमोक्षणे[26](ट्टने) ।
अङ्गुल्यः स्थ(ल्यस्त)लमध्ये वा [27]बहिर्वान्तरमिश्रिताः ॥ १२१५ ॥

कर्कटाख्यः स विज्ञेयश्चि[28]न्तायामन्तराङ्गुलिः ।
निद्रापगमजृम्भायां वाद्यशङ्खविधारणे ॥ १२१६ ॥

---

१. A.मिका । २. D. कत्रा क्षेधो । ३. A. च । ४. A. ट । ५. A. गृ । ६. A. नीर्ग । ७. A. कंपः । ८. A. सु । ९. A. ड । १०. A. चि ते । ११ D. र्यें । १२. A. वस्यभ्रा । १३. A. वसंपा । १४. D. कपः । १५. A. ष्ट । १६. A. ष्ट । १७. A. र । १८. D. तारकौ । १९. D. श्च । २०. A. ग्नाज्ञाः । २१. D. त । २२. A. रस्मृता । २३. A. पतेभित्तौ विनये विनियुज्यते । २४. A. घ । २५. A. कु । २६ A. णात् अंगुल्यस्थ । २७. A. व । २८. A. श्चितामतरांगुलिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आश्चर्ये[1] च नियोक्तव्यः कर्कटो बहिरङ्गुलि[2] (:)।
मणिबन्धे समाश्लिष्टावरालावू[3]र्ध्वतोमुखौ ॥ १२१७ ॥

हस्तः स्वस्तिकनामा स्याद्विनियोगोऽस्य वक्ष्यते ।
[4]स्वरादि[5]त्सो (सू)चनं व्योम तुङ्गं वि[6]स्तारि वस्तु [7]यत् ॥ १२१८॥

स्वस्तिकस्य तु विश्लेषात्त[8]त्सर्वमभिधीयते ।
खटकावदनौ[9] पाणी [10]सम्मुखौ चेत्परस्परम् ॥ १२१९ ॥

तदासौ कविभिः[11]प्रोक्तः खटकावर्धमानकः ।
नेपथ्यरचनायां तु[12] पुष्पाणां[13] ग्रथनेऽपि च ॥ १२२० ॥

सत्यवाक्ये प्रयोज्योऽसौ खटकावर्धमानकः ।
सर्पशीर्षौ[14] यदा हस्तौ[15] स्वस्तिकाकारसंस्थितौ ॥ १२२१ ॥

परिवृत्त[16]भुजे सक्तावु[17]त्सङ्गः स्यात्तदा करः ।
परिष्व[18]ङ्गे च कोपे च शी[19]ताभिनयनेऽपि च ॥ १२२२ ॥

व्रीडायां च तथा स्त्रीणा[20]मुत्स[21]ङ्गो विनियुज्यते ।
कपित्थेन यदा हस्तो[22](च हस्तेन) वेष्ट्यते मुकुलः करः ॥ १२२३॥

विज्ञेयो निष[23]धो नाम हस्तलक्षणपारगैः ।
सङ्ग्रहे च परिच्छेदे समये सत्यभाषणे ॥ १२२४ ॥

निष्पी[24]डिते नियोक्तव्यो[25] निष[26]धो ना[27]ट्यवेदिभिः ।
सरलौ[28] शिथिलांसौ च[29] पताकौ[30] लम्बितौ करौ ॥ १२२५ ॥

भवेतां यत्र विज्ञेयः स करो दो[31]र्लसंज्ञकः[32] ।
श्रमो वि[33]षादोमूर्च्छा[34] च म[35]दो दुःखं भयं तथा ॥ १२२६ ॥

---

१. A. यैं। २ D. ली। ३. A. ऊ D. कृद्ध। ४. D. ख। ५. D. दि शो। ६. A. सा। ७. A. यत् स्वरादित्सोचनं व्योम त्रुंग विसारिवस्तुयत्। ८. A. त त्स D. त्सर्वंतदा। ९. D. नो। १०. A.D. समु। ११. A. भि। १२. D. च। १३. D. णाग्रं। १४. D. र्षों। १५. D. स्तो। १६. A. ल्य D. त्तानुजेशक्ता। १७. A. बुत्संग स्यात्। १८. A. ष्वंगें। १९. D. सि। २०. A. वीडायां णा उ D. णां उ। २१. D. त्संगे युज्यते सदा। २२. A. स्तौ। २३. A. षि। २४. A. प्पी। २५. A. व्यौ। २६. A. षे। २७. A. म। २८. D. लः। २९. A. व। ३० A. का। ३१. A. द ल। ३२. A. क। ३३. D. श्वासदोर्मू। ३४. A.D. छा। ३५. D. मंदो।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]एवमादिषु योक्तव्यः करो दोलाभिदो बुधैः ।
सर्पशीर्षौ[2] यदा हस्तौ[3] कनिष्ठा[4]पार्श्वसङ्गतौ ॥ १२२७ ॥

तदा पुष्प[5]वटो नाम करः प्रोक्तो विचक्षणैः ।
पुष्पधान्यजलादीना[6]मादाने याचनेऽपि च ॥ १२२८ ॥

देवतातर्पणे चैव योज्यः[7] पुष्पवटः करः ।
मणिबन्धाग्रसंलग्नौ पताकौ भिन्नसम्मुखौ ॥ १२२९ ॥

स करो मकरो नाम रणे स्त्रीणां(?) [8]प्रयोजयेत् ।
स एव मकरो हस्तः प्रोन्नतो विरला[9]ङ्गुलिः ॥ १२३० ॥

व्याकोशपद्माभिनये विन(नि)यो[10]गार्हतां व्रजेत् ।
स एव मकरो हस्तो विश्लिष्टस्तिर्यगास्थितः ॥ १२३१ ॥

शिशुप्रणामाभिनये योज्यः[11] [12]खर्वे च वस्तुनि ।
[13]पार्श्वभागे च संलग्नौ समाकुञ्चितकूर्परौ ॥ १२३२ ॥

सर्पशीर्षौ[14] करौ यस्य स भवे[15]द्गजदन्तकः ।
[16]यानावतरणे स्त्रीणां शिशूनां ग्रहणे तथा ॥ १२३३ ॥

शिलो[17]त्पाटे च कर्त[18]व्यः करोऽयं गजदन्तकः ।
शुकतुण्डौ यदा हस्तौ वक्षस्याभिमुखस्थितौ ॥ १२३४ ॥

शनैरधोमुखं[19] नीतावबहित्थ[20]स्तदा करः ।
[21]तनोस्तनुत्वे रामायां सोत्कण्ठस्य निरूपणे ॥ १२३५ ॥

अवहित्थो नियोक्तव्यः करः करणकोविदैः ।
मृगशीर्षौ[22] परा (ग्) व[23]क्त्रो(क्त्रौ)वर्धमानो निगद्यते ॥ १२३६ ॥

[24]द्वारवातायनादीनामुद्घाटे विनियुज्यते ।
युग्महस्ता मया प्रोक्ता नामलक्ष्मप्रयोगतः[25] ॥ १२३७ ॥

---

१. A. प । २. D. र्षौ । ३. D, रतः । ४. A. ष्टा । ५. D. चयो । ६. D. नां आ । ७. A. ल्पः । ८. A. वियोजितः । ९. A जांगुलि । १०. D. ये गर्हतां व्रजेत् । ११. D. ज्याः । १२. D. सर्वे च । १३. A. प । १४. D. र्षः करो । १५. A. व D. वेत् ग । १६. A. यो । १७. A. जोत्पादे । १८. A. र्त्त । १९. A. रवीनीना । २०. A. छ्रः स्त । D. त्छ । २१. A. नास्तनुचेदद्दारे । २२. D. र्षौ । २३. A. द्रो । २४. A. द्वौरवातनयाहीना । २५. A. drops this तः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नृत्त[1]हस्तान् प्रवक्ष्यामि यथावदनुपूर्वशः ।
[2]अष्टाङ्गुलान्तरौ[3] यौ तु वक्षसः खटकामुखौ ॥ १२३८ ॥

स[4]मांसकूर्परौ हस्तौ चतुरस्रौ [5]पराङ्मुखौ ।
हंसपक्षौ यदा हस्तौ [6]व्यावृत्तौ तालवृन्तवान्(वत्) ॥ १२३९ ॥

[7]उद्वृत्ताविति विज्ञेयौ वक्षसः पुरतः स्थितौ ।
उरसः पुरतो हस्तौ तिर्यगुत्ता[8]नसम्मुखौ ॥ १२४० ॥

हंसपक्षा[9]वधो वक्त्रौ [10]ज्ञेयौ तलमुखाविति ।
मणिबन्धे च संश्लिष्टौ हंसपक्षौ [11]यदा करौ ॥ १२४१ ॥

उदग्रौ[12]नीचवक्त्रौ[13] वा स्वस्तिकावि[14]ति संज्ञितौ[15] ।
स्तनाभ्यां पुरतो न्यस्तौ हंसपक्षौ पराङ्मुखौ ॥ १२४२ ॥

(नीचाग्रावुन्नताग्रौ वा विप्रकीर्णाविति स्मृतौ) ।
उरसः पुरतो न्यस्तः[16] खटकास्य[17](:) पराङ्मुखः ॥ १२४३ ॥

किञ्चित्प्रसारितस्तिर्यगरालः प्रोन्नताननः ।
सं(स्व)स्थानप्रत्ययै[18]नैतौ प्रयोज्यौ तालमानतः ॥ १२४४ ॥

वामदक्षिणतः स्यातामरालखटकामुखौ ।
[19]स्वस्थाने वा स्थितावेतौ [20]व्यत्ययेन प्रयोजितौ ॥ १२४५ ॥

तथापि नामतो ज्ञेया[21]वरालखटकामुखौ ।
कूर्परा[22]साश्रवा(ग्रवा)हा[23]भिररालौ चलितौ यदि[24] ॥ १२४६ ॥

अधोमुखं च विन्यस्तौ स्यातामाविद्धवक्त्र(क्त्र)कौ ।
चतुरावेव हस्तौ तु यदा [25]तिर्यक् प्रसारितौ ॥ १२४७ ॥

---

१. D. त्य । २. D. takes this stanza after this । ३. A. रौतुव । ४. D. पां । ५. A. drops this पराङ्मुखौ । ६. A- व्यावृत्तवान् । ७. A. उद्वर्ताविति । ८. A. ता । ९. A क्षवक्त्रौ । १०. A. जे । ११. A. व्य । १२. A. ग्रो । १३. A. वक्त्रो । १४. A. चि । १५. A. तो । १६. D. स्तौ । १७. A.D. स्प । १८. A. योनतो । १९. A. स्वं । २०. A. विन । २१. D. यौ अ । २२. A. रशाश्र । २३. A. हापभि । २४. A. दा । २५. A. नि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]सूच्यास्याविति विज्ञेयौ किञ्चित्कुञ्चित[2]कूर्परौ ।
हंसपक्षौ यदा हस्तौ [3]द्रुताव[4]र्तस[5]मन्वितौ ॥ १२४८ ॥

रेचिताविति विख्यातौ पार्श्व[6]भागप्रसारितौ ।
एक[7]तो[8] रेचितस्त्वेवं[9] चतु[10]रस्रोऽन्यतः स्थितः ॥ १२४९ ॥

खट[11]काख्यौ[12] यदा वृत्तौ[13] भवेतामर्धरेचितौ ।
[14]न्यञ्चितौ कूर्परांसौ तु [15]तिर्यग्भागविनि:[16]सृतौ ॥ १२५० ॥

नृ(त्रि)पताकौ करौ नृत्ये स्यातामुत्तानवञ्चितौ ।
तिर्यग्वा [17]पुरतो वापि प्रोन्नतौ[18] नमि[19]तावपि ॥ १२५१ ॥

शिथिलौ मणिबन्धे[20] तु पद्मकोशे(शौ) तु पल्लवौ ।
बाहुशीर्षाद्विनि[21]ष्क्रान्तौ हस्तकौ ध्वनि(कटि)रेचितौ ॥ १२५२ ॥

नि[22]तम्बा[23]वधि(विति) [24]विख्यातौ त्रिपताकौ करौ तु वै ।
[25]त्रिपताकौ यदा हस्तौ केशपार्श्वाद्विनिःसृतौ ॥ १२५३ ॥

तत्पार्श्वभ्रमणान्नीतौ केशबन्धाविति स्मृतौ ।
त्रिपताकौ यदा हस्तौ पार्श्वभागप्रसारितौ ॥ १२५४ ॥

[26]तत्रैव रेचितौ भूयात्स्या(यः स्या)तां हस्तौ लताभिधौ ।
त्रिपताको यदा हस्तः कर्णाभ्यर्णमुपागतः ॥ १२५५ ॥

(उन्नतः कुञ्चितो हस्तो रेचितः करिहस्तकः ॥)
त्रिपताकौ यदा हस्ता[27]वुत्तानौ कटिशीर्षकौ (के)
पक्षप्रद्योतकौ ज्ञेयौ हस्तलक्षणवेदिभिः ॥ १२५६ ॥

[28]उन्नतौ(तः) क्वेंचि कुं(कुञ्चि)तौ(तो) हस्तौ(स्तो) रेचितौ(तः)
कर(रि)हस्तकौ(कः) ।
नितम्बमस्तकन्यस्तौ त्रिपताकाकरौ यदा ॥ १२५७ ॥

---

१. D. स्तव्यासा । २. A. क । ३. D. दं । ४. A. र्त्तु । ५. A. मा । ६. A. भागभागप्रसारितौ । ७. A. नो । ८. D. व । ९. A. तस्रोन्यतवस्थितः । १०. D. टि । ११ A. स्यो । १२. A. त्तो । १३. D. भेदितौ । १४. A. त्रि । १५. A. ने । १६. D. नु । १७. D. तो । १८. D. सितावति । १९. D. बंधौ । २०. A. निःक्रांतौ । २१. A. नं । २२. A. ब । २३. A. ति । २४. D. drops these four stanzas । २५. A. तत्रैवरेचितौ तत्रैवरेचितौ भूया । २६. D. रतौ उ । २७. this line is wrongly put here in the ms. D.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पक्षवञ्चितकौ हस्तौ ज्ञेयौ हस्तप्रयोक्तु(क्तृ)भिः ।
तिर्यक् प्रसारितौ हस्तौ त्रिपताकावधोमुखौ ॥ १२५८ ॥

ता[1]र्क्ष्यपक्षौ[2] समाख्यातौ[3] किञ्चित्कुञ्चितकूर्परौ ।
[4]तिर्यक् प्रसारितौ हस्तौ हंसपक्षौ विवर्तितौ ॥ १२५९ ॥

[5]दण्डपक्षाविति ख्यातौ नृ[6]त्ये नृत्यविशारदैः ।
अरालौ तु यदा हस्तौ शी[7]र्षस्योपरिसंस्थितौ ॥ १२६० ॥

ऊर्ध्वमण्डलितौ[8](नौ) ज्ञेयावा[9]वृत्तौ परिवर्ति[10]नौ ।
तौ[11] यदा पार्श्वदेशे तु विव[12]र्तपरिवर्तनौ ॥ १२६१ ॥

[13]पार्श्वमण्डलिनौ[14] ज्ञेयौ नृत्त[15]विद्याविचक्षणैः[16] ।
एक उद्वेष्टितौ (तो) हस्तौ (स्तो) द्वितीयश्चापवेष्टितः ॥ १२६२ ॥

व[17]र्तिनावुरः सं[18](रसः)स्थाने वक्षोमण्डलिनौ स्मृतौ ।
अल[19]पद्मकरश्चैकः[20] करोऽन्योरालसं[21]ज्ञकः ॥ १२६३ ॥

उरः पार्श्वार्धभ्रमणादुरा(रः)पार्श्वार्धमण्डलौ ।
खण्डकाख्यौ करौ वक्षे[22] कुञ्चितावञ्चितौ यदा[23] ॥१२६४॥

मणिब[24]न्धस्थितौ ज्ञेयौ मुष्टिक[25]स्वस्तिकौ तदा ।
पद्मकोशो(शौ) यदा हस्तौ[26] जानुमस्तिष्कवर्ति[27]नौ ॥ १२६५ ॥

सकम्पं परि[28]वर्ताद्यो (र्ताढ्यौ) नलिनीपद्मकोशकौ ।
[29]ऊर्ध्वं प्रसारितौ हस्ता[30] वलपद्मौ वि[31]वर्तिनौ ॥ १२६६ ॥

उल्बणाविति विज्ञेयौ नाट्यशास्त्रविशारदैः ।
असङ्कताः कराः प्रोक्ता विंशतिश्चतुरुत्तरा(रः) ॥ १२६७ ॥

---

१. D. र्क्ष । २. D. क्षः । ३. D. तः । ४. A. वितौक्ष्यापरिविख्यातौ हंसपक्षौ प्रकीर्तितौ । ५. A. दंसपक्ष्याविति । ६. A. नृत्तेवृत्त । ७. D. केशपार्श्वाद्विनिःस्मृतौ । ८. D. ता । ९. D. ववृत्त । १०. D. र्तं । ११. D. तो । १२. D. र्त्त । १३. A. खंड । १४. A. तौ । १५. A. drops this विद्या । १६. A. णै । १७. A. र्त्तिता । १८. A. सि । १९. A. लं । २०. A. श्चैकरः । २१. A. मंजुकः । २२. A. क्षेसे । २३. A. दाः । २४. A. बंस्थितौ D. बंधे स्थितौ । २५. D. श्चस्वस्तिको यदा । २६. D. स्तो । २७. A.D. र्त्ति । २८. A. वृत्ता । २९. A. उर्ध्वं । ३०. D. स्तौ चलत्पद्मौ । ३१. A. पिवर्त्तिनौ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नामलक्ष्मक्रिया[1]युक्ता युग्महस्तास्त्रयोदश ।
नाट्या[2]भिनयने त्वेते युज्य[3]न्ते रसभावतः ॥ १२६८ ॥

असंहतानां युग्मानां नियोगोऽस्मात्प्रकीर्तितः[4] ।
नृत्तहस्तास्तथा प्रोक्ताः सप्तविंशतिसङ्ख्यया ॥ १२६९ ॥

नामतो लक्ष्मतश्चैव [5]नृत्तार्थे सोमभूभुजा ।
एतेषां विनियोगे च नास्ति नृत्ये प्रयोजनम् ॥ १२७० ॥

लालित्यं दोलनादीनि कर्माण्येषां प्रयोजनम् ।
एवं समासतः प्रोक्ताश्चतुःषष्टिः करा मया ॥ १२७१ ॥

अन्येपि चतुरै[6]र्योज्या [7]लोकवृत्तानुसारतः ।
चतुर्विधा[8] (ः) क्रियास्ते[9]षां हस्तानां [10]नर्तनं प्रति ॥ १२७२ ॥

आवे[11]ष्टितो[12]द्वेष्टिते द्वे [13]व्यावृत्तपरिवर्तने (र्तिते) ।
अङ्गुल्यस्त्वन्तरावेष्ट्य[14] तर्जन्याद्या य[15]थाक्र[16]मम् ॥ १२७३ ॥

आवेष्टितास्त[17]तोद्दिष्टाः(तदोद्दिष्टा) क्रिया हस्तस्य कोविदैः ।
बहिर्मुखा[18] यदाङ्गुल्यस्तर्जन्याद्या[19] विचेष्टिताः[20] ॥ १२७४ ॥

उद्वेष्टिता तदा ज्ञेया क्रिया हस्तस्य [21]नर्तकैः ।
कनिष्ठा[22]द्या [23]यदाङ्गुल्यस्त्वन्तरावर्तिताननाः[24] ॥ १२७५ ॥

व्यावर्ति[25]त(ता)क्रिया [26]मान्या प्रोक्ता नर्तनकोविदैः ।
आवर्ति[27]ता [28]यदाङ्गुल्यः[29] कनिष्ठा[30]द्या बहिर्मुखाः[31] ॥ १२७६ ॥

[32]विज्ञेया [33]नृत्ततत्त्वज्ञैः क्रिया सा परिकी(व)र्तिता ।
उत्तरं(न्नतं) च[34] नतं चैव कुञ्चितं चार्ध[35]कुञ्चितम् ॥ १२७७ ॥

---

१. D. यायुग्महस्तास्तेचत्रयोदश । २. A. प्रा । ३. A. ज्यते । ४. D. तिताः । ५. A. वृतार्थं । ६. D. रेयो । ७. A. लेख । ८. D. धा । ९. D. ते । १०. A. नर्तनं ति D. रेचनं प्रति । ११. D. तोवे । १२. A. व्यवर्त D. वावृत्ते । १३. A. विष्टयास्त । १४. A. दा । १५. A. मात् । १६. A. दोदिष्टा । १७. D. खंपदांगुल्यः । १८. A. द्य । १९. A. ता । २०. D. नृत्तकैः । २१. A. ष्टा । २२. A. पदां । २३. A. ना D. ताः । २४. A. ना । २५. A. ना । २६. A. र्त्तित । २७. A. प । २८. A. ल्य । २९. A. ष्टा । ३०. A. खा । ३१. A. व । ३२. A. नर्तानक्तत्वज्ञैः । ३३. A. चनतं चनर्तचैव । ३४. D. र्द्ध ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]संहतं विस्तृतं चैव (स मं चेति च सप्तमम्)।
कुञ्चिताकुञ्चितं जानु [2]त्वर्धाकुञ्चितमिष्यते ॥ १२७८ ॥
जानुद्वयस्य संश्लेषा[3]ज्जानु संहतमीरितम्।
जानुद्वय(यं)बहि[4]र्यातं तज्जानु विवृतं मतम् ॥ १२७९ ॥
स्वभावावस्थि[5]तं जानु समभित्यभिधीयते।
इति सप्तविधं[6] जानु कर्म चास्य निगद्यते ॥ १२८० ॥
गजाश्वपर्वतारोह उत्तरं(न्नतं) जानु यो[7]जयेत्।
[8]पातनं(ने) च प्रमाणेन(णामे च) नतं जानु समीरितम् ॥१२८१॥
आसने कुञ्चितं जानुं(नु) चलने त्वर्धकुञ्चितम्।
लज्जायां स्वीकृते भावे संहते(तं) जानु निर्दिशेत्[7] ॥ १२८२ ॥
आरूढे(रोहे) च गजादीनां नृत्ये च विवृतं भवेत्।
स्तम्भे कार्यं समं जानु नाट्यस्याभिनये [9]बुधैः ॥ १२८३ ॥
निःसृता च परावृत्ता [10]तिरश्चीं[11]ना च कम्पिता।
बहिः क्रान्ता च विज्ञेया जङ्घा पञ्चविधा[12] बुधैः ॥ १२८४ ॥
पुरतो निर्ग[13]ता जङ्घा निःसृते[14]त्यभिधीयते।
[15]पश्चाद्गता परावृत्ता तिरश्चीना तु पार्श्वगा ॥ १२८५ ।
रेचिता [16]कम्पिता ज्ञेया बहिः[17]क्रान्ता बहिर्गता।
एवं लक्षणमाख्यातं विनियोगोऽपि कथ्यते ॥ १२८६ ॥
क्षालने पादघाते च कार्या जङ्घा तु निः[18]सृता।
परावृत्ता तु[19] कार्या स्यादु[20]त्कुटौ [21]दर्दुरासने ॥ १२८७ ॥
तिरश्चीना[22] समाधौ स्यात्कम्पिता[23] शीतवे[24]पथौ।
[25]पङ्ग्वाद्यभिनये [26]कार्या बहिः[27]क्रान्ता विचक्षणैः[28] ॥ १२८८ ॥

---

१. D. drops this line। २. A. रर्धा। ३. D. तनुज्ञातंहतमीरितं। ४. A. र्जातं। ५. A. सि। ६. D. धा। ७. A. निर्दिशेत्। ८. A. drops these three lines। ९. A. वै। १०. A. भिरश्चिता। ११. D. नां। १२. A. drops this धा। १३. A. निगाता। १४. A. त्ये। १५. A. परिवृत्ता तिरश्चां न तु पार्श्वगा। १६. A. drops this word। १७. A. हिक्कांता। १८. D. विस्तृता। १९. A. तुः। २०. A. त्प। २१. A. दुर्धु। २२. D. नां। २३. A. ना। २४. A. य। २५. A. पंग्वा। २६. A. drops this word। २७. A. हिष्कांता। २८. A. णैं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

घटितो घटितोत्सेधो मर्दिता(त)स्ताडि[1](स्त्राटि)ताग्रतः (गः) ।
पार्ष्णिगः पार्श्वगः सूचि(:) निजा(जः) श्रेति [2]नवाङ्घयः ॥१२८९॥

पार्ष्णिघाती भवेत्पादौ (दो) घटितौ च वि(तः स नि)युज्यते ।
अश्वादिप्रेरणे भेदे ह[3]ढत्वापादने तथा ॥ १२९० ॥

भूमि[4]ष्टमग्रमुन्न(न्य)स्य[5] यः पाष्ण्र्या हन्ति भूतलम् ।
पादोऽयं घटितोत्सेधो नृत्यादौ विनियुज्यते ॥ १२९१ ॥

तिर्यक्[6]तलेन [7]मृद्भा(ना)ति भूमिं[8]यस्तु स मर्दितः ।
म[9]र्दने पोषणे त्रासे योज्यो[10] ऽसावपसर्पणे ॥ १२९२ ॥

पाष्ण्र्या भूमिमवष्टभ्य पादाग्रेण निहन्ति यः ।
पादः[11] स त्राटितो नाम [12]कोगर्वेण(क्रोपे गर्वे) नियुज्यते ॥१२९३॥

पुरतः सरणात्पाद[13]स्त्व[14]ग्रगः परिकीर्तितः ।
पि[15]च्छ(च्छि)ले च [16]जलस्यान्तः पाषाणे च नियुज्यते ॥ १२९४ ॥

पाष्ण्र्यापसरणात्पादः पार्ष्णिगः[17] समुदाहृतः ।
पश्चादपसृ[18]तस्त(तौ त)स्य विनियोगो निरूपितः ॥ १२९५ ॥

पाद(दः) पार्श्वे स्थितो गच्छन्वा म (स) पार्श्वगतो भवेत् ।
आसने [19]कण्टकोत्पाटे सस्फुरो नृत्त इष्यते ॥ १२९६ ॥

अङ्गु[20]ष्ठाग्रस्थितः पादः सूची[21]नाम्ना प्रगीयते ।
तुङ्गवस्तु समाकर्षे मुखचुम्बिजले [22]भवेत् ॥ १२९७ ॥

विकाररहितः पादो[23] भूमौ लग्नतलो[24] निजः ।
स्थितौ [25]श्रमे विस्मये च चिन्तायां विनियु[26]ज्यते ॥ १२९८ ॥

अवक्षिप्तास्तथोत्क्षिप्ताः कुञ्चिताश्च प्रसारिताः ।
पादाङ्गुल्यस्तथाङ्गुष्ठः[27] संलग्नाश्चेति पञ्चधा ॥ १२९९ ॥

---

१. A. डिग्रगः । २. A. निजाघ्रयः । ३. A. drops this ढ । ४. D. मिष्टनग्र । A. यिष्ट । ५. D. म्य। ६. A. ता D. का। ७. D. मंद्रादि। ८. D. मिर्य। ९. A.D. ई। १०. D. ज्यः सावरणे पर्णे । ११. A. दसंत्रादितो। १२. A. कांग। १३. D. दा। १४. A. स्व। १५. A. ष्ट। १६. D. ब। १७. A. ग। १८. A. सुस्य यद्या पार्श्वगोविनिरूपितः। १९. A. कंठ। २०. A. ष्टा। २१. A. च। २२. A. भवे। २३. D. दौ। २४. D. लेनतु। २५. A. ग्रामे। २६. D. यो। २७. A. ष्ट।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुहुर्मुहुरधः[1]क्षेपादवक्षिप्ताः प्रकीर्तिताः ।
पश्चात्कर्षे च संयोज्या विव्वोके[2] कि[3]लकिञ्चिते ॥ १३०० ॥

वारं वारं समुत्क्षेपादुत्क्षिप्ता गदिता बुधैः ।
अङ्गुल्यो विनियुज्यन्ते नवोढायास्त्रपा[4]भरे ॥ १३०१ ॥

सङ्कोचिता[5] यदाङ्गुल्यः कथिताः कुञ्चितास्तथा ।
त्रासे[6] ग्रहे च शीतार्ते नियुज्यन्ते च मू[7]र्छिति(र्च्छिते) ॥१३०२॥

रु(ऋ)ज्वः स्तब्धा[8] यदाङ्गुल्यस्तदा ख्याताः प्रसा[9]रिताः ।
[10]स्तम्भेग(ऽङ्ग)मोटने स्वापे [11]प्रयुज्यन्ते प्रयोक्तृभिः ॥ १३०३ ॥

अङ्गुलीभिः सहाङ्गुष्ठ[12] एको[13] वापि तथाविधः ।
तन्नाम(सूचीति)संज्ञितश्चायं नियोगोऽप्यस्य तद्विधः ॥ १३०४ ॥

अङ्गुष्ठे[14]न सहाङ्गुल्यः संहताश्चेत्परस्परम् ।
संलग्नाः कथितास्तासामाकर्षः स्यान्नियोजनम् ॥ १३०५ ॥

प्रत्यङ्गान्येवमुक्तानि नामलक्ष्मनियोजितम् ।
नाट्याभिनय[15]योगीनि यथायोगं नियोजयेत् ॥ १३०६ ॥

संहतं समपादं च स्वस्तिकं वर्धमानकम् ।
नन्द्यावर्तं चतुरस्रं पार्ष्णिविद्धं तथैव च ॥ १३०७ ॥

पार्ष्णिपार्श्वे(र्श्वे)गत(तं) स्थाने ए(नमे)कपार्श्व[16]गतं तथा ।
[17]एकजानुम(ग)तं चैव परावृत्तं तथापरम् ॥ १३०८ ॥

पृष्ठो[18]त्तान(नं) तलस्थानमेकपादं तथैव च ।
ब्राह्मं च वैष्णवं शैवं गारुडं वृषभासनम् ॥ १३०९ ॥

समसूचिकमित्येकं तथा विषमसूचिकम् ।
खड्गसूचि[19]कमित्येवं स्थानकान्येकविंशतिः ॥ १३१० ॥

---

१. A. क्षिप्तादवेत्क्षिप्ताः । २. D. क । ३. A. लिकिंचि । ४. D. रमे । ५. A. तपदां । ६. A. स । ७. D. र्तिते । ८. A. ब्धाप । ९. A. कीर्तिताः । १०. D. सभागयोटने । ११. A. प्रयुज्यसे । १२. A. ष्ट । १३. D. के । १४. A. ष्टे । १५. A. drops this य । १६. D. र्श्वे । १७. D एवं च जायते चैव । १८. A. ष्टो । १९. A. च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अङ्गुष्ठोङ्गुष्ठसंश्लिष्टोऽङ्गुल्योऽङ्गुल्ये च [1]संहताः ।
यत्र स्थित(ता)स्तदाख्यातं संहतं स्थानकं बुधैः ॥ १३११ ॥

समौ[2] [3]ऋ(मावृ)जुस्थितौ पादौ वितस्त्य[4]न्तरमायतौ ।
भवेतां [5]यत्र तत्स्थानं समपादमुदा[6]हृतम् ॥ १३१२ ॥

नूपुरस्थान[7]सम्बद्धं कनिष्ठा[8]द्वयसङ्गतम् ।
ईषदुच्च[9]तलं नाम्ना स्वस्तिकं स्थानकं विदुः ॥ १३१३ ॥

पादौ तिर्यङ्मुखौ यत्र पार्ष्णि[10]भ्यां च सुसं[11]हतौ ।
वर्धमानं तदाख्यातं स्थानकं नृत्यकोविदैः ॥ १३१४ ॥

वर्धमानं [12]यदा स्थानं [13]वितरितं (वितस्त्यन्तरितं) भवेत् ।
[14]नन्द्यावर्तं तदा प्रोक्तं नृत(त्य)विद्याविचक्षणै (णैः) ॥ १३१५ ॥

नन्द्यावर्तं यदा स्थानं त्रिवितस्त्यन्तरं भवेत् ।
स्थानकं चतुरस्रं तत्(ज्) ज्ञेयं [15]नर्तनकौतुके (कोविदैः) ॥ १३१६ ॥

अङ्गुष्ठे[16] पार्ष्णिसंश्लेषात्पार्ष्णिबिद्धं[17] तदीरितम् ।
अन्तः पार्श्वे[18] गता पार्ष्णिः [19]पार्ष्णिपार्श्वमुदाहृतम् ॥ १३१७ ॥

[20]समः पादौ(दो) भवेदेकः किञ्चिदन्यः पुरोगमाः(मः) ।
तिर्यग्बहिः पार्श्वगतस्त्वेकपार्श्वे तदीरितम् ॥ १३१८ ॥

एकः [21]समो द्वितीयश्च [22]तिर्यक्कुञ्चितजानुकः ।
चतुरङ्गुलविश्लेषादेकजानुग[23]तं म[24]तम् ॥ १३१९ ॥

समानाङ्गुष्ठपार्ष्णिभ्यां समे पार्ष्णिकनिष्ठिके[25] ।
परावृत्तं तु य[26](त)त्स्थानं स्थानं(ख्यातं) लक्षणवेदिभिः ॥ १३२० ॥

---

१. D. संगता । २. D. मो रुजस्थितौ पादौ । ३. A. रुर्जु । D. रुज । ४. A. स्त्वैं । ५. A. यत्र स्थानं । ६. A. दाखाहृतं । ७. D. कंब । ८. A. ष्ठा । ९. D. चलं । १०. A. ष्णि । ११. D. ह्व । १२. A. स । १३. D. वितितं त भवेद्यदा । १४. D. drops this line । १५. A. नर्त्तन । D. नृत्यककोविदैः । १६. A. ष्टः । १७. A. द्धं । १८. A. र्श्वे । १९. A. drops this पार्ष्णि D. र्ष्णी । २०. D. drops this stanza । २१. D. सो । २२. D. श्चेर्तिर्यष्कं । २३. A. न । २४. A. नं । २५. A. कौ । २६. A. नुथस्थानं लक्षण-वेदिभिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अङ्गुली[1]पृष्ठ[2]संलग्नः पाश्चात्योऽङ्घ्रि[3]र्यदा भुवि ।
[4]पुरस्थः समपादश्चेत्पृष्ठोत्तानतलं भवेत् ॥ १३२१ ॥

समस्थानस्थितस्त्वेकः परस्तज्जानुमूर्धनि ।
बाह्यपार्श्वेन संलग्नः(ग्न) एकपादे(दं) तदीरितम् ॥ १३२२ ॥

[5]एकः समः स्थितः पादै र्द्वि(दो द्वि)तीयः कुञ्चितः[6] पुनः ।
जानु[7]सन्धिसमः पश्चा[8]द् व्राह्मं स्थानमुदाहृतम् ॥ १३२३ ॥

पाद[9] एकः समो भूमौ द्वितीयः कुञ्चितो [10]मनाक् ।
अग्रे प्रसारितस्तिर्यग् वैष्णवं[11] स्थानकं हि तत् ॥ १३२४ ॥

समस्थितस्य पादस्य जानुमूर्ध[12]समोऽपरः ।
आकुञ्चितो [13]निरालम्बः स्थानकं शैवमुच्यते ॥ १३२५ ॥

पूर्वमा[14]कुञ्चितः पादः पाश्चात्यो[15] जानुना स्थितः ।
भूतले तु[16] यदा [17]त्वेवं तदा गारुडमीरितम् ॥ १३२६ ॥

जानुद्वयं यदा भूमौ संहतं विवृतं तु वा ।
स्थितं सौ[18]ष्ठवसंयुक्तं तदा स्याद् वृ[19]षभासन[20]म् ॥ १३२७ ॥

ति[21]र्यक् प्रसारितौ पादा[22]वूरुजङ्घम्(घं) सपार्ष्णिकम् ।
भूमिलग्नं तदास्थानं समसू[23]चीति सूचितम् ॥ १३२८ ॥

पुरः[24] [25]प्रसारितस्त्वेकः प[26]श्चादेकः[27] प्रसारितः ।
जानु[28]गुल्फेन भूलग्नो भवेद्विषमसूचि[29]कम् ॥ १३२९ ॥

एक[30]स्तु कुञ्चितः पादो द्वितीयस्तिर्यगायतः ।
[31]ऊरुपार्ष्णि[32]समालग्नो भुवि स्यात्खण्डसूचि[33]कम् ॥ १३३० ॥

---

१. A. लिः । २. A. ष्ट । ३. A. drops this भु । ४. D. drops this श्लोक । ५. A. पुरः स्थामः स्थितः । ६. D. त । ७. D. संधीसमा । ८. A. श्चाद्ब्रह्मस्थान्मु । D. श्चात् वाह्मं । ९. A. द्याकः । १०. D. सनात् । ११. A. व । १२. D. र्धं । १३. A. निलंबः । १४. A. मंकुचि । १५. A. त्यौ । १६. D. न । १७. A. चे । १८. A. ए । १९. A. ह्व । २०. A. नी । २१. A. र्षं । २२. D. दौ उ । २३. D. चितसूचकं । २४. A. रतः । २५. A. प्रा । २६. A. श्चा । २७. D. क । २८. A. न्वाङ्गुल्ये । २९. D. तः । ३०. A. कः स्तु । ३१. A. उरु । ३२. A. ष्णि । ३३. A. तं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चारी [1]सममथा(नखा)प्येका परा[2]नूपुर [3]विद्धिकाः(का)।
तिर्यङ्मु[4]खा मरालाख्या कातरा च कुलीरिका ॥ १३३१ ॥
[5]रथचक्रा च विश्लिष्टा[6] [7]तथा स्यात्पार्ष्णिरेचिता।
तलदर्शि[8]निभा(नीभ)हस्ता परावृत्ततला तथा ॥ १३३२ ॥
कु(ऊ)रुताडितनामा स्यादर्ध[9]मण्डलिकापरा[10]।
स्तम्भक्रीडनिका चारी हरिणत्रासिका [11]तथा ॥ १३३३ ॥
उ(ऊ)रुवेणी तलोद्वृत्ता [12]भवेत्संसा(सञ्चा)रिका पुनः।
स्फुरि[13]कालञ्चिता(ङ्गित)जङ्घा समघट्टा[14] मदालसा ॥ १३३४ ॥
उत्कुञ्चिता तथा [15]तिर्यक्कुञ्चिता [16]त्वपकुञ्चिता।
एवं [17]षड्विंशतिः[18] प्रोक्ताश्चा[19]र्यो भूमिसमाश्रया(ः) ॥ १३३५ ॥
नाम्ना षोडश विख्याता ता(स्ता)सां वक्ष्यामि लक्षणम्।
समपाद[20]स्थितौ पादौ यदा तिर्यक् प्रस[21]र्पतः ॥ १३३६ ॥
तदा समनखा [22]चारी [23]विज्ञेया च मनीषिभिः।
स्वस्तिकस्थौ यदा पादौ पार्ष्णिप्रपदरेचितौ ॥ १३३७ ॥
तदा [24]नुपू(नूपु)र[25]विद्धेति चारीयं समुदाहृता।
वर्धमान[26]स्थितौ पादौ वामदक्षिणतो यदा ॥ १३३८ ॥
सरतो द्रुतमानेन चारी तिर्यङ्[27]मुखा तथा।
नन्द्यावर्त[28]स्थितौ [29]पादौ पार्ष्णिपादाग्ररेचनात् ॥ १३३९ ॥
पुरतः सर्पतो यस्याश्चा[30]री सा [31]स्यान्मरालिका।
नन्द्यावर्तगतौ पादौ पश्चाच्चेदपसर्पतः ॥ १३४० ॥

---

१. A. चसमवाप्यका। २. A. र। ३. A. वर्द्धिका। ४. A. ग्मु D. क्मु। ५. D. रक्तवक्त्रा। ६. D. षा। ७. D. र। ८. A. शीनिभहरिता परावतलातथा। ९. A. ध। १०. A. रः। ११. A. drops this तथा। १२. A. त्ससारिभवका। १३. A. रजंघितजंघा। १४. A. दा। १५. A. नियंत्कं। १६. D. च तथान्विता। १७. D. षट्विं। १८. D. ति। १९. A. श्चा। २०. D. दे। २१. D. सारितः। २२. D. वारि। २३. A. विच्छैयानाट्ययोक्तृभिः। २४. A. न पुरु। २५. A. चि। २६. D. ना। २७. D. कूमु। २८. D. ग। २९. A. drops this पादौ। ३० D. स्वारि। ३१. D. स्याम।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कातरा सा समा[1]ख्याता चारी भूतलसंश्रया ।
नन्द्यवर्ताश्रयौ पादौ यदि ति[2]र्यक् प्रस[3]र्पतः ॥ १३४१ ॥

कुलीरि[4]का तदा चारी विज्ञेया नाट्यकोविदैः ।
चतु[5]रस्रस्थितौ पादौ संलग्नावु[6]पसर्पतः ॥ १३४२ ॥

पश्चाद्वा सरतो यत्र रथचक्रेति सा स्मृता ।
पार्ष्णिविद्धाश्रयौ[7] पादौ विविच्य कुरुतो यदा[8] ॥ १३४३ ॥

उपस[9]र्पापसर्पा[10](र्पौ) सा विश्लिष्टा कथिता तदा ।
पार्ष्णिपार्श्वाभिधे स्थाने र(रे)चितौ यदि पार्ष्णिकौ ॥ १३४४ ॥

तदा भवति चारीयं नामतः पार्ष्णिरेचिता ।
संहतस्थौ यदा पादौ पृथ[11]क् चेत् तिर्यगायतौ ॥१ ३४५ ॥

स्पृशतो [12]बाह्यपार्श्वेन [13]भूमिं सा तलद[14]र्शिनी ।
संहत[15]स्थानगः पादः पार्श्वाभ्यां [16]घर्षणो(णे) भवेत् ॥ १३४६ ॥

यदा तदा समाख्याता करिहस्तेति सूरिभिः ।
पृष्ठोत्तानस्थितः[17] पादः[18] [19]परिवाह्य प्रसारितः ॥ १३४७ ॥

परावृत्ततला [20]नाम चारी ज्ञेया मनीषिभिः ।
एकपादे कृतस्थानो[21] भूमिस्थेन पदेन च ॥ १३४८ ॥

ता[22]डये[23]दूरुदेशं[24] तु सा भवे[25]दूरुताडिता ।
भूमि[26]घृष्ट(ष्टं)बहिः कृत्वा पादमावर्तयेच्छनैः ॥ १३४९ ॥

पर्यायेणा[27]पसर्पन्तं चारी स्यादर्धमण्डला[28] ।
तिर्यक् प्रसारिताङ्घ्रेस्तु तलेनान्यस्य पार्श्वकम् ॥ १३५० ॥

---

१. D. ना । २. A. र्थं । ३. A. र्पत D. र्पितः । ४. A. टि । ५. A. drops this र । ६. A. वु । ७. A. या । ८. D. था । ९. D. र्प्या । १०. D. र्प्यौ । ११. A. क्वे । १२. A. वा । १३. A. भूंमी D. भूमिः । १४. A. दर्शमी D. मर्द्दिनी । १५. A. तः । १६. A. हर्षणे । १७. D. ता । १८. D. दौ । १९. D. पादौ । २०. A. न । २१. D. ना । २२. A र । २३. D. वुरु । २४. A. देदूरुदेशं । २५. D. दु । २६. D. पृष्टं । २७. D. समाप्पंतं । २८. A. लाः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुहुर्मुहुश्च घटयेत्स्तम्भक्रीडनिका हि सा
कुञ्चित[1]स्वस्तिकाकारे चलिताङ्घ्रितलं[2] यदा । ॥ १३५१ ॥
संश्लिष्योत्प्लु[3]त्य[4] नियते (पतेत्) हरिणत्रासिका भवेत् ।
स्वस्तिकाकारपादाभ्यां पार्श्वसङ्घर्षणा[5]द्भवि ॥ १३५२ ॥
उ(ऊ)रुद्वयस्य संश्लेषा[6]दूरुवेणीति वर्णिता ।
अङ्गुली[7]पृष्ठचारीभ्यां प्रप[8]दाभ्यां द्रुता गतिः॥ १३५३ ॥
पुरतः सरणा[9]चारी तलो[10]द्वृत्ता तु कीर्तिता ।
एकश्चा[11]कुञ्चितः[12] पाद उत्क्षिप्योत्क्षिप्य युज्यते ॥ १३५४ ॥
तिर्यगच्छे नलेनाख्यश्चारी(रगच्छेत्तलेनान्यश्चारी)[13]सञ्चारिता भवेत् ।
उभाभ्यां पादपार्श्वाभ्यां[14] पुरतः सरणाद्रु(द्रु)तम् ॥ १३५५ ॥
भूमिलग्ना यदा[15]चारी स्फुरिता[16] कीर्तिता तदा ।
खण्डसू[17]चिस्थि[18]तः पादः[19] शीघ्रमाकर्षि[20]तो यदा ॥ १३५६ ॥
लङ्घ्यते [21]येन पादेन [22]तदा लङ्घितजङ्घिका ।
पादौ विषमसूचि[23]स्थावुत्प्लु[24]त्य[25] घटयेन्मु[26]हुः ॥ १३५७ ॥
चारी सङ्घट्ट(ट्ट)ना नाम कथिता सोमभूभुजा ।
विकलौ तु यदा पादा[27]वन्य[28]स्थौ श्लेषितौ पुनः ॥ १३५८ ॥
इतश्चेतश्च निक्षिप्तौ यत्र सा तु मदा[29]लसा ।
उ[30]त्क्षिप्य कुञ्चितौ[31] पादौ[32] ए(दावे)कैकक्रमशो यदा ॥ १३५९ ॥
विक्षिप्ताः[33] (प्तौ) पुरतश्चारी तदाऽसौ[34] कु(सोत्कु)ञ्चिता मता ।
यत्रैकं पादमाकुञ्च्य तिर्यक् प्रक्षेपणान्मुहुः ॥ १३६० ॥

---

१. A. तेस्वसि । २. A. लां । ३. D. त्प । ४. A. त्प । ५. A. ण D. णात् भु । ६. A. दु । ७. A. प्रथ । ८. A. पा । ९. D. णात्चारी । १०. A. लात्वृत्ता । ११. A. स्या । १२. A. दः । १३. A. drops this सञ्चारि । १४. A. omits this भ्यां । १५. A. ची । १६. D. का । १७. A. ची । १८. A. थि । १९. D. द । २०. D. र्ष । २१. D. ने । २२. A. पंनदा । २३. D. ची । २४. A. न्य । २५. A. न्मदु । २६. D. दौव । २७. A. न्यवरतौश्लथौ । २८. D. हा । २९. A. क्षि । ३०. A. ता । ३१. A. दा । ३२. D. ष्ट । ३३. D. तौ । ३४. A. ना ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सा तिर्यक्कुञ्चिता चारी[1] कथिता नाट्यकोविदैः ।
पादमाकुञ्च्य यत्रैकं गच्छे[2]त्पश्चात् क्रमाद्यदि ॥ १३६१ ॥

[3]सापकुञ्चितचारीति कथिता नाट्य[4]कोविदैः ।
पादं प्रसार्य पुरतः पश्चादाकुञ्चनान्मुहुः[5] ॥ १३६२ ॥

विक्षेपो[6] (पा)नाम सा ज्ञेया चारी व्योमसमाश्रया ।
आकुञ्चितस्य पादस्य सव्यं दक्षिणतोऽपि वा ॥ १३६३ ॥

[7]भ्रामराङ्घ्र(भ्रमणाङ्घ्र)मरी नाम व्योमचारी विवर्णिता ।
पादौ प्रसार्य चोत्प्लुत्य[8] पादयोस्तलताडनात् ॥ १३६४ ॥

आकाशे सा समाख्याता नामतस्त्वङ्घ्रिताडिता ।

पादं[9] प्रसार्य[10] पुरतो वेगेन भ्रमणाद्यदा ॥ १३६५ ॥

भ्रमरी नाम सा प्रोक्ता चारी नर्त[11]नकोविदैः ।
कुञ्चितं पादमुत्क्षिप्य पुरतः सम्प्रसारयेत् ॥ १३६६ ॥

यदा तदा समाख्याता पुरःक्षेपेति सूरिभिः ।
[12]ऊरुपृष्ठे[13] [14]पदं कृत्वा बहिः पार्श्वेन सङ्गतम् ॥ १३६७ ॥

नितम्बं यावदाकुञ्चेत्सापक्षेपा तदा स्मृता ।
अन्तरभ्रमणादङ्घ्रे जा(र्जा)नुपृष्ठे[15] तलं न्यसेत् ॥ १३६८ ॥

बहिस्तु भ्रमणात्पार्श्वे जङ्घावर्ता[16] तदा स्मृता ।
कुञ्चितं पादमुत्क्षिप्य जानु[17]स्तनसमं यदा ॥ १३६९ ॥

विन्यस्य कम्पये[18]त्पादं [19]सार्ध (दमूर्ध्व) जानुरुदाहृत[20](ता)।
उ(ऊ)रोरुपरि विन्यस्य पादं पार्श्वेन सङ्गतम् ॥ १३७० ॥

प्रसारयेच्च तीक्ष्णाग्रं तदा सूचीति कीर्ति[21]ता ।
पश्चात्कुञ्चितपादस्तु [22]दोलितश्च पुनः पुनः ॥ १३७१ ॥

---

१. A. चारीति । २. D. च्छप । ३. A. सोयं । ४. A. योक्तभिः । ५. A. हु । ६. A. ज्ञेया । ७. D. भ्रामरीटुमरीनाम । ८. A. त्प । ९. A. द । १०. A. यं । ११. D. र्त्तक । १२. A. उरु D. कुरु । १३. A. ष्टि D. ष्टं । १४. D. यदा । १५. A. ष्टे । १६. D. र्त्ता । १७. D. नुं । १८. A. ये । १९. D. सर्वं । २०. A. तं । २१. A. र्त्तिना D. र्त्तिं । २२. D. चा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चारी [1]सन्दोलिता नाम कथिता नाट्यपण्डितैः ।
स्वस्तिकस्य पुरः पादः[2] कुञ्चितान्दोलितो[3] मनाक् ॥ १३७२ ॥

व्योमचारी समाख्याता नाम्ना [4]विद्वा बुधोत्तमैः ।
तिर्यगाकुञ्चितं पादमितरेण विलङ्घयेत् ॥ १३७३ ॥

निरालम्बा(म्बं) तदा ज्ञेया जङ्घा लङ्घनचारिका ।
उत्क्षिप्तं पुरतः[5] पादं ता(भा)लस्योपरि भ्रामयेत् ॥ १३७४ ॥

विद्युद्भ्रान्तेति सा प्रोक्ता व्योमचारी विप[6]श्चिता ।
पृष्ठतः सारितं पादं लङ्घयित्वान्तराकृते ॥ १३७५ ॥

[7]अलाता नाम सा प्रोक्ता [8]चारी चारीविशारदैः ।
प्रसार्य पादा[9]वुत्प्लुत्य निपतेच्च मुहुर्मुहुः ॥ १३७६ ॥

कथिता नाट्यतत्त्वज्ञैः[10] सा चारी हरिण[11]प्लुता ।
स्वस्तिकं च समावर्त्य प्रोत्क्षेपात्तिर्यगूर्ध्वतः[12] ॥ १३७७ ॥

दण्डपादेति[13] सा [14]चारी कथिता व्योमजा बुधैः ।
भूमिजा व्योमजा[15]श्चार्यो लक्ष्य[16]लक्षणसंयुताः ॥ १३७८ ॥

[17]कथिताः सोमभूपेन [18]नाट्याभिनयकर्मणि ।
[19]अञ्चितं कर्तरी[20]श्चितमेकपादा[21]श्चितं तथा ॥ १३७९ ॥

भैर[22]वाञ्चितमित्येव[23]मञ्चितं स्याच्चतुर्विधम् ।
अलग्नमन्तरालग्नमू[24]र्ध्व(र्ध्वा)लग्नं [25]तथैव च ॥ १३८० ॥

[26]त्रिप्रकारमिदं प्रोक्त[27]मलग्नं करणं बुधैः ।
[28]कपालस्पर्शनं नाम [29]नतपृष्ठाभिधं[30] तथा ॥ १३८१ ॥

---

१. A. संदा । २. D. द । ३. A. नो । ४. D. विद्यात् । ५. A. तः वरमः पादं । ६. A. निश्चिता । ७. A. आ । ८. A. drops this चारी । ९. D. दमुत्पात्य नीयते च । १०. A. ज्ञे । ११. A. णा । १२. A. ता । १३. A. थ । १४. D. च । १५. D. चा । १६. D. क्ष । १७. D. सोमभूपेन कथिता । १८. A. नट्या । १९. D. अंचित । २०. A. त्तयेचिंत D. त्तर्यचित । २१. D. दाचितं । २२. D. वाचित । २३. D. मचितं । २४. D. प्रा । २५. A. तं । २६. D. त्रिः । २७. D. क्तं अ । २८. D. का । २९. D. ततः । ३०. D. धस्त ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्विः(द्वि)प्रकारमिदं ज्ञेयं कपालस्पर्शसंज्ञकम् ।
एकपादादिभेदेन चतुर्धा[1] लोटितं भवेत् ॥ १३८२ ॥

दण्डप्रणतसंज्ञं च जलशय्या[2]भि[3]धं तथा ।
एणप्लुतं च करणं तिर्यक्करणमेव च ॥ १३८३ ॥

मत्स्यलोलितकं चेति दशाष्टौ करणानि तु ।
उत्तानमुत्प्लुतं यत्र समपादं प्रक[4]ल्प्यते ॥ १३८४ ॥

मुकुलं बहुपत्रं च[29] सौव[30]र्णान्तरसंज्ञितम् ॥ १७६ ॥

कीलितं [31]कीलकेनाथ लोलमानं सुय[32]न्त्रितम् ।
वरत्राभिश्च[33]तसृभिः संयुतं फलकेन च ॥ १७७ ॥

मत्तवारणयुक्तेन सुव[34]र्णपुटितेन च ।
चतुरस्रेण रम्येण शोभमानं मनोहरम् ॥ १७८ ॥

---

१. A. र्वि । २. A. संभ । ३. A. ताम् । ४. A. तुस्तंभस्वंभयो । ५. A. न्यसे । ६. A. मंतीत्सभयो । ७. A. दश्च । ८. A. नि । ९. A. पये । १०. A. तित्रय । ११. D. श्वा । १२. D. र्नि A. निर्मिशुभा । १३. A. ष । १४. A. र्णशु । १५. A. पे । १६. A. भिमनो । १७. A. हंसैः । १८. A. सार्दुलवानरे । १९. A. णि । २०. A. नरु । २१. A. लि । २२. A. भ्य । २३. A. तशनैराप । २४. A. येत्तु तम् । २५. A. नस्येसु । २६. A. खा । २७. A. मा । २८. A. दे । २९. A. वा । ३०. A. र्णत । ३१. A. को । ३२. A. र्यंत्रयम् । ३३. A. श्व । ३४. A. र्णटिते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवमान्दोलकं सिद्धं पौर्णमास्यां निशागमे[1] ।
चन्द्रोदये तथा राजा[2] शृङ्गारी रत्नभूषितः[3] ॥ १७९ ॥

वनिताभिः समायुक्तः शक्रो[4] वाप्सरसां गणैः[5] ।
महता तूर्यघोषेण [6]बन्दिवृन्देन [7]वन्दितः ॥ १८० ॥

गी[8]तवाद्यविनोदेन विप्राशीभि(र्भि)रभिष्टुतः[9] ।
आरोहेच्च तदा[10]दों(न्दो)लं प्रेयसीभिः[11] समन्वितः ॥ १८१ ॥

ततो जयजयाद्वान्यै(वादै)र्बद्धाञ्जलिपुटैर्जनैः[12] ।
स्तूयमान[13]स्तदा राजा[14] राजते देवराजवत् ॥ १८२ ॥

सन्तर्प्य प्रियवाक्यैश्च[15] हेम[16]वस्त्रविभूषणैः[17] ।
ब्राह्मणान् गायका[18]दींश्च ततः[19] सर्वान्विसर्जयेत् ॥ १८३ ॥

ततः[20] कान्ताजनैः सार्द्धं क्रीडे[21]दान्दोलकैर्नृ(के नृ)पः[22] ।
श्रीख[23]ण्डक्षोदशुभ्रायां चन्द्रिकायां मुदान्वितः ॥ १८४ ॥

पी[24]ठमध्ये स्वयं तिष्ठे[25]त्सुखासीन[26](:) प्रियान्वितः[27] ।
मत्तवारणसंसक्तवृत्तायतभुजो नृपः ॥ १८५ ॥

पार्श्वद्वयस्थतन्वङ्गीकुचपीडितविग्रहः[28] ।
उप[29]गूहनसम्भूतहर्षरोमाञ्चकञ्चुकः ॥ १८६ ॥

पुरः पश्चाच्च तस्याङ्गे[30](न्वङ्गयौ) रज्वासक्तभुजद्वये[31] ।
ऊर्ध्वस्थिते तथा गाढं विधाय जघनां[32] शुकम् ॥ १८७ ॥

दर्शयन्त्या(न्त्यौ) [33]कृशं मध्यं तथा वृत्तौ पयोधरौ ।
श्लक्ष्णं कक्षाप्रदेशं च [34]रम्भोरुयुगलं शुभ[35]म् ॥ १८८ ॥

---

१. A. म । २. A. ज्ञा । ३. A. ताः । ४. A. क्षावान्त्र । ५. A. णै । ६. A. बंदी-वृंवेन । ७. A. वंदी । ८. A. गि । ९. A. त । १०. A. मादोलं । ११. A. भिसमन्वतः । १२. A. नै । १३. A. न्वस्त । १४. D. जादेवराजसमानवत् । १५. A. क्येवृ । १६. A. यत्र । १७. A. णै । १८. A. रिश्चे । १९. A. तसत्रान्विसंजयेत् । २०. A. त । २१. A. ड । २२. A. प । २३. A. ष । २४. A. ट । २५. A. ष्टे । २६. D. नं । २७. A. त । २८. A. हा । २९. A. गु । ३०. A. त्वंगौ । ३१. A. य । ३२. A. ना । ३३. A. क्रत्सनं । ३४. A. रभो । ३५. A. क ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वर्द्धय[1]न्त्या(न्त्यौ) तथा राग[2] चन्द्रज्योस्नेव[3] चाम्बुधिः(धिम्)।
पादावा(घा)तैस्तथा दोलं[4] दोलयन्त्यावितस्ततः ॥ १८९ ॥

[5]अत्यनां(न्त) बुद्धिकल्लोलो वि(लैर्वि)लोकि(भि)त [6]इव द्विपः[7]।
सुखसीकर[8]मार्गाङ्गो हर्षाद्वि[9]कृतमानसः ।
कान्ताश्चतस्रो गाये[10]युश्चतुर्दिक्षु समाश्रिताः[11] ॥ १९० ॥

कोकि[12]लध्वनिसंस्प[13]र्द्धिकलनाद[14]समन्वितम् ।
सु[15]स्वरं मधुरं गीतं [16]शृङ्गाररसगर्जि(र्भि)तम् ॥ १९१ ॥

नृपनामसमोपेतं दोलय[17]न्तं(न्त्यः) शनैः[18] शनैः ।
[19]आन्दोलइ(यि)त्वा कर्षन्त्यौ[20] तन्वङ्ग्यौ[21] नृपमानसम् ॥१९२॥

[22]रूपयौवनसम्पन्न [23]सुस्वरादिव कर्षतः ।
[24]मिषेण फलकं[25] पद्भ्यां लोटयन्त्यौ तमी[26]र्षया ॥ १९३ ॥

राजानं कुपिते[27] तन्वा(न्व्यौ) प्रतिकान्तावलोकिनम् ।
एवमान्दो[28]लनक्रीडा प्रोक्ता सोममही[29]भुजा ॥ १९४ ॥

[इति आन्दोलनक्रीडा ॥ ३ ॥]

[30]इदानीं सैव(सेच)न क्रीडां(डा) वक्ष(क्ष्य)ते लक्ष्यलक्ष्मतः ।
वसन्तस्योत्सवे वाथ विवाहाद्युत्सवेषु च ॥ १९५ ॥

जये वा[31] सेव(च)नक्रीडां कुर्याद्रा[32]जा मुदान्वितः ।
निर्व[33]र्त्य भोजनं राजा [34]व्यतीते प्रहरद्वये[35] ॥ १९६ ॥

समा[36]हूय मही[37]पालः प्रतिहारपुरः[38]सरैः ।
कुमारान्म[39]ण्डलाधीशान् सामन्तान्मान्यकान्बहून् ॥ १९७ ॥

---

१. A. यंत्य । २. A. ग । ३. A. त्स्ने हवांवुधी । ४. A. लयंत्यावितस्ततः । ५. D. drops this line । ६. A. ईव । ७. A. प । ८. A. मार्गांगांगो । ९. A. क्र । १०. A. व्यु । ११. A. ता । १२. A. किध्वनिसंस्व । १३. A. स्व । १४. A. दं । १५. A. ख । १६. A. शृंगारस । १७. A. यंत्य । १८. A. नै । १९. A. आंहोलइरजाकर्षात्यौ तनुग्यौ । २०. D. न्त्यो । २१. D. न्वंग्यो । २२. A. सपत्यौ । २३ A. न्सस्यदिवरा D. दिवि । २४. A. वि । २५. A. कपदभ्यं । २६. A. ष्यया । २७. A. ते तन्वो । २८. A. धो । २९. A. हिभू । ३०. D. इदानीं सेवनक्रीडां कुर्याद्राजा मुदान्वितः । ३१. A. चा सेचन । ३२. A. त्सेवनपूर्विकां । ३३. A. वर्त्य । ३४. A. वाति । ३५. A. यो । ३६. A. हुवे । ३७. A. हि । ३८. A. रस्स । ३९. A. मंडलघिन्सा सामन्ता ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुरोहितं तथा विन्द्या[1]त्स(ज्ञान्स)[2]चिवामात्यमन्त्रिणः ।
सुभटान्न[3]यसम्पन्ना[4]न् सेवाधर्मविशार[5]दान् ॥ १९८ ॥

वि(चि)त्तज्ञान् धर्मसचिवान् धनिनश्च महाधनान् ।
कवीन् सग(ङ्ग)म[6]कांश्चैव वादिनो वाग्मिनस्तथा ॥ १९९ ॥

वा(ग्गे)यकारान् गीत[7]ज्ञान् नृत्यवाद्यादिकोविदान् ।
वैतालिका[8](कां) श्चारणा(णां)श्च सूतमागधवन्दिनः ॥ २०० ॥

प्रसादचित्तकानन्यान् सितव[9]स्त्रविभूषितान् ।
हे[10]मालङ्कारसंयुक्ता[11]न् पुष्पमालो[12]पशोभितान् ॥ २०१ ॥

श्रीखण्डतिलकोपेतानागतानुपवेशयेत् ।
मण्डपे च सुविस्ती[13]र्णे कि(क)श्चित्कालं यथार्हतः[14] ॥ २०२ ॥

ततो [15]वारविलासिन्यः शृङ्गाररसमू[16]र्तयः ।
अन्तःपुरपुरन्ध्र्यश्च तथा शुद्धान्तयोषितः ॥ २०३ ॥

तन्वङ्ग्यश्च तरुण्यश्च पीनवृत्तपयोधराः ।
पूर्णेन्दुवद[17]नाः कान्ताः इया[18]माश्चारुविलोचनाः ॥ २०४ ॥

मरालगमनारामाः [19]कुन्तलैर्जितषट्पदाः[20] ।
कोकिलालापमधुरा घननी[21]लशिरोरुहाः[22] ॥ २०५ ॥

मृणालबाहु[23]लतिका रक्ताम्भोजनिभाङ्घ्रयः[24] ।
सितकञ्चुकधारिण्यः कनके[25]नातिभूषिताः ॥ २०६ ॥

सौवर्णपुष्पद(व)न्ताढ्या हेमकेतकराजिताः[26] ।
सौवर्णहंसतिलका रुक्मता[27]डङ्कशोभिताः ॥ २०७ ॥

---

१. A. द्या । २. A. वि । ३. A. न । ४. A. न्नासे । ५. A, दा । ६. A. का । ७. A. ज्ञानृत । ८. A. काश्चसूनमागवबंदिना । ९. D. ल्यादिभूषणान् । १०. A. सा । ११. A क्तं । १२. A. लोपशोता D. ल्योप । १३. A. स्तिर्ण । १४. A. त । १५. A. व । १६. A. मु । १७. A. दाकान्ता । १८. A. स्यामाचारु । १९. A. कुत । २०. A. दा । २१. A. नि । २२. A. हा । २३. A. हुतिका । २४. D. भांघ्रा । २५. A. कांगितभूषिता । २६. A. ता । २७. D. तांडव ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कर्पूरमणिहाराश्च [1]शृङ्खलब्रह्मसूत्रिकाः ।
कनका(त्का)श्चनरो[2]चिष्णु[3]चूडकैः समलङ्कृताः ॥ २०८ ॥
[4]कटकैर्नूपुरैश्चैव किङ्किणीमण्डिताङ्घ्रिकाः ।
हरि(हिर)ण्यर[5]चनोदारका[6]श्चीदाममनोहराः ॥ २०९ ॥
सितवस्त्रपरी[7]धानाः [8]कुङ्कुमेन सुचर्चिताः ।
भूलोक प्रा(काप्स)रसाः[9] किं वा बाह्या वा रति[10]मूर्तयः ॥२१०॥
गृहीत[11] विग्रहाः किं वा नराणां चित्त[12]वृत्तयः ।
रागाधिदेवताः[13] किं वा शृङ्गाररसमा[14]तरः ॥ २११ ॥
एवं वितर्क्यमाणास्ताः प्रविशेयुर्नृपालयम् ।
परिचा(वा)र्य नृपं सर्वास्त[15]न्मुखालोकनोद्यताः[16] ॥ २१२ ॥
लीलयोपविशे[17]युक्ताः (स्ताः)प्रीतिसागरचन्द्रिकाः[18] ।
[19]हेमशृ(कू)र्परकान् राजा विशालांश्च जलाशयान् ॥ २१३ ॥
पूरयेन्निर्मला[20]म्भोभिः कुङ्कुमक्षोदमिश्रि[21]तैः ।
श्रीखण्डकल्कसंयुक्तैः[22] कस्तूरी[23]पङ्कसंयुतैः ॥ २१४ ॥
कर्पूरसौ[24]रभोपे[25]तैर्नानागरुसमन्वितैः ।
[26]मल्लिकामाधवी[27]पुष्पैरु[28]त्पलैः कमलैस्तथा ॥ २१५ ॥
पाटलाशतपत्रैश्च सुगन्धिकरवीरकैः ।
[29]छादितैः शीतलैस्तोयैर्वासिसा[30]कारि(परि)गुच्छि(ण्ठि)तैः
(तान्) ॥ २१६ ॥
[31]पूरितान्कू[32]र्परान्राजा पङ्क्तिस्था(स्थां)स्तान् विधारयेत् ।
सौवर्णरौप्यशृङ्गाणि शृङ्गाणि गव[33]यस्य च ॥ २१७ ॥

---

१. A. संखल । २. A. रों । ३. D. ष्णुः । ४. A. कंटकोनूपुरैश्चैव किंकोनूपुरैश्चैव किं किणीमंडीतांघ्रिकाः । ५. D. इवनो । ६. A. कोचिदासा । ७. A. राधानां । ८. A. कुमेन-सुचर्चिताः । ९. A. रसा । १०. A. मुर्त्तया । ११. A. हित । १२. A. ततयः । १३. A. ताकिंच । १४. A. तूरा । १५. A. स्तंन्मु । १६. A. ता । १७. A. युः प्रीति । १८. A. का । १९. A. हिमशूर्प्परकान् । २०. A. लांभा । २१. A. श्री । २२. A. क्तेकंस्तू । २३. A. पंकसंयै । २४. A. सो । २५. A. पै तैर्नान्तिगंध । २६. A. प । २७. A. वि । २८. A. ष्पैसत्पलैक । २९. A. व्य । ३० A. साकाकारयुच्यते । ३१, A, पु । ३२. A. न्कुप्परा जा पंक्तिस्थास्वात्विधारयेत् । ३३. A. यद ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विवि[1]धानि च यन्त्राणि तोयधारावहानि च ।
सौवर्ण[2]गडुकांश्चैव दद्याद्धस्ते[3]न(षु) योषिताम् ॥ २१८ ॥

शुभ्रवस्त्रपरीधाना(नः) कर्पूरा[4]गरुवासिताः (तः) ।
मल्लिशेखरसंयुक्त(क्तः) शशि(शी) तारक(रावि) भूषिताः[5]
(तः) ॥ २१९ ॥

अङ्गवान्[6] मदनः किं वा वसन्तो वा सविग्रहः[7] ।
उ[8]त्सवस्यान्दि(दि)देवो वा शृङ्गारनि[9]लयोऽथ वा ॥ २२० ॥

इत्येवमूह्यमानोऽसावुत्तिष्ठेन्नृपतिस्ततः[10] ।
महता तूर्यघोषेण संवृतस्तु[11] मितै[12]र्जनैः ॥ २२१ ॥

सलि(ली)लं कूर्परस्थाना(न)[13]मागच्छेत्पृ[14]थिवीपतिः[15] ।
शृङ्गाण्यापूर्य[16] सलिलै[17]र्जलयन्त्राणि गण्डुकान् ॥ २२२ ॥

[18]सिञ्चन्ति प्रमदाः[19] कान्ता राजानं प्रीत[20] मानसाः ।
कुङ्कुमारुणि[21] तैस्तोयैः श्रीखण्डधवलैर्जलैः[22] ॥ २२३ ॥

कस्तूरीश्यामलैर्नीरै[23]रिद्रापिङ्गै[24]र्वनैः ।
प्रसि[25]ञ्चेत्सेवकान्राजा प[26]र्जन्य इव मूर्तिमान् ॥ २२४ ॥

अमृतै[27]र्नन्दयेत्प्रीत्या[28] लोकानिन्द्र इवापरः ।
पुष्पाणि [29]विकिरेत्तेषां मस्तकेषु मुदान्वि[30]तः ॥ २२५ ॥

उदार[31]चरितो राजा राजते कल्पवृक्ष[32]वत् ।
[33]मृदु[34]भिः [35]कन्दुकैर्वृत्तैःपट्टसू[36]त्रविनिर्मितैः ॥ २२६ ॥

सन्धि[37](ली)लं ताडयेत्कान्ता (:) पुष्पायुध इवोद्यतः[38] ।
द्रावयेत्कठिनं चेतित्व[39]यां (चेतस्त्वासां) प्रक्षालयन्निव ॥ २२७ ॥

---

१. A. व । २. D. गण्डुकां । ३. A. स्तेंन । ४. A. रपेतहातका । ५. A. ता । ६. A. हा । ७. A. त्सवस्यादिदेवौ । ८. A. तिलथवा । ९. A. ता । १०. A. स्तं । ११. A. तेजनः । १२. A. दा । १३. A. नृ । १४. A. ति । १५. A वं । १६. A. तै । १७. A. सिंचति । १८. A. दा । १९. D. ति । २०. A. चि । २१. A. लै । २२. A. वैंनै । २३. A. तिसिञ्चत्से । २४. A. र्यन्य इति । २५. A . नुंद । २६. A. स्य । २७. A. वीकरेतेषां । २८. A. चि । २९. A. चिर । ३०. A. क्षववत् । ३१. A. म । ३२. A. कंटुकवृ । ३३. A. मूसू । ३४. A. वि । ३५. A. त । ३६. A. रत्पपांप्राक्षाल ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रसि[1]श्चेत्तरुणीवृन्दं व[2]र्धयेत्प्रेमवल्लरी (रीम्)।
आलिङ्गति प्रियं [3]काचित्करं काचिद्विकर्षति ॥ २२८ ॥

अञ्च[4]लं काचिदाध(द)त्ते [5]काचिद् गृह्णाति खोप(म्प)कम्।
आकुलि[6]क(लीक्रि)यते राजा ताभिरेवं समन्ततः ॥ २२९ ॥

सौभाग्यो[7]त्कर्षहर्षेण रोमाञ्चाञ्चितविग्रहः[8]।
इत्येवं सेव(च)नक्रीडा (डां) कृत्वाऽसौ लील[9]या नृपः ॥ २३० ॥

विरमेत्तु[10] ततो राजा मन्दीभूते दिवाकरे।
क्रीडार्द्रवस्त्रं सन्त्यज्य परिधाय वराम्बरम् ॥ २३१ ॥

रत्नाभर[12]णशोभाढ्यस्तिष्ठेत्सिंहासने नृपः[13]।
वस्त्राणि काञ्चनं रत्नं भूष[14]णानि पृथक् पृथक् ॥ २३२ ॥

यथार्हमानसंयुक्तं दत्त्वा सर्वान् विस[15]र्जयेत्।
इत्येवं सेव(च)नक्रीडा वर्णिता सोमभूभु[16]जा ॥ २३३ ॥

रा[17]ज्ञां प्रीतिकरी नित्यं शत्रुवृन्दनिषूदिनाम्।

[इति सेव(च)नक्रीडा ॥ ४ ॥]

साम्प्रतं सलिलक्रीडा कथ्यतेऽतिमनोहरा ॥ २३४ ॥

निदाघे समनुप्राप्ते चण्डे मार्तण्डमण्डले।
शीतापेक्ष्य[18](क्ष)पिपासा[19]र्तस[20]न्तप्तजगती[21]जने ॥ २३५ ॥

नि[22]ष्पत्रकाननेऽत्यर्थं सन्तप्तधरणीतले।
उ(ऊ)ष्णमारुतसङ्कीर्णमृगतृष्णाकुलस्थले ॥ २३६ ॥

कीच[23]काघृष्ट(ष्टि) सम्भूतदावाग्नि परितापिनि।
भ्र[24]मदी(द्री)र्घरजोवा[25]ते परिशुष्कज[26]लाशये ॥ २३७ ॥

---

१. A. सिचेत । २. A. द्धयेप्रेमवल्लरा । ३. A. कांचिकरंकांचिविकर्षा । ४. A. व । ५. A. ते । ६. A. कांविद्गृह्णापिखोपकं । ७. A. लः प्रीय । ८. A. म्यैकर्षहर्षणे । ९. A. ह । १०. A. लंया । ११. A. पिंजरं द्योते मन्दि । १२. A. रसौभाद्यातिष्ठेंसंहासने । १३. A. प । १४. A. णांनि पृथक् । १५. A. वजेयेत् । १६. A. भू । १७. A. drops this line । १८. A. क्ष्या । १९. A. शा । २०. D. संकीर्णमृगसंकुले । २१. A. ति । २२. D. drops this sloka । २३. A. वकाग्रघृसंभूता । २४. A. भ्रम । २५. D. पेते । २६. A. कु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुर्वते(र्वीत) सलिलक्रीडां क्रीडावाप्यां महीपतिः ।
नद्यां वा पुष्करिण्यां वा कण्ठदघ्नामलाम्भसि ॥ २३८ ॥

चतुरस्रा सुवृत्ता वा रम्या सोपानभूषिता ।
सुधाधवलिता श्लक्ष्णा क्रीडावापी मनोहरा । २३९ ॥

प्राकारैर्वेष्टितैर्वा(ता वा)न्या सुधागेहते(हैस्त)थापि वा ।
चित्रकाण्डपटैर्वापि वृक्षैर्वा सुमनोहरैः ॥ २४० ॥

वितानेन विचित्रेण शोभितातिविभूषिता ।
आल्हादे(द)जनिका चित्ते कायसन्तापहारिणी ॥ २४१ ॥

ह्र(अ)रघट्टप्रवाहैर्वा तोयैर्वैवधिकाहृतैः ।
कलशैश्चर्मभाण्डैश्च वस्त्रपूतैः प्रपूरयेत् ॥ २४२ ॥

मत्स्यान् कण्टकहीना(नां)श्च तासु(तस्यां) वाप्यां विनिक्षिपेत् ।
मरालांश्च क्रवाकांश्च स्थापयेत्तत्र वारिणि ॥ २४३ ॥

आहूय तरुणी(:)कान्ताश्चित्तज्ञाश्च मनोहराः ।
सितवस्त्र परिधानाः कुम्कुमेन विलेपिताः ॥ २४४ ॥

कनका(त्का) श्चनभूषाढ्याः पुष्पदण्डकमण्डिताः ।
प्रेयसीश्चतुरास्तन्वीर्भावहावसमन्विताः ॥ २४५ ॥

प्रसादचित्तकान्नन्यान् पितापुत्रपुरोहितान् ।
श्वेताम्बरपरीधानान् बुधाचारनयान्वितान् ॥ २४६ ॥

सार्धयामद्वयादूर्ध्वं क्रीडावापीमुपेत्य च ।
कृत्वा च मण्डनं शुभ्रं हेमभूषणभूषितः ॥ २४७ ॥

---

१. A. र्वंति । २. A. ड्क्रीडांवाप्या । ३. A रिकण्ठदघा मलांभसि । ४ A. लिश्ल । ५. A. क्रिडावापि । ६. A. र्वासुमनोहरेः । ७. A. सोपविष्टाद्विभूषिता । ८. D. बहु । ९. A. ण । १०. D. ट । ११. A. शु । १२. A. ते । १३. A. त्स्याकंट । १४. A. हानाश्च । १५. A. तास्पाद्या विनि । १६. A. श्च । १७. A. काश्च । १८. A. णा । १९. A. श्वितज्ञाश्च । २०. A. रा । २१. A. स्त्रापरिधाना । २२. D. कांचित । २३. A. सूषाढ्या । २४. A. त । २५. A. सि । २६. A. त्तन्विर्भा । २७. A. कागून्ययामिता । २८. A. ता । २९. A. दुर्ध्वषीडा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुष्पाणि विकिरेत्त[1]त्र कर्पूरस(श) कलानि च ।
नृ[2]पतिः प्रवि[3]शेत् पूर्वं क्रीडार्थं सुविचक्षणः[4] ॥ २४८ ॥

आकृष्य [5]कामिनीः काश्चित् काश्चिदालिङ्ग्य कामिनी(नीः) ।
काश्चित्स्क[6]न्धं समारोप्य काश्चिदंशु[7]ककर्षणात् ॥ २४९ ॥

हस्तावलम्ब[8]नैः काश्चित्काश्चित्प्रेमविलोक[9]नैः ।
सन्मानभाव[10]तः काश्चित्प्रवेश्य निजयोषितः ॥ २५० ॥

ततस्तथागताः[11] स[12]र्वास्तोयक्रीडनकोविदैः[13] ।
प्रवेश[14]येन्मही[15]पालः क्रीडा[16]वापीं सुशीतलाम् ॥ २५१ ॥

ततो वारि[17]स्थितं स[18]र्वं कर्पू[19]रशकलं बहु ।
अहंपूर्विकया पूर्वे (र्वं) गृह्णन्ति[20] सलिलस्थिताः ॥ २५२ ॥

शुद्धकाञ्चननिष्काणि रत्नानि विविधानि च ।
तेषां समक्षं विकिरेद्[21] ग्रहार्थं च महीपतिः ॥ २५३ ॥

त[22]त्तस्तोये नि[23]मज्जन्ति भूयो भूयः प्रलोभिता(ः)[24] ।
तेषामुत्सु[25]कतां पश्येत् प्रेयसी[26]भिः समन्वितः ॥ २५४ ॥

विमुञ्च[27]न्ति(श्चित) पृथक्[28] श्वासांस्तथा श्रमसमाकुलान् ।
विकीर्णमूर्धजा[29]न् सर्वान् (ञ्) ज[30]नांल्लोहितलोचनान् ॥ २५५ ॥

प्राप्तानि रत्ननिष्का[31]णि मुखे निक्षिप्य तत्त[32](तांस्त) था ।
पुनश्च लोचनोन्मग्ना[33]न् दृष्ट्वा हास्यसमन्वितः ॥ २५६ ॥

प्रियामुखं समालोक्य हर्षनिर्भरमानसः[34] ।
आनन्दं परमं प्राप्य तो[35]यात् सर्वान् विसर्जयेत् ॥ २५७ ॥

---

१. A. त । २. A. भू । ३. A. वशेन् । ४. A. ण । ५. A. नीयकात्कांश्चिकांश्चदा-लिग्यकामिनि । ६. A. त्स्कंव । ७. A. श्रु । ८. A. नै । ९. A. नै । १०. A. षणैकाश्चीन-प्रवेश्य । ११. A. तान् । १२. A. र्वा । १३. A. दै । १४. A. स । १५. A. हि । १६. A. ङांवापिशुशि । १७. A. वासि । १८. A. र्वं । १९. A. पूर्वरश । २०. A. न्निसले । २१. D. त् । २२. D. निमज्जतिततस्तोये । २३. A. नर्मजंति । २४. D. तः । २५. D. त्प्रवतां । २६. A. सा । २७. A. चित । २८. A. न्श्वाशस्तथा । २९. A· जास । ३०. A. नालोचना । ३१. A. का । ३२. A, स्त । ३३. A. ग्रा । ३४. A. स । ३५. D. ततः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततस्तरुण्यः[1] प्रमदाः[2] प्रेमनिर्भरमानसाः[3] ।
राज[4]न्ते सह भूपेन सिन्धुना सरितो[5] यथा ॥ २५८ ॥

करिण्यो दिग्ग[6]जेनै(ने)व [7]शक्रेणै(णे)वाप्सरसो(रो)गणः[8] ।
गोप्यो[9] वा वासुदेवेन यथा चन्द्रेण तारकाः[10] ॥ २५९ ॥

तोयमध्यस्थिताः[11] [12]कान्ताः पद्मिन्य इव जङ्गमाः[13] ।
मुखपद्मेन शोभन्ते कण्ठदघ्ने जले शुभे ॥ २६० ॥

मुक्ताविडम्बिभिस्तोयैः[14] सिञ्चन्ति पृथिवीपति[15]म् ।
पुष्पैश्च ताडयन्त्येताः कामबाणैरिव प्रि[16]यम् ॥ २६१ ॥

[17]गम्भीरशङ्कया काश्च कण्ठमालिङ्ग्य भूपति[18]म् ।
लभन्ते [19]सुखमत्यर्थउ(र्थमु)पगूहनसम्भवम् ॥ २६२ ॥

मत्स्यसंस्पर्शसम्भूतभीताः[20] (त्या)काश्चिद्वरा[21]ननाः ।
आलि[22]ङ्ग्य पृथिवीपालं चित्तस्थं सुखमाप्नुयुः ॥ २६३ ॥

विस्तीर्णनयनप्रान्तकज्जलोन्मज्ज[23](न्मार्ज)नच्छ[24]लात् ।
पिधा[25]य नेत्रे कस्याश्चिद्विलासैर्वीक्षते परा[26] ॥ २६४ ॥

पादसङ्घट्टना[27]देकामे[28]कां कुचनिपीडनात् ।
नीवीकर्षणदेशांकां(सङ्कर्षणादेकां)काममुल्लासयेन्नृपः ॥ २६५ ॥

पद्म[29]भ्रान्त्या मया तस्या आघातं मुखपङ्क[30]जम् ।
त्वं प्रिया मम तन्वङ्गि न कोपं कर्तुमर्हसि ॥ २६६ ॥

चक्रवाकमिति ज्ञात्वा कुङ्कुमारुणितं [31]तनुम् (स्तनम्) ।
धृतवानस्मि सुश्रोणि मा भूस्त्वं[32] कुपिता प्रिये[33] ॥ २६७ ॥

---

१. A. ण्य । २. A. दा । ३. A. सा । ४. A. जंते । ५. A. ता । ६. A. गजो । ७. A. श्रा । ८. A. णा । ९. A. प्य । १०. A. का । ११. A. ता । १२. A. कांता । १३. A. म । १४. A. यै । १५. A. ति । १६. A. प्री । १७. D. drops this line । १८. A. ति । १९. A. सुमत्यर्थेमु । २०. A. नाः । २१. A. ना । २२. A. लिग्य । २३. A. र्जन । २४. A. छलान् । २५. A. ध्यपिनेत्र । २६. A. राः । २७. A. मेकांकुचनिपीडनात् । २८. D. एका । २९. A. भ्यांत्या । ३०. A. जाम् । ३१. A. स्व । ३२. A. स्त्व । ३३. A. यो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इतः[1](ति) प्रियतमाः[2] सर्वाः स्पर्शालोकनजल्पनैः[3] ।
आल्हादये[4](य)न्महीपालो जलकेलिं[5] प्रवृत्त(वर्त)येत् ॥ २६८ ॥

च[6]क्रवाकक[7]चा(:)कान्ता(:)स[8]श्चलन्मीनलोचना(:) ।
विकासिवदनाम्भोजा मृणालभुजवल्लरी[9](यः) ॥ २६९ ॥

निम्न[10] नाभिधृतावर्ता[11] लावण्यरसवापिनी (काः) ।
नरेन्द्रमानसाम्भोधि(धिं) वर्धयन्ति स्व[12]सङ्गमैः ॥ २७० ॥

अनुरागरसे मग्नो[13] जलमध्ये वसन्नपि ।
प्रेयसी[14]र्मज्जयेद्राजा शृङ्गाररसभाविताः[15] ॥ २७१ ॥

हस्तेनास्फालयित्वा[16] तु वुधे (भुजे) नावोढ (लोड)यञ्जलम् ।
सिञ्चन्नञ्जलिना तोये(यं) निमज्ज[17]त्स(न्स)लिलं(ले) मुहुः ॥ २७२ ॥

स[18]तंसंनु (मन्तरन्नु)दके दोर्भ्यां(र्भ्यां) तारयन्नमणीजनम् ।
शयानः [19]सलिले भूपः[20] शय्यायामिव लीलया ॥ २७३ ॥

इति नानाविधैर्भावैः[21] क्री[22]डावाप्यां नरेश्व[23]रः ।
नद्यां[24] (वा) पुष्करिण्यां वा जले (ल) के[25]लिप्रवृत्तये (लिं प्रवर्तयेत्) ॥ २७४ ॥

निव(र्व) [26]र्त्य सलिलक्रीडां कि[27]ञ्चिच्छिष्टे च वासरे ।
निर्गत्य सलिलाद्राजा धारयेद्वरवाससी[28] ॥ २७५ ॥

कुङ्कुमद्रव यु[29]क्तेन लेपनेन विलेपितः[30] ।
गात्रं[31] चन्दनचर्चाभि[32]र्मण्डयेत्सुविचक्षणः ॥ २७६ ॥

स्थूलमुक्ता[33]कृतं हारं [34]कृत्वा कण्ठविभूषणम् ।
मल्लिचम्पकहाराभिः[35](रेण)कृत्वा शे[36]खरमुत्त[37]मम् ॥ २७७ ॥

---

१. A. तप्र । २. A. मा । ३. A. नै । ४. A. यम । ५. A. लि । ६. A. वक्र । ७. A. क । ८. A. संव । ९. A. रि । १०. A. म्ने । ११. A. र्त । १२. A. श्वसंगमै । १३. A. ध्येवसन्नपि । १४. A. सिम । १५. A. ता । १६. A. त्वांवु । १७. A. ज्जंस । १८. D. drops this line । १९. A. श । २०. A. पनासय्याया । २१. A. वै । २२. A. क्रीवाप्यां । २३. A. स्वरा । २४. D. द्यां पुष्क । २५. A. केलिकेलिप्रवृर्त्तये । २६. A. र्तं । २७. A. किंचिच्छिष्टे । २८. A. सि । २९. A. युक्तेन लेपनेन नवा D. लेपेन युक्तेन च । ३०. A. त । ३१. A. त्र । ३२. A. मंडये । ३३. A. क्र । ३४. A. तस्या कंठ । ३५. A. भि । ३६. A. ष । ३७. A. रम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्राङ्गणे चैव[1] स्थित्वा च [2]शय्यायामुपविश्य च ।
रम्यशृङ्गारयुक्ताभिः[3] प्रियाभिः[4] परिवेष्टितम् (तः) ॥ २७८ ॥

जलकेलिसहायेभ्यः[5] प्रदद्याद्विविधं[6] धनम् ।
प्रेयसीभ्यस्तथा दद्याच्चीनपट्टादिकं[7] बहु ॥ २७९ ॥

एवं [8]शृङ्गारसंयुक्ता तोयक्रीडा निरूपिता ।

[इति तोयक्रीडा ॥ ५ ॥]

इदानीं शाद्वलक्रीडा कथ्यते सोमभूभुजा ॥ २८० ॥

अञ्जनाद्रि[10]समाभासे गज[11]यूथसमाकुलौ ।
[12]कामाग्निधूमसन्दोहसन्निभे मेद(घ)सञ्चये ॥ २८१ ॥

कन्दर्परथनिर्घोषे मत्तेभगलव(ग)र्जिते ।
घनाघनरवे रम्ये केकारवसमन्विते ॥ २८२ ॥

मन्मथासि[13]लताकारभास्वच्च[14]ञ्चलविद्युति ।
कुसुमास्त्रसमु[15]त्कृ(माकृ)ष्टपुष्पसन्निभव[16]र्षिणि (र्षणे)
॥ २८३ ॥

शक्रायुधसमुद्भूत[17]नानावर्णविशालकं ।
[18]अम्बरं परिधायेव दिग्ब[19]धु(वधू)भिर्वि[20]राज (जि) ते ॥ २८४ ॥

कदम्बकेतकीगन्ध[21] वासनापरिवा[22]सिते ।
पश्चिमाशा[23]पतिस्पर्शशीतमारुत[24]योगिनि ॥ २८५ ॥

वातका(आतपा)र्तिहरे रम्ये मधुरामो[25]दवर्धने ।
मरालवृन्दसं[26]वासे प्रावृट्काले समागते ॥ २८६ ॥

[27]नीलपट्टपरिव्यस्ते(स्ता) माणिक्यैरिव भूरिभिः[28] ।
इन्द्रगोप(पैः) समा[29]कीर्णा राजते शाद्वलस्थली ॥ २८७ ॥

---

१. A. वा स्थित्वा च D. वयित्वा च । २. A. स्स । ३. A. भि । ४. A. भि । ५. A. भ्य व्र । ६. A. बंधनम् । ७. A. व्वी । ८. A. क । ९. A. शृंर संयुक्त । १०. A. द्रा । ११. A. मत्तेभगजवर्जिते । १२. A. drops these two lines । १३. D. शी । १४. A. चंवल । १५. A. मकृ । १६. A. र्षणा । १७. D. ता । १८. A. अरं । १९. D. ग्बंधु । २०. A. वि । २१. D. मध्ये । २२. A. सते । २३. A. सा । २४. A. तंयोगि । २५. A. मे । २६. A. तासे । २७. A. नि । २८. A. भि । २९. A. मकारण ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]एवंविधप्रदेशेषु रम्येषु पृथि[2]वीश्व[3]रः ।
कु[4]र्वीत शाद्वलक्रीडां रामा[5] जनमनोहराम् ॥ २८८ ॥

कौ[6]सुभ(म्भ)रञ्जितैर्वस्त्रैस्ततकाण्ड[7]पटैः शु[8]भैः[9] ।
वेष्टयेच्छाद्वले(लं) देशं समन्ताद्[10]ध्वसंस्थितैः[11] ॥ २८९ ॥

स्थाने स्थाने च संस्थाप्या वीण[12](वेणु)काश्चित्रवर्णकाः[13] ।
एते[14] [15]गौरिकरागाद्याः[16](ख्याः) पट्टकुट्टैः[17](टयो) मनोहराः[18]॥२९०॥

प्रभाते च[19] समुत्थाय कृतपूर्वाह्णिकक्रियः[20] ।
ततः सम्भृतशृङ्गारः[21] प्रेयसीजनसं[22]वृतः ॥ २९१ ॥

आहूय करिणीवृन्दं हेमघण्टानिनादितम् ।
मस्तकन्यस्तसिन्दूरं पुष्पकैरुपशोभितम् ॥ २९२ ॥

अश्वान्[23] मनोहरान् भव्यान् लालित्यगतिशोभितान् ।
हेमपर्याणकैर्युक्तान् किङ्किणीस्वरञ्जितान् ॥ २९३ ॥

आरोहेद्वस्तिनीं राजा निजपार्श्वे प्रियान्वितः ।
[24]अन्तःपुरपुरन्ध्रीश(श्च)द(व)शास्वारोहयेत्क[25]मात् ॥ २९४ ॥

ततो विलासिनी[26]वृन्दमश्वानारोहये[27]न्नृपः ।
गायकी [28]न(कीर्न)र्तकी चै(श्चै)व वरवाराङ्गनास्तथा ॥ २९५ ॥

ततः [29]शनैः शनैर्गच्छेल्लीलया शाद्वलस्थलम् ।
निवार्य चेतरं लोकं विशे[30]त्काण्डपटान्तरम् ॥ २९६ ॥

उपवे[31]श्य[32] वशां वश्यामवतीर्य मही[33]पतिः ।
ततोऽवतारयेत्पश्चात्प्रियाः शुद्धान्तयोषि[34]तः ॥ २९७ ॥

---

१. A. ग । २. A. थ । ३. A. बरः । ४. A. र्व्वी । ५. A. जम । ६. A. सं. । ७. A. पंडै । ८. A. भै । ९. A. दु । १०. A. तै । ११. D. णा । १२. A. का । १३. A. तै । १४. A. गौ । १५. A. द्या । १६. A. ज्यो । १७. D. रा । १८. A. व । १९. A. यते । २०. A. र । २१. A. संवृ । २२. A. श्वामनोहराभवान् । २३. D. drops this line । २४. A. कु । २५. A. निवृंदा D. नीवृंदमश्वनां । २६. A. नृप । २७. A. नृर्तकीचै । २८. A. शनैर्गच्छेत् । २९. A. कंड । ३०. A. वै । ३१. A. श्यशाववस्या । ३२. A. हिपति । ३३. A. गि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रस्थापयेत्ततो राजा वीण[1] (वेणु)कासु कुटीषु च ।
विलासिनी[2]जनं राजा प्रेषयेत् प्रेयसीपतिः[3] ॥ २९८ ॥

आसवान् विविधान् हृद्यान्[4] भक्ष्यं भोज्यं मनोहरम् ।
कुसुमानि [5]सुगन्धीनि ताम्बूलमनुलेपनम् ॥ २९९ ॥

वसनानि सुरत्नानि भूषणानि पृथक् पृथक् ।
[6]प्रस्थापयेत्प्रेयसीभ्यः प्रेममानानुसारतः ॥ ३०० ॥

ततः स्वयं च [7]भुञ्जीत पुत्रैर्मित्रैः[8] समन्वितैः ।
भृत्यैः प्रसाद[9]चित्तैश्च स्वादु हृद्यं च भोजन[10]म् ॥ ३०१ ॥

निवृ[11]त्य(र्वर्त्य)भोजनं [12]पश्चादुच्छिष्टमपहाय[13](र्य) च ।
उपविश्य शुचौ देशे ततः शृङ्गारमा[14]चरेत् ॥ ३०२ ॥

चन्दनं [15]शशिना युक्तं घुसृणं[16] मसृणं लघु ।
आदाय गात्रमालि[17]म्पेदंछ(दच्छं) शोभासमन्वितम् । ३०३ ॥

परिधाया[18]म्बरं पीतं मुक्ताभरणभूषितम् (तः) ।
कृत्वा श्रीखण्डतिलकं कस्तू[19]रीमेचकाञ्चितम् ॥ ३०४ ॥

रत्नमस्तकभूषाढ्य[20](ढ्यः)केतकीपत्रशे[21]खरम् (रः) ।
आहूयेच (य च)ततः कान्ता र[22]त्नशृङ्गार[23]रञ्जिताः ॥ ३०५ ॥

महारजतसिन्दूरलाक्षारञ्जितवाससः[24] ।
कुङ्कुमालिप्तगात्राश्च [25]वर्णदण्डकमण्डिताः ॥ ३०६ ॥

हारैः पञ्चश(स)रैः शुभ्रैः स्थूलमुक्ताफलोज्व[26](ज्ज्व)लैः ।
कण्ठभूषाश(स)रैश्चैव मुक्ताचूडकमण्डनैः ॥ ३०७)

---

१. A. णे । २. A. नि । ३. A. ति । ४. A. रभक्षं । ५. A. सुमाति सुगंध तांबूल । ६. A. drops this पाद i.e. प्रस्तापयेत्प्रेयसीभ्यः । ७. A. भूजी । ८. A. त्रे । ९. A. वितैश्च । १०. A. नाम् । ११. A. वृं । १२ A. राजा । १३. A. र्चया । १४. A. माचमाचरेत् । D. माहरेत् । १५. A. शं । १६. A. णंतघु । १७. A. लिषे D. लिंपेदच्छ । १८. A. यावंरपि । १९. A. स्तुरीमेव । २०. A. द्य । २१. A. व । २२. A. त्नां । २३ A. रजिता । २४. A. सा । २५. A. वर्णे । २६. A. ग्व ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुक्तामयैश्च कटकैर्मु(र्मु)क्तासीमन्तभूषणैः[2] ।
मुक्ताताटङ्कपत्रैश्च मुक्तामुकुलमण्डलैः (नैः) ॥ ३०८ ॥

भूषिताः[3] शोभमानाश्च[4] रक्ता रक्ताम्बरप्रियाः ।
रागाधिदेवताः साक्षादागताः कृतविग्रहाः ॥ ३०९ ॥

परिवार्य नृपं सर्वा[5]स्तिष्ठेयुर्लीलया मुदा ।
मातङ्गगायकी[6]वृन्दं गापये[7]द्दूरतो नृप (पः) ॥ ३१० ॥

[8]वादयेत्त्रिवली[9]तूर्य (र्यं) नानाभङ्ग(ङ्गि)मनोहरम् ।
वृत्त(र्त)येन्नृत्त[10]कुशलाः [11]कान्ता(न्ताः) प्रणयवल्ल[12]रीः ॥३११॥

दद्य[13](द्या)च्चण्डालवृन्दश्च(न्दाय) काञ्चनं वसनं बहु ।
विसर्जयेत्ततो [14]वृन्दं मातङ्गकुलद्[15]षितम् ॥ ३१२ ॥

प्रेयसीनां[16] ततो दद्याद् दिव्यवा[17]सांसि काञ्चनम् ।
भूषणानि विचित्राणि ताम्बूलञ्च मुख[18]स्थितम् ॥ ३१३ ॥

समुत्थाय ततो राजा मन्दरश्मौ[19] दिवाकरे ।
अनाप्यं[20] (आनाय्य) गजवेदण्डं हेम्ना बद्धरदद्वयम् ॥ ३१४ ॥

सौवर्णघटि (ण्टि)कायुक्तं रुक्मक[21]क्षाविराजितम् ।
[22]कौसुम्भवसनच्छन्नं वीरकक्षासुशोभितम् ॥ ३१५ ॥

दीना(निदा)ना[23]वग्रहस्थाने सिन्दूररसरञ्जितम् ।
हरिद्राशालिपिष्टेन सेचितं मुखमण्डले ॥ ३१६ ॥

गात्राप(व)रे मस्तके च तैलेनालिप्तपेचकम् ।
आरुह्यैकासनं राजा कान्तास्ता रोपयेद्वशाः[24] ॥ ३१७ ॥

---

१. A. कैश्चकटकैर्मु । २. A. णै । ३. A. ता । ४. A. श्चरक्तांबर प्रियाः । ५. A. ति । ६. A. कि । ७. A. पु । ८. A. वादयेत्रि । ९. A. तु । १०. A. त । ११. D. कांत । १२. A. ल्लिरी । १३. D. या । १४. A. वृंद । १५. A. खि । १६. A. ना । १७. A. सो । १८. A. खं । १९. A. शो । २०. A. थ । २१. A. क्ष्म । २२. D. gives हरिद्रा, गात्रा, कौसुंभ, दीना lines in order । २३. A. च । २४. A. शा and gives after it उन्नमय्याप्या मूर्धानं रुरचाग्र पल्लवैः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उन्नमृ(म्य)शृण्या मूर्धानं रुरचाअग्र (रुचिरैरग्र) पल्लवैः ।
[1]उद्यदङ्गुष्ठयुग्मेन प्रेरय[2]न्वारणोत्तमम् ।
धारयन्[3] कुत्र[4]चित्भूमौ ताडयन्पुरतः स्थितान् ॥ ३१८ ॥
मोचयन्हन्यमाना(नां)श्च गच्छेद्राजा निजा[5]लयम् ।
इत्येवं [6]शार्दूलक्रीडा वर्णिता सोमभूभुजा ॥ ३१९ ॥

[इति शार्दूलक्रीडा ॥ ६ ॥]

इदानीं वालुकाक्रीडा [7]कथ्यते लक्षणान्विता ।
सतां सेति(चेतः)समंचा[8]दौ(माम्भोदे) घन[9]चा(सा)रसदं(मे)घने ॥ ३२० ॥
हरहासप्रभा[10] तुल्ये [11]श्वेतमेघविराजिते ।
सञ्जातहंसमा[12]तङ्गकीरौघ्य(घ)मठ(द)सञ्चये ॥ ३२१ ॥
मुक्ताफलसमुत्पत्तिकारणे जलदात्यये ।
शालिपुष्पपरजःपिञ्जे कञ्जकिञ्ज[13]ल्कपिञ्जरे ॥ ३२२ ॥
मृदु[14]शीते सुगन्धे तु [15]वात(ति) प्राचीनमारुते ।
ईर्ष्याकलुषिते चित्ते [16]सम्पन्न(प्रसन्न)इव बाहु(चाटु)भिः ॥ ३२३ ॥
वर्षाकलुषमापन्ने शरदा निर्म[17]लेजले ।
[18]श्या(क्षा)मा त (स्त)न्व्यो यदा नद्यश्चक्रवाककुल (च)द्वयी[19] (याः) ॥ ३२४ ॥
नलिनीबाहुतिल(लति)काश्चलत्पा[20]ठीनलोचनाः[21] ।
[22]तत्समीपे नृपः कु[23]र्यात्क्रीडां चेतःप्रसादि[24]नीम् ॥ ३२५ ॥
सलिले सुखसंस्पर्शे पिपासाधर्महारिणि ।
सूक्ष्ममुक्ताफलाभासे हेमरेणु[25]समप्रभे ॥ ३२६ ॥
नानामणिगणप्रख्यसु[26]श्लक्ष्णसिकताचये ।
मनोहरे समु[27]देशे शीतकाण्डपटावृते ॥ ३२७ ॥

---

१. A. उद्यूर्यांपुष्ट । २. A. यं । ३. A. यं कु । ४. A. चि भू । ५. A. जानलय । ६. A. सा । ७. A. वक्षते । ८. D. वा । ९. A. वा । १०. A. सब्दे । ११. A. खेतु । १२. A. तंग किरौ D. नंग कीरो । १३. A. ल । १४. A. स्पते । १५. A. वावि । १६. A. पसन्न इव वाडभी । १७. A. ले । १८. A. क्षास्यामा तन्व्यो D. श्यामा तन्यो । १९. A. या । २०. A. टित । २१. D. ना । २२. D. तांस । २३. A. र्याक्की । २४. A. नी । २५. A. मरुत्प्र । २६. A. श्लिक्ष्ण । २७ A. दे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]कृत्वा पट्टकुटी रम्या वीणका(वेणुकां)श्च पटीभवान् ।
परिधाय मि(सि)तं वस्त्रमन्तःपुरजनैः सह ॥ ३२८ ॥

हेमालङ्कारशोभाढ्यस्तत्रागत्य नरेश्वरः ।
समागत्य जला[2]भ्याशं दृष्टिचे[3]तःप्रसादनम् ॥ ३२९ ॥

उपविश्य [4]कियद्दूरे तरुणीवृन्दमध्यगः ।
वर्तुला(लां)श्चतुरस्रा(स्रां)श्च[5] चतुर्द्वारसमन्वितान् ॥ ३३० ॥

कुर्यान्निष्प(ष्य)न्दकान् राजारामा[6](मां)श्चैव [7]पृथक् पृथक् ।
प्रसृतिक्षेपणात्तोयमृदु[8]क्षय(मुदुक्ष्यैव) पुनः पुनः ॥ ३३१ ॥

यावन्निर्मलतां [9]याति [10]नीरं तावद्बहिः[11] क्षिपेत् ।
सञ्जाते निर्मले[12] तोये जलवा[13]सान्त(सांस्त)तः क्षिपेत् ॥ ३३२ ॥

उत्पलं कमलं चैव शतपत्रं सुसौरभ[14]म् ।
निक्षिपेत्तत्र शोभार्थं गन्धार्थं कुसुमं बहु ॥ ३३३ ॥

प्र(प्रा)कारं देवतागारं वालुकापुञ्जनिर्मितम् ।
कुर्याद्रम्यं सुसोपानं परिखाजलपूरित[15]म् ॥ ३३४ ॥

निष्प[16](ष्य)न्दसलिले(लं)राजा प्रेय[17]सीभ्यः प्रदर्शयेत् ।
दर्शयेयुश्च ता राज्ञे स्वकृ[18]तांश्च जलाशयान् ॥ ३३५ ॥

[19]स्वादुता(तां) सौरभं शैत्यं दर्शयेयुः[20] परस्परम् ।
पानस्थ(च्छ)लेन भूपालः[21] स्पृशेदधरपल्लवम् ॥ ३३६ ॥

शीतसन्दर्शनं(न) व्याजा[22]त्स्पृशेद्वीक्ष्य कुचद्वयम् ।
वालुकापिण्डका(न्) वृत्ता(न्) कन्दुकाकारनिर्मितान् ॥ ३३७ ॥

---

१. A. कुच्चा पट। २. A. भ्यांसं । ३. A. त । ४. A. किंव्यदू। ५. A. श्चतुरस्राश्च चतुसमन्विता। ६. A. मश्चै। ७. A. पृथक्। ८. A. वक्षु। ९. A. यांति। १०. A. नि। ११. A. हि। १२. A. लोताये। १३. A. संस्तत। १४. A. भार्थं गंधार्थ गंधार्थ कुसुमं बहु। १५. A. ता। १६. A. थंदसलिलो। १७. A. मली। १८. A. कुसांशलजाशयान्। १९. A. खावुता। २० A. यु। २१. A. ल। २२. A. त्स्पर्शेदक्षं कुचद्वयम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुक्कुटत्व[1](टांस्तु) समारोप्य योधयेयुः परस्परम् ।
स्फुटितं[2] निर्जितं विद्यात्तद्योधस्य[3] पराजयः[4] ॥ ३३८ ॥

जितस्य [5]पृष्ठमारोहे[6]त्कर्णौ[7] धृत्वा[8] विकर्षयेत् ।
पलायि[9]ते चानुधावेत्सूक्ष्मसैकतभूतले ॥ ३३९ ॥

पातयेद्वालुकामध्ये स हि तं[10] नर्मसंयुतम् ।
उपगूहन[11]सम्भूतं सु[12]खमास्वादयेन्नृपः[13] ॥ ३४० ॥

ततः किञ्चित्समाक्रान्तं (क्रम्य) सिञ्चन्न(श्चेद)न्योन्य[14]मम्बुभिः ।
एवं क्रीडां नृपः कृत्वा ततः शृङ्गारमाचरेत् ॥ ३४१ ॥

विचित्रैर्वसनैर्दिव्यैर्नाना र[15]त्नविभूषणैः ।
आरुह्य करिणीं[16] वाथ हस्तिनं वा [17]सुशिक्षितम् ॥ ३४२ ॥

अश्वं वा गमनं (न) श्रेष्ठ(ष्ठं)[18]दोलां वा हेमकल्पिताम् ।
स्यन्दनं [19]वा हवेद्यु(यैर्यु)क्तं रत्नजं वा सुखास[20]नम् ॥ ३४३ ॥

पा[21]दचङ्क्रमणैर्वाथ[22] त[23]रुणीवृन्दसं[24]युतः ।
सहा[25]सैः सरसैर्वाक्यै[26]र्लीलालोकविलासकैः ॥ ३४४ ॥

प्रीणयेत्प्रेयसीचित्तं प्रवि[27]शेन्निजमन्दिरम् ।
इत्युक्ता वालुकाक्रीडा [28]कथिता सोमभूभुजा ॥ ३४५ ॥

[इति वालुकाक्रीडा ॥ ७ ॥]

ज्योत्स्नाक्रीडाधुना रम्या[29] कथ्यते हर्षवर्द्धिनी ।
आश्विने कार्तिके वापि [30]सितपक्ष (क्षे)समु[31]ज्ज्वले ॥ ३४६ ॥

वसन्ते वा निदाघे वा श[32]शिन्यर्द्धा[33]धिके सति ।
क्षीरार्णवप्रवाहै[34]र्घैः [35]शुक्लीकृत इवाम्बरे ॥ ३४७ ॥

---

१. A. न्वं । २. A. तं विद्यात् D. तं निर्जितं विं । ३. A. रव्य । ४ A. य । ५. A. प्र । ६. A. हन्कर्णौ । ७. A. न्वा । ८. A. इनें वा । ९. A. नंनसंयुतम् । १०. A. संचूतं । ११. A. प । १२. A. प । १३. A. संवु । १४. A. न्न । १५. A. णिं । १६. A. लु । १७. A. दा । १८. A. धाहयेयुक्तं । १९. A. न । २०. A. दं । २१. A. घ । २२. A. रू । २३. A. यता । २४. A. स्यैः । २५. A. लीलालाक । २६. A. श । २७. A. वर्णि । २८. A. म्य । २९. A. सी । ३०. A. द्व । ३१. A. न्शि । ३२. A. थि । ३३. A. वै । ३४. D. शुक्तीकृत ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सार्द्र(सान्द्र)चन्दनपङ्केन लेपितास्विव भूमिषु ।
[1]स्फटिकैरिव कुप्तासु दद्भिति (दिग्भित्ति)षु महोपलैः ॥ ३४८ ॥

कर्पूररेणुसन्दोहे(हैः) [2]पूरितासु निशास्विव ।
[3]आश्रयी(शायी)त चकोरायां मा[4]निनीमानसंस(सम्भि)दि ॥ ३४९ ॥

विकासितकुमुद्वत्यां[5] कमलोल्लासविद्विषि ।
तिमिरोत्साहहारिण्यां जितवासरसंपदि ॥ ३५० ॥

ज्योत्स्नायां नृपतिः [6]क्रीडां कुर्यान्मन्मथवर्द्धिनीम् ।
विशाले प्राङ्गणे रम्ये हृषद्[7]गर्तविवर्जिते ॥ ३५१ ॥

मृदुना[8] ह्युप(गोमय)संलिप्ते पुष्पप्रकरसंयुते ।
घनं श्लक्ष्णं सितं वस्त्रं जानुमात्रा[9]वलम्बितम् ॥ ३५२ ॥

परिधाय दृढां कच्छां कल्पयेत्तत्प्रमाणिकाम् ।
तस्योपरि निबध्नीयात् [10]पट्टिकाङ्कुच्छशोभिताम् ॥ ३५३ ॥

नानावर्ण[11]कृतां भव्यां जघनाभोगमण्ड[12]नाम् ।
चन्दनालिप्तसर्वाङ्ग(ङ्गः) कस्तूरीतिलकोचितः[13] ॥ ३५४ ॥

खटिकालिप्तताटङ्कपत्रभूषितपालि[14]कः ।
मालती[15]मल्लिकादामपरिपूरितखो[16]म्पकः ॥ ३५५ ॥

उन्नम्य [17]खोम्पकं गाढं पीनपट्टेन वेष्टयेत् ।
रम्यं(रम्यां) शृङ्खलिका(कां) श्लक्ष्णां[18]कनका(त्का)श्चननि-
र्मि[19]ताम् ॥ ३५६ ॥

ब्रह्मसूत्रमिव स्कन्धे कुक्षिदेशे[20] विलम्बि[21]ताम् ।
श्लक्ष्णौ [22]च हस्तकटकौ भास्वत्काञ्चननिर्मितौ[23] ॥ ३५७ ॥

---

१. D. drops these two lines । २. A. पु । ३. D. आश्रयेतचकोराणां । ४. A. मानिनीमानशं । ५. A. त्या । ६. A. कुर्या क्रीडां । ७. A. द्रर्तविवजिता D. दुगन्धविवर्जिते । ८. A. णामप । ९. A. वि । १०. D. पट्टिकांगुल । ११. A. कृतांभव्यं । १२. A. नमू । १३. A. तमू । १४. A. टि । १५. A. तीकादाम । १६. A. षोपक । १७. A. खोप । १८. D. क्ष्ण कनकांचनर्मितमू । १९. D. तं । २०. A. श । २१. D. तमू । २२. A. व । २३. A. तो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धारयेन्मणिबन्धाभ्यां नृप[1]सिंहः[2] प्रकोष्ठकः (के)।
अन्ये प्रसादचित्ताश्च लघुसञ्चारभीरवः[3] ॥ ३५८ ॥

भूषिताः[4] शोभनैर्वेषैरन्यैर्नोद्भुतमण्डनैः।
पञ्च षड्वा[5] दशाष्टौ[6] वा दश सप्त नवापि वा[7] ॥ ३५९ ॥

पक्षद्वये समान् कुर्याद् भृत्यान् केलिमु(सु)खोचितान्।
न बालान[8](न्ना)तिवृद्धांश्च न स्थूला[9]न्न [10]रुजान्विताः(तान्) ॥३६०॥

समानवयसो दक्षान् ल(क्षांल्ल)घुसञ्चारकोविदा[11]न्।
गु(ग)णमेकान्ततो रम्यं स्वीकृत्य क्रीडनं चरेत् ॥ ३६१ ॥

इतरस्मि[12]न्गणे मित्रं मुख्यं [13]कृत्वा विचक्षणम्।
[14]कान्ता वा नृपतिः कुर्यात्पक्षद्वयविवर्तनी (नीः) ॥ ३६२ ॥

वीक्षेत क्रीडनं तासां स्वयं भूत्वा विचारकः।
जयस्थानद्वयं कुर्यात्पञ्चाशच्चापनिर्मितम् ॥ ३६३ ॥

तत्स्थानस्पर्शमात्रेण जयो भवति निश्चितम्।
जिगीषया प्रधा[15]वन्तः(न्तं)स्पर्शा(स्पृशे)दन्यगणाश्रिताः(तः)
॥ ३६४ ॥

तं स्पृशेदपरः कश्चि[16]त्तं [17]वाप्यन(न्य)स्तु संस्पृशेत्।
वञ्च[18]यित्वा परस्पर्शं धावनेऽगाज्जयास्पदम् ॥ ३६५ ॥

तं संस्पर्शं(स्पृश)ति यत्रैकस्तत्पक्षस्य जयो भवेत्।
हरिणा निर्मि[19]ता क्रीडा गोपवेषभृता पुरा ॥ ३६६ ॥

शशिप्रभायां [20]यत्तस्मात्प्रोक्ता हरिशशीत्यसौ।
[21]सर्वत्र(त्रा)लेख्य [22]कोष्ठानि सारीफलकवद् बुधः ॥ ३६७ ॥

---

१. A. पः । २. A. ह । ३. A. व । ४. A. तांल्लोभनिर्वेषरनैर्नो D. ता ल्लो । ५. D. ट्का । ६. A. ष्टै । ७. A. व । ८. A. ना । ९. D. न । १०. A. रुजा । ११. A. दन् । १२. A. श्मिनणे । १३. A. क । १४. A. कोतावान्नृपतिं कृयांत्पक्षद्वितयवर्तिविन । १५. A. वंतंस्पर्शदन्यगणांश्रिता । १६. A. श्च । १७. A. पप्य । १८. A. इ । १९. A. र्म्मि । २०. A. यतस्माप्रोष्टा । २१. A. सिष्णोर्विलिख्य । २२. A. काष्टानिफलकवद्वुध ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुर्हस्त[1]समं कोष्ठे(ष्ठं) वि[2]स्तारायां[3] मया(यो)र्भवेत्[4]।
सप्त वा[5] पञ्चमं (वा) कुर्यात्कोष्ठानि समभूतले ॥ ३६८ ॥

तिर्यग्रेखासु [6]चैकैकः [7]स्थापनीय[8]म् (यो ह्य)तन्द्रितः।
तत्रैको वर्तिको[9] नाम रु(ऋ)जु रेखासु धावति ॥ ३६९ ॥

अमु[11]ञ्चंश्च तथा रेखाः[12](म्) कोष्ठसंस्था(स्थां)श्च संस्पृ[13]शेत्।
तिर्यग्रेखा[14]गताः[15] सर्वा(र्वे) वर्तिकं च (कश्च) प्रयत्नतः
॥ ३७० ॥

परपक्षस्थितान्(ता) रेखान्(खा) विशेयुः[16] परिवञ्चि(ञ्च्य)तान्।
सर्वकोष्ठान् विनिः[17]क्(ष्क्र)म्य [18]सिंच(विशे)देको यदा पुनः
॥ ३७१ ॥

मध्यस्था तु यदा रेखा वर्तिकेन विवर्जि(र्ज्य)ते[19]।
तत्क्रमेण पुनः कोष्ठान्नुल्लङ्घयति चेत्प[20]रः ॥ ३७२ ॥

तदा जयो बहिस्था[21]नां स्प[22](स्पृ)ष्टे तेषां पराजयः।
पराजि[23]ता बहिस्था[24]श्च तिष्ठेयुः[25] को[26]ष्ठमध्यतः[27] ॥ ३७३ ॥

गच्छेयुर्बहिर[28]न्तस्थाः प्राग्व[29]ते(त्ते)षां [30]जयाजयौ।
वारत्रयं बहिस्थाश्चेद्विजयन्ति(न्ते) निरन्तरम् ॥ ३७४ ॥

आ[31]रोहेयुस्तदा पृष्ठ[32]मन्तस्थाना(नां) मुदान्विताः।
को[33]ष्ठक्रीडेयमाख्याता गोविन्देन [34]कृता पुरा ॥ ३७५ ॥

क्रीडा[35]र्थं चैव गोपीनां [36]रम्याणां कौतुकानि च (य च)।
दुर्ग[37] च कृत्रिमं कृत्वा [38]कन्दै(कुड्यै)र्वक्षःप्रमाणकैः[39] ॥ ३७६ ॥

---

१. D. स्तं। २. A. चि। ३. A. दायतो भवेत्। ४. A. वन्। ५. A. या। ६. A. तत्काष्ठानिसभूतले। ७. D. चैकस्था A. वैकैक। ८. A. ध्या। ९. A. यः संतंद्रियं। १०. A. का। ११. A. मुचंश्च। १२. A. खा। १३. A. स्पशन्। १४. A. षा। १५. A. तान्सर्वा। १६. A. यु। १७. A. ति। १८. A. शिवेदोकौ। १९. A. त। २०. A. व्पर। २१. A. स्त्रि। २२. D. पृष्ठे। २३. A. र्जि। २४. A. ष्ठ। २५. A. यु। २६. A. का। २७. A. त। २८. D. रंतः। २९. D. कृतेषां। ३०. A. जयोवार। ३१. A. राहयेयु। ३२. A. मंतः। ३३. A. ष्ठाक्रियमाख्याता। ३४. A. पुराकता। ३५. A. र्ध। ३६. A. रणां कौ। ३७. A. र्गचक। ३८. D. कंदैर्वक्ष्य। ३९. A. कै।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भवेयुः काश्चि[1]दन्तस्थाः काश्चि[2]त्तत्र बहि(हिः)स्थिता:[3] ।
कन्दुकैः पुष्पसम्भूतै[4]र्दण्डैश्च मुनयो भवेत्(सुमनोभवैः) ॥३७७॥

तथा सम्भ्र[5]मसंयुक्ताः प्रहरन्ति परस्परम् ।
ताडयन्ति नृपं पुष्पैः कन्दुका[6]कारदाग(म)भिः ॥ ३७८ ॥

मालाभिश्च मनोज्ञाभि[7]र्दण्डैः केसरकल्पितैः ।
ज्योत्स्नायां क्रियते तस्माज्ज्योत्स्नाक्रीडेति कथ्यते ॥ ३७९ ॥

प्रोक्ता भूलोक[8]मल्लेन ज्योत्स्नाक्रीडा मनोहरा ।

[इति ज्योत्स्नाक्रीडा ॥ ८ ॥]

[9]सस्यक्षेत्रभवा क्रीडा साम्प्रतं कथ्यते वरा[10] ॥ ३८० ॥

पुष्ट(ष्प)स्याकरसन्दोहे[11] मत्तमातङ्गरा[12]जिते ।
हृष्टसारससञ्चारे दृप्तसारङ्गसङ्कुले ॥ ३८१ ॥

नष्टपद्माकरोल्लासे भृ(भ्र)ष्टमा[13]यूरपिच्छके ।
दन्तवीणास[14]माक्रान्तं(न्त)कम्पमान [15]नराकुले ॥ ३८२ ॥

रोमाञ्चाचितसर्वाङ्गजनसेवितपावके ।
[16]कुन्देन्दीवरकर्पूरगन्धशालि[17]सुगन्धिते ॥ ३८३ ॥

शीतोदगन्धवाहेऽपि जनतोद्वेगकारिणि ।
प्रेम्णा विनापि दम्पत्योर्गाढालिङ्गन[18]कारिणि ॥ ३८४ ॥

सम्भोगलम्पटानां तु [19]दीर्घरात्रिप्रदायिनि[20] ।
[21]ईदृग्विधे तु सम्प्राप्ते हेमन्ते सस्य[22]शालिनि[23] ॥ ३८५ ॥

क्रीडां कुर्वी[24]त भूपालो [25]रम्यक्षेत्रसमाश्रिता[26]म् ।
नि[27]गूढकणिशै[28]र्गच्छे[29]च्छुकभ्रान्तिप्रदायिभिः ॥ ३८६ ॥

---

१. D. दंतः । २. A. त । ३. A. ता । ४. D. तैः र्दं । ५. A. भ्रांमसंयुक्ताः संहरंतीः । ६. D. कारकोदारिमिः । ७. A. देवन । ८. A. य । ९. A. र । १०. A. ह । ११. A. ज । १२. D. यु । १३. A. म । १४. A. नि । १५. A. कंदेदि । १६. A. लि सुगंधशालिसुगंथितौ । १७. A. त । १८. D. दीं । १९. D. नी । २०. A. इंद्र । २१. A. स्वसा । २२. D. नी । २३. A. वी । २४. A. रंप । २५. A. तम् । २६. D. वद्ध । २७. A. सौ । २८. A. छंछुक D. छेतशुक ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामाजनमनोवृत्ते(त्तेः)कौतूहलविधायिभिः ।
पुन्नागके[1]सराकार[2]केसरश्रिय(श्रीस)मावृतैः[3] ॥ ३८७ ॥

सौवर्णकणिशभ्रान्ते[4]र्जनानां जनकोचितैः[5] ।
वंशका(को)लाज्जशुक्ती च (भ)कुम्भ(म्भि)स्थ(व्या)लमली[6]-
त्यकम्(कलानि किम्) ॥ ३८८ ॥

मुक्ताफलानि कणिशे जातानि(नी)ति वितर्किते(तैः) ।
सप्तच्छद[7]नसंस्पर्द्धिशोभाभिः[8] परिभूषितैः[9] ॥ ३८९ ॥

लक्ष्मीखेलनसञ्चारहेतुनैव सवीचिभिः ।
अत्यर्थं[10] शोभमानैश्च याव[11]नालैरलङ्कृतः (ते) ॥ ३९० ॥

क्षेत्रे हरितशोभाढ्ये रम्ये दृष्टिमनोहरे ।
अवर्षास्वपि सम्भूते सै(तसे)न्द्र[12]गोपकशा[13]द्वले(लम्) ॥ ३९१ ॥

अनुकुर्वन्प्र(त्प्र)सूना[14]ढ्यंस(ढ्यसु)पत्रे[15]ण य(स)दावृते ।
[16]वेणीसङ्काशकणिसै(शै)र्गौधू[17]मैरु[18]पशोभितैः[19] ॥ ३९२ ॥

पङ्क्तिस्थदीपसङ्काश[20] कुसुमाग्र[21]कुसुम्भकैः (के) ।
मध्ये मध्ये फलाढ्याभिः कर्कटी[22]वलि(ल्लि)[23]भिर्वृते ॥ ३९३ ॥

निष्पापे(वे)न कलाये[24]न फलितेन विचित्रिते ।
एवं विधानि रम्याणि [25]वीक्ष्य क्षेत्राणि यत्नतः ॥ ३९४ ॥

कुर्वीत रक्षणं तेषामाप्तैः[26] परिजनैर्नृपः[27] ।
दध्योदनं समरि[28]चमेलार्द्रकसमन्वितम् ॥ ३९५ ॥

गोधूमकानां खलकं[29] हरिद्राम्लखलं[30] तथा ।
पोलिकाश्च तथापूपाल[31](पाँल्ल) डुकाः(ड्डुकान्) [32]शष्कुलीरपि
॥ ३९६ ॥

---

१. A. श । २. A. कै । ३. A. तेः । ४. A. ज । ५. A. तै । ६. A. त्प । ७. A. ननस्पर्द्धि । ८. A. मि । ९. A. तेः । १०. A. र्थं । ११. A. नी । १२. A. द्रको । १३. A. शाड्वलम् । १४. A. द्यं । १५. A. त्रचददावृते । १६. D. कणिशं काश्चित्कणिशै । १७. A. ध । १८. A. रू । १९. A. तै । २०. A. स । २१. A. ग्व । २२. A. टि । २३. A. भिते । २४. D. पे । २५. A. वि । २६. A. प्तै । २७. A. प । २८. A. दिचनमे । २९. D खां । ३०. A. लकं तथा । ३१. A. वडकां । ३२. A. छ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पायसं शर्करामिश्रं मधु तक्रं दधीनि च ।
फलमूलानि कन्दांश्च राजिकालवणान्वितान् ।
प्रस्थापयेन्नृप(न्नृपः) पूर्वं विविधैः(धान्) क्षेत्रमण्डलम् ॥३९७॥

सूकरा(रां)श्च तथा मेषान् पुष्टान्प्रस्थापयेत्पुनः ।
ततः स्वयं प्रियायुक्तस्तरुणीजनसेवितं(तः) ॥ ३९८ ॥

प्रसादचित्तैर्गीतज्ञैर्मित्रैर्विप्रजनैस्तथा ।
गच्छेत्सुखावहे या(हैर्या)ने(नै)रङ्गरक्षकवेष्टिभिः(तैः) ॥ ३९९ ॥

सस्यक्षेत्रसमुद्देशं सम्प्राप्य पृथिवीश्वरः ।
निवार्य चेतरं लोकं विशेयुर्वा(त्पूर्वो)दितैः सह ॥ ४०० ॥

अवकाशार्थमुत्पाट्य तत्र सस्यानि कानिचित् ।
चतुरस्रं विशालं च कुर्याद्रम्य(म्यं) प्रदेशकम् ॥ ४०१ ॥

वीणकं च पटीक्षुण्णं स्थापयेत्तत्र शोभितम् ।
किञ्चि(काश्चि)च्चारुनिभां(भाः) सान्द्रां(न्द्रा) नम्रभाव-
मुपागतान्(ताः) ॥ ४०२ ॥

निष्पावस्य कलायस्य शिबि(म्बि)काश्च पृथक् पृथक् ।
गोधूमकणिशान् रम्यान् वस्त्रवेष्टितविग्रहः(हान्) ॥ ४०३ ॥

आनीय(नाय्य) बहुभिर्भृत्यैः कर्कटीनां फलानि च ।
विप्राणां प्रेयसीनां च दद्याद्राजा पृथक् पृथक् ॥ ४०४ ॥

भक्तं च विविधं भोज्यं दत्त्वा सर्वान् विसर्जयेत् ।
यथासुखं च भोक्तव्यं पुत्रबन्धुजनैः सह ॥ ४०५ ॥

---

१. A. र्क । २. A. मंद्यं तक्रं धीनि च । ३. D. दा । ४. D. ता । ५. D. ततः । ६. A. घै । ७. A. मलम् । ८. A. कातरांश्च तथा । ९. A. प्र । १०. A. न्पुन । ११. A. णि । १२. A. ताम् । १३. A. र्गि । १४. A. सुखावहेर्याने । १५. A. वो । १६. A. सुमुदेशं । १७. A. निनिवार्थ चे । १८. A. ला । १९. A. ति । २०. A. र्थमु D. र्थमुत्पाट्य तत्र स्थानि च । २१. A. विशालं विशालं च । २२. A. वे । २३. A. साद्रां । २४. A. शां । २५. A. म्यां । २६. A. ह । २७. A. अनायि । २८. A. नि । २९. A. णा । ३०. A. चद्धद्याद्रा । ३१. A. वि. । ३२. A. नैरिति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततस्तदा समाहूय प्रेषयेत्पृथिवीपतिः ।
वराहांश्च तथा मेषान्संदु दुरध्व(क्षुरध्व)मिति ब्रुवन् ॥ ४०६ ॥

ततः क्षेत्राधिदेवेभ्यः किरेदन्नं समन्ततः ।
यावनालस्य पत्राणि तत्रास्तीर्य घनानि च ॥ ४०७ ॥

कृ(की)लितानि सुरम्याणि स्थालवत्परिकल्पयेत् ।
रोहिताम्लानि सङ्गृह्य चणकाग्राणि यत्नतः ॥ ४०८ ॥

सैन्धवं मरिचं हिङ्गु जीरकं च विचूर्णितम् ।
विकीर्णं (र्य)मर्दयेत्तानि चणकाग्राणि पाणिभिः ॥ ४०९ ॥

किञ्चित्तैलं क्षिपेत्तत्र शृङ्गवेरलवानपि ।
आ(अ)रण्येषु स्वयं शुष्के(ष्कं) गोमयं दलवस्थि(त्थि)तम् ॥ ४१० ॥

पुञ्जीकृत्य ततो वह्नि(ह्निं) दीपयेच्च समन्ततः ।
निष्पावशिम्बिका(काः) स्थाल्यां कलायस्य च शिम्बिका(काः)
॥ ४११ ॥

लवणान्विततोयेन क्वाथयेन्मृदुवह्निना ।
तृणाग्निना दहेदेन(ता)श्चणकान् विटपस्थितान् ॥ ४१२ ॥

ततस्तान् वितुषीकृत्य पावकेषु पृथक् पृथक् ।
पूरयित्वा नृपः पूर्वं भक्षयेच्चणजालकम् ॥ ४१३ ॥

रुच्यर्थं दीपनार्थं च मितं परिजनैः सह ।
निष्पावाश्च कलायाश्च हरिमन्थाश्च भर्जिताः ॥ ४१४ ॥

लवणेन तिलैर्वापि सितया च विमिश्रिताः ।
भक्षयेन्नृपतिः प्रीत्या पुत्रदारजनैर्वृतः ॥ ४१५ ॥

---

१. A. रूप । २. A. प्रथवीपति । ३. A. मखात्संछुरछ्व । ४. A. भ्य । ५. A. का । ६. A. य...। ७. A. र्ण । ८. A. क्षेपेतत्र । ९. A. बेरल D. वेलर । १०. D. दीं । ११. A. न्मुद । १२. A. भ्रमणाग्निदहेदेतितश्चणकान्विटपिस्थिता । १३. A. र्ययित्वा । १४. A. वै । १५. A. च । १६. A. उच्यर्थं । १७. A. मंघा । १८. A. र्यापि । १९. A. ता । २०. A. मित्रजनैर्वृत ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वर्णिका[1]कणिकां(शां)श्चैव भर्जिता(तान्) गोमयाग्निना[2] ।
पाणिभ्यां [3]मर्दितानीषच्छूर्पकै[4]र्निस्तुषीकृतान् ॥ ४१६ ॥

शुकपत्रप्रतीकाशान्[5] कोमलान्[6] क्षीरपूरितान् ।
सोष्णाना[7]स्वादयेद् भूपः पीयूषमधुरान्वरान् ॥ ४१७ ॥

अनु[8]पानं पिबेत् पश्चात्(त्त)[9]क्रमञ्जं(म्लं) ससैन्धवम् ।
दध्योदनं च खलका नर्मकाकर्कटीयुता(:) ॥ ४१८ ॥

[10]तीक्ष्णकाः(का) पल्लवा(वां)श्चापि [11]मण्डिकापल्लवांस्तथा ।
बृहतीकोमलफलं कर्पास(र्मार)स्य फलं दलम् ॥ ४१९ ॥

कुसुम्भपल्लवं चापि [12]गृञ्जनं च तथारुणम् ।
वार्ताकस्य फलं बालं तद्वत्कोशातकीफलम् ॥ ४२० ॥

राजिकालवणोपेतं कन्दमूलफलं तथा ।
वराह[13]शुण्ठि(हशुण्ठ)कान्सिनग्धान्मेषमांस(सं)सुचर्चिता[14]न्
(तम्) ॥ ४२१ ॥

[15]भुञ्जीत नृपतिः स्वैरं लघुमात्रं च भोजनम् ।
नि[16]र्वर्त्य भोजनं पश्चाद्वामपार्श्वे[17] स्थिता(त्) गणान्(त्) ॥४२२॥

उत्थाय कृतशृङ्गारो मन्दीभवति भास्करे ।
स्यन्द[18]नं काञ्चनोदारं दन्ती(न्ति)दन्तविनिर्मितम् ॥ ४२३ ॥

वरवाजिभि(भी)रचितं हेमघण्टाविभूषणैः ।
नृपनाम पुरस्कृत्य नानावर्ण(र्ण)न [19]संयुतम् ॥ ४२४ ॥

किङ्किणीना(दा)मनिर्घोषै[20]र्गलघण्टारवैर्युतम् ।
कलकण्ठस्वरैः[21] स्त्रीणां [22]विशेन्निजपुरं नृपः[23] ॥ ४२५ ॥

---

१. A. का । २. A. भा । ३. A. न । ४. A. र्वितुषी कृता । ५. A. त् । ६. A. त् । ७. A. स्वदये भूप । ८. A. थानंपिवे । ९. D. ज्जमञ्जं । १०. A. तिक्ण । ११. A. मंडका । १२. A. ग्रंज । १३. A. शृठिकांस्निग्धान्मे । १४. A. तां । १५. A. भूजीत । १६. D. व । १७. A. श्वेगणात् । १८. A. नं ती. नीर्मितम् । १९. A. नोचितम् । २०. A. गलप्यं रवैर्युतम् । २१. A. रै । २२. A. वीशेनि D. विविशेन्निजपुरं । २३. A. प ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सस्यक्षेत्रसमुद्भूता क्रीडोक्ता सोमभूभुजा ।
[इति सस्यक्रीडा ॥ ९ ॥]

इदानीं कथ्यते क्रीडा मधुपानसमुद्भवा ॥ ४२६ ॥

अटव्यां शाद्वले[1] देशे नद्यां वा वालुकास्थले ।
उद्याने फलपुष्पाढ्ये [2]गृहे वा सुविचित्रिते[3] ॥ ४२७ ॥

मधुपानोद्भवां क्रीडां स्त्रीजनं कारयेन्नृपः[4] ।
तासां चित्तप्रसादा[5]र्थं दर्शना[6]र्थं तथात्मनः ॥ ४२८ ॥

गुडेक्षुरससम्भूतां[7](तं) कालेन विकृतिं गता[8]म् (तम्) ।
धातकीपुष्प[9]संसिक्ताका(क्तं ख)ण्डसम्मिश्रितं मधु ॥ ४२९ ॥

उ[10](ऊ)ष्मणा सुचिरं कालमुषितं विकृ[11]तिं गतम् ।
औषधेन समच्छायं कटुतिक्तरसोत्कटम् ॥ ४३० ॥

काञ्च[12]नाञ्जननिक्षिप्तां[13] माध्वीमास्तार[14]संज्ञिताम् ।
प्रियङ्गुनि[15]म्बुनिःकृत्य(मम्बुनिक्षिप्तां) शोषयित्वा
विचूर्णिता(र्णयेत्) ॥ ४३१ ॥

य(या)वनालयवागूश्च(श्च)[16] तच्चूर्णेन विमिश्रयेत् ।
अन्यं त(न्यत्त)थाविधं[17] पिष्टं पृथुस्थं(सं)स्थापयेद् घटे[18] ॥४३२॥

[19]ओदनं च तथाशोष्य तेन पिष्टेन मिश्रयेत् ।
यवागू(गुं) पूर्वनिर्दिष्टं(ष्टां) तस्मिन्निपिष्टोदने क्षिपे[20]त् ॥ ४३३ ॥

घटेषु स्थापयेत्तत्तु निर्वाते धारयेद्धि तं (तत्) ।
अहो[21]रात्रोषितं पिष्टं(ष्टं) सेचितं मद्यगन्धि च ॥ ४३४ ॥

लवं नाम तदाख्यात(तं) मु(सु)रावीजं [22]मदावहम् ।
निक्षिप्य तत्र पानीयं गालयेद्दशखो[23]नके (धोदकम्) ॥ ४३५ ॥

---

१. A. लो । २. A. ग्र । ३. A. तो । ४. A प । ५. A. र्घ । ६. A. र्घ । ७. A. ता । ८. A. ति । ९. A. रा. मी. क्रट्. संजितां. डाधातकीसित्काकाण्डं । १०. A. वू । ११. A. तिं वै. नाज्य समच्छायं । १२. A. नं जन । १३. A. प्तं । १४. A. साज्ञ । १५. A. मंबुरिक्रत्य । १६. A. चतुर्णेन । १७. A. ध । १८. A. ट्टो । १९. A. द्यानोदनं च संशोष्य । २०. A. पे । २१. A. पितां पिष्टे । २२. A. स । २३. A. षोद ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किंवा वस्त्रेण संवेष्ट्य गालये[1]न्निर्मलं रसम्।
एवं च शालिगोधूमा(म)यव[2]श्यामाक[3]कोद्रवैः ॥ ४३६ ॥

कृतां पैष्टिं[4](ष्टीं) सुरा(रां)मृष्टां हृद्यां पांडु(पाण्डु)रसंज्ञिताम्।
मज्जनायव घोटा(ण्टा)करोहिणीनां त्वचः शुभाः[5] ॥ ४३७ ॥

[6]संक्षुद्रं(द्र) क्वाथयेत्पश्चाच्छो[7]षयेदातपे ततः।
चूर्णं कुल्माषकं कृत्वा तच्चूर्णेन विमिश्रयेत् ॥ ४३८ ॥

य(या)वनाल[8]स्य पिष्टं च [9]पृथक् कृत्वा विमिश्रयेत्।
मिश्रयित्वा पुनर्वंसौ[10](शे) सोष्मणा वारयेच्चिरम् ॥ ४३९ ॥

त्रिरात्रं पञ्चरात्रं च याव[11]त्तत्कृष्णतां व्रजेत्।
[12]ततस्तोयं क्षिपेत्तज्ज्ञः सुरावीजप्रमाणतः ॥ ४४० ॥

आलोड्य पिहितं [13]कृत्वा सुनिगुप्तं निधापयेत्।
एवं कृष्णा[14] सुरा सिद्धा[15] गन्धकाढ्यै[16]रसैर्युता[17] ॥ ४४१ ॥

मदावहा विशेषेण तिक्तस्वादुरसान्विता[18]।
मृद्वीकारसमास्तु[19](सु)त्य वि[20]कृतं(तिं) प्रापितं दिनैः[21] ॥ ४४२ ॥

द्राक्षासवमिदं हृद्यं तरुणीजनवल्लभम्।
नारिकेलोदकं भूरि स्थापयित्वा घटोदरे ॥ ४४३ ॥

मिश्रितं [22]धातकीपुष्पैर्नालिकेरा(रिकेला)सवं वरम्।
मधूकवृक्षपुष्पाणि तो[23]ये निष्काष्य(ष्काथ्य) [24]तद्रसम् ॥ ४४४ ॥

मिलितं धा[25]तकीक्वाथे मधुकासवसंज्ञितम्।
[26]पेषितं सुनुयात्तोये पनसस्य(सज्च) विचक्षणः ॥ ४४५ ॥

---

१. A. यं निर्मल। २. A. स्या। ३. A. रो। ४. A. ष्टिसुरामृष्टांहृद्यापांडुरसंज्ञिनाम्। ५. A. ष्पो। ६. A. भा। ७. A. सक्षुद्र। ८. A. षायदातपे ततः चूर्ण कुल्पाषकं कृत्वा तत्पूर्णेन। ९. A. स्पिशलं। १०. A. प्रकृत्वा विमि। ११. A. सोंष्मणा। १२. A. त्तां व्रजेत्। १३. A. तोयं क्षिपेत्ततः सुरा। १४. A. कर्च्ची। १५. A. ष्ण। १६. A. द्वांगवकाष्ट्यं। १७. A. तम् १८. A. तम्। १९. A. श्चं। २०. A. वृ। २१. A. नौं। २२. A. था। २३. A. येष्काथ्य। २४. A. धइसं। २५. A. न किक्क. म. कासव। २६. A. पेसीतां पेसीतां सनूया तोये नस विचक्षण।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विकृतं धातकीमिश्रं पनसासवमु[1]त्तमम्।
ई[2]षदुष्णीकृतं शुद्धं रसालस्य(स्या) [3]च (स) स(व)ङ्कटे॥ ४४६॥

त्रिरात्रु(त्रमु)[4]षितं मद्यं सि(सी)धु नास(म)व(म)दाव[5]य(ह)म्।
तालहिन्तालतापिच्छं(च्छ)[6]खर्जूरं(र)कुसुमस्त(स्थ)न(ल)म्॥४४७॥

छेदयित्वा [7]घटी(टीं) तत्र बद्धीया[8]त्प्रहरत्रयम्।
छिन्नस्थाना[9]त्स(नस)मुद्भूतविन्दुसो(शो) घटसं(सम्भृ[10])-
तम्॥ ४४८॥

उत्तार्य जलसंसिक्तं मद्यं ता[11]लादिसंज्ञि(सञ्ज्ञि)तम्।
आ[12]नीय विविधं मद्यं काचमृन्मयपात्र[13]गम्॥ ४४९॥

नानाविधानि मांसानि वह्निना [14]भर्जितानि च।
स्था[15]लीपक्वानि मांसानि रज(स)गन्धयुतानि च॥ ४५०॥

[16]राजिकालवणाढ्या(ढ्या)नि मांसानि सुरभीणि च।
केसरैर्मातु[17]लिङ्गैश्च शृङ्गवेरर[18]सैरपि॥ ४५१॥

मिश्रितानि च मांसानि हिङ्गुना [19]धूपितानि च।
नानाविधानि भक्ष्याणि मा[20]षगो[21]धूमजानि च॥ ४५२॥

दध्योदनानि मृष्टानि नानास्वा[22]दयुतानि च।
जम्बीररससंस्पृष्टाना(न्या)र्द्रकस्य फलानि च॥ ४५३॥

[23]मयूरमारिणीमेकां तथा[24]न्यां वन[25]सम्भवाम्।
लवणोदकनिक्षि[26]प्तां तैलसर्षपसंयु[27]ताम्॥ ४५४॥

कर्पूरमूलकं चैव तथा चा[28]र्द्रा(र्द्रां) हरीतकी (कीम्)।
सूरणं वेलुकन्दञ्च राजिकालवणा[29]न्वितम्॥ ४५५॥

---

१. A. तम। २. A. श्यदुष्णी कृतं। ३. A. वसंथटे। ४. A. खि। ५. A. या। ६. A. षर्जु। ७. A. घय्यटिस्तत्र। ८. A. प्रयर। ९. A. स। १०. A. मृ। ११. A. ल। १२. A. नाह्य। १३. A. गा। १४. A. व। १५. A. ल्यपक्वा। १६. A. र। १७. A. ल। १८. A. सैवैरपि। १९. A. धु। २०. A. प। २१. A. वु। २२. D. दु। २३. D. कर्पूर-मारिणीमेकां A. मयूरमारणीमेको। २४. A. न्या। २५. A. संभा। २६. D. क्ता २७. D. ता। २८. A. द्रेहरि। २९. A. त्वि।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तैलेन च समायुक्तं वनशिग्रोश्च कन्दकम् ।
आम्लिकारससंयुक्तं लवणेन विमिश्रितम् ॥ ४५६ ॥

पलाण्डोर्विपुलं कन्दं रुच्यं स्वादु मनोहरम् ।
शतावर्यङ्कुरान् दंश(श्यान्) करीरं (रान्) लघुवर्जितम्(तान्) ॥ ४५७ ॥

तैलसंमिश्रितान् रुच्याँल्लवणेन च संयुतान् ।
मरीचं पिप्पलीं राजमातुलिङ्गं तुजी(गा)मपि ॥ ४५८ ॥

कतरं(कं) क(कु)टजं बिल्वं क्षिप्तं च लवणोदके ।
तैलपक्वांश्च चणकान् मरीचेन विमिश्रितान् ॥ ४५९ ॥

तप्तवालुकया भृष्टान् तथान्यांश्च प्रकारकान् (श्चणकानपि) ।
क्षीरेण कथितान्(तां) श्वेता(म्) मधुरा(कां) च हरीतकी(म्) ॥४६०॥

अन्योन्यां कुरु(न्याङ्कुर) संयुक्तान् तथा सम्भारसंस्कृतान् ।
राजिकालवणोपेतांश्चणकान् केवलानपि ॥ ४६१ ॥

तच्चूर्णं तैलसंयुक्तं शृङ्गवेरलवैर्युतम् ।
व(ब)लालघुलिकामिश्रम जा जीचूर्णसंयुतम् ॥ ४६२ ॥

हरिकांश्च तथा भृष्टान् कथिताँल्लवणोदके ।
हरिमन्थकृतावासा(न्) कर शाखाविचूर्णिता(न्) ॥ ४६३ ॥

पलाण्डुशकलोपेतं हिङ्गुना च सुधूपितम् ।
पूरणं नाम तद्भ(क्ष्यं) मृदु मिष्टं सुगन्धि च ॥ ४६४ ॥

एवमाद्युपदंशार्थ(र्थं) पानस्थाने निवेशयेत् ।
कमलोत्पलपत्राणि रथरम्भादलानि च ॥ ४६५ ॥

---

१. D. र । २. A. र्यंकुरात् दंत्रा । ३. A. जिताम् । ४. A. तंन् रश्रीन् लवणेन । ५. A. ता । ६. A. च । ७. D. लं । ८. D. न । ९. A. लक्काश्चरवणकान्मपिश्रिता । १०. A. रणागतान् । ११. A. तामधुरा च हरीतकां । १२. A. न्यं । १३. A. क्तां । १४. A ता । १५. A. काकेवनपि । १६. A. तले । १७. A. लां । १८. D. ज्जा । १९. A. ति । २०. A. का । २१. A. क्काथिताल । २२. A. सो । २३. A. साखां D. शाख । २४. A. प्पे । २५. A. चू । २६. A. वि । २७. A. छो । २८. A. था ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हरिद्रायाः प[1]लाशानि पा[2]नस्थाने वि(नि)धापयेत् ।
इन्द्रनीलसमच्छायान्गोमेदिकसमप्र[3]भान् ॥ ४६६ ॥

गरुडोद्गारसङ्काशान् वैडूर्यमणिसन्निभान् ।
शुद्धस्फटिकवर्णा(र्णा)श्च तथा कज्जल[4]सप्रभान् ॥ ४६७ ॥

[5]कनका(त्का)श्चनसंच्छा(सञ्च्छा)यान् नानावर्णाकृ[6]तीनपि ।
च[7]षकान्काचसम्भूतान्स्थालका[8]न्काचनिर्मितान् ॥ ४६८ ॥

करकांश्च तदुद्[9]भू[10]तान्पानस्थाने वि(नि)धापयेत् ।
रुक्मरौप्यप्रकु(क्कु)प्तानि स्थाना(ला)नि च[11]षकानपि ॥ ४६९ ॥

शुक्ति[12]कां काञ्चनोद्[13]भू[14]तां मधुपानस्थले न्यसेत् ।
ततः सम्भृतशृङ्गारा नयनानन्ददायि[15]नः (नीः) ॥ ४७० ॥

तन्वङ्गीरानये[16]त्कान्ताः प्रेम्णा हृदयहारिणीः[17] ।
अन्योन्यस्नेहसंयुक्ताः स्थाने स्थाने निवेशयेत् ॥ ४७१ ॥

वालुकाशाद्वलो[18]द्देशे वीणा[19](वेणु)काभ्यन्तरे प्रिया(ये) ।
उद्यानेषु [20]द्रुमच्छाये गृहोपवनकेषु च ॥ ४७२ ॥

तिरोहि[21]तैः काण्डप[22]टैः ना(टैर्ना)नावर्णमनोहरैः ।
निवेशयेद्यथामानं [23]पङ्क्तिस्था वरयोषितः ॥ ४७३ ॥

तासामग्रे न्यसेद्राजा पत्राणि रुचिराणि च ।
स्था[24]लानि च[25]षकाः शुक्ति(क्तीः) काच[26]काञ्चनराजि(ज)[27] ताः ॥ ४७४ ॥

वि(नि)धापयेद्यथायोग्यं प्रेयसीनां पुरो [28]नृपः ।
[29]पूरयेच्च[30]षकान् मृ(म)द्यैः सुराभिश्च तथासवैः[31] ॥ ४७५ ॥

---

१. A. लां । २. A. ल । ३. A. भा । ४. A. समप्रभा । ५. A. केननृकांचनसछायान् । D. कनकाश्चनसच्छान् । ६. A. ता । ७. A. ख । ८. A. काचनि । ९. A तांपा । १०. A. ख । ११. A. का । १२. A. ता । १३. A. न । १४. A. कान्ता । १५. A णीं । १६. A. दे । १७. D. णका । १८. A. ड्ड । १९. A. ते । २०. A. टै । २१. A. पक्ति । २२. D. ना । २३. A. ख । २४. A. कांचि । २५. A. ता । २६. A. मृषा । २७. A. पु । २८. A. खखन्मृ । २९. A. वौ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्रि(स्त्री)भिः प्रयत्नतो राजा पानार्थं[1] नृपयोषिताम् ।
उपदंशान् बहुविधान् पात्रेषु परिवेषयेत्[2] ॥ ४७६ ॥

वर्णयद्भिः सूपकारैः[3] स्वादवर्णरसा(न्) पृथक् ।
परिवेष्टय[4](ष्य) ततः स्कन्धान्[5] निर्गच्छेयुस्ततो बहु(हिः) ॥ ४७७ ॥

करकेषु स्थितैर्मद्यैः[6] पूरयेयुश्च याः[7](यान्) स्त्रियः[8] ।
मधुपूर्णेषु[9] पात्रेषु केषुचित्कमलं न्यसेत् ॥ ४७८ ॥

केषुचिन्नी[10]लनीरेजं केषुचिन्म[11]ल्लिकां क्षिपेत् ।
त[12]तः पात्रं सुरापूर्णं समादाय करेण तु ॥ ४७९ ॥

वा[13]मानामिकया मूर्ध्नि क्षिपे[14]युर्मधुविप्रुषः ।
प्रणिपत्य ततोऽन्योन्यं लब्धवानु[15]ज्ञां मुदा सुराम् ॥ ४८० ॥

च[16]षकेषु स्थितां तन्व्यः पिबेयुः पानलाल[17]साः ।
शुक्लां पाण्डुरसां स्वादुकृष्णाकटुकषायि[18]काम् ॥ ४८१ ॥

ईष[19]त्कटुकभूयिष्ठां[20] स्वादुद्राक्षादिजां सुराम् ।
घृतं[21] पीत्वा पिबेयुस्ताम[22]तीव मदवर्ध[23]नाम् ॥ ४८२ ॥

ता[24]लादिजं तथा [25]मद्यमीष[26]दीप(दीष)न्मुहुर्मु[27]हुः ।
आर्द्रकाद्युपदंशा(शां)श्च सर्वे [28]पुष्टा(सेवेयुस्ता)स्तदन्तरा
॥ ४८३ ॥

भक्ष्याणि भक्षये[29]युश्च खा[30]दयेयु(खादेयु)श्चणकादि[31]कम् ।
मांसान्यास्वादयेयुश्च पिबन्त्यो मधु योषितः[32] ॥ ४८४ ॥

वर्णयन्त्यस्तदास्वादं कट्[33]वम्लादिरसोत्कटम् ।
हर्षणं विविधं [34]मद्यं चित्तभ्रान्तिकरं बहु ॥ ४८५ ॥

---

१. A. र्थं । २. D. ष्ट । ३. A. रै स्वाद D. रैः स्वादु । ४. A. चे । ५. A. स्कंदा । ६. A. घै । ७. A. या । ८. A. य । ९. A. षु केषुकिकमलं । १०. A. लि । ११. A. लि । १२. A. त । १३. A. मना । १४. A. युः म । १५. A. ज्ञा । १६. A. ख । १७. A. सा । १८. A. का । १९. A. कडुंक । २०. D. ष्टां । २१. A. त । २२. A. स्ता । २३. A. नं । २४. D. डा । २५. मंद्यं । २६. A. दीवन् । २७. A. हु । २८. A. युस्तदनंतर । २९. A. य । ३०. A. देयश्च । ३१. A. कां । ३२. A. तं । ३३. A. ट्व । ३४. A. ममद्यं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

न कर्त्तव्यं(नर्तकं) गायकं तद्वज्जल्पाकं रोदकं तथा ।
हासकं गुप्तिदं धू[1]पस्तदा रागविवर्धनम् ॥ ४८६ ॥

पिबन्त्योऽति मुदायु[2]क्ताः कथय[3]न्त्यः पु(सु)रागुणान् ।
आस्फारवृन्द(अच्छारविन्द)प्रति[4]मा(ममी) मि(मी)षन्मत्ता
व[5]राङ्गनाः ॥ ४८७ ॥

[6]उत्सारयन्ति [7]पारीतं(वारित्रं) पद्मं(द्म) [8]भ्रान्त्या मुहुर्मुहुः ।
काश्चि(च्चि)दुत्पलप[9]द्माभलोचन(ना) प्रति[10]बिम्बकम् ॥ ४८८ ॥

इति चर(न्दीवर)दलभ्रान्त्या च[11]षकादेव(दप)कर्षतः (ति) ।
काचित्स्वदन्तप्रभया सितां कृष्णसुरामपि ॥ ४८९ ॥

पिबन्ति(न्ती) स्वादु नालक्ष्य(त्) पानानु(त्तु)विरत(ता) क्षणम् ।
समल्लीमधुपात्रेषु दृष्ट्वा [12]कुत(न्त)लमा(भां) सुरा(म्) ॥४९०॥

[13]बिभेति भ्रमर [14]भ्रान्त्या(स्प्र)ष्टुं काचिद्वराङ्गना ।
द्रुत(तं)पा[15](व)र्य(र्यां)नखच्छायां केतकीदलशङ्कया ॥ ४९१ ॥

स्फोटयेति सखी(खीं) वक्ति [16]क(का)चिन्मत्ता मुहुर्मु[17]हुः ।
निकटस्त(स्थ)पते[18]र्वक्त्रं च[19]षके प्रतिबिम्बितम् ॥ ४९२ ॥

काचिच्चुम्बति साल्हादं म[20]धुपानस्थ(च्छ)लेन तु ।
प्रियेण दत्तां मदि[21]रामनुरागरसाधिकाम् ॥ ४९३ ॥

अनिर्दि(र्दे)श्यरसां काचित् पीत्वा प्रतिगता वरा[22](रम्)
रूपयौवनसौभाग्यगर्व(र्व)बीजं हृदि[23]स्थितम् ॥ ४९४ ॥

कस्याश्चिन्मधुपानेन वर्धितं तत्क्षणादहो ।
क[24]स्याश्चित्प्रेमसम्बद्धो[25] क्रोधः[26] स्वपतिनिष्ठुरः ॥ ४९५ ॥

---

१. A. त्प । २. A. क्त । ३. A. न्त्य । ४. A. मिषमत्ता । ५. A. रोग । ६. A. गुत्स । ७. A. परीत । ८. A. भ्रात्या । ९. A. त्रा । १०. A. बिब । ११. A. खकादेपकर्षतः । १२. A. कूभ । १३. A. पि । १४. A. रभ्रात्याप्रष्टुकाचिद्वराङ्गना D. प्रष्टुंकाचिद्वरांगना तथा । १५. A. र्या । १६. A. कविर्म । १७. A. हु । १८. A. तर्व । १९. A. ख । २०. A. तु । २१. A. रांम D. रांअ । २२. A. राम् । २३. A. स्थि । २४. A. श्चा । २५. A. धो । २६. A. धस्यपतनिष्ठुरा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्षालितो मधुपानेन प्रेम नापगतं [1]त्वहो ।
चषकोदरविन्यस्तपाण्डुरासन(व)पा[2]नतः ॥ ४९६ ॥

अहो विचित्रं क[3]स्याश्चिद्वर्ति(र्धि)तो रागसागरः ।
तदाभून्मदिरापानं बन्धुवच्छोकनाशनम् ॥ ४९७ ॥

[4]चित्त(न्ता)घ्नं लाभवत्तासां मित्रवत् प्रे[5]मवर्धनम् ।
क्रोधवद्विनयध्वंसि मोहवत्स्मृतिनाशनम् ॥ ४९८ ॥

आर्तिव[6]द्गतलज्जं च तासां पा[7]नमभूत्तदा ।
क[8]पोलौ पाट[9]लच्छायो(यौ) लोहिते लोचने मनाक् ॥ ४९९ ॥

गद्गदं वचनं तासां शि[10]थिलं कायचेष्टितम् ।
अनिमित्तपदो हा[11]सो रोदने(नं) हेतुवर्जितम् ॥ ५०० ॥

सम्भाषणमनन्वी[12]तं कलहस्तु निरर्थ[13]कः ।
आशीर्भिः[14] सहिता गाली[15] हसितैः सह रोदनम् ॥ ५०१ ॥

ज्ञानेन सह सम्मोहस्तदा [16]तासां प्रदृश्यते ।
काचिद्गायति सानन्दं वर्षाकोकिलनिस्व[17]नः(ना) ॥ ५०२ ॥

विकलैः पदसञ्चारैः काचि[18]न्नृत्यति हर्षि[19]तः(ता) ।
का[20]चिद्गच्छति [21]धुन्वन्ती निरु[22]द्दिष्टपदो(दा) भुवम् ॥ ५०३ ॥

का[23]चिज्जल्पति निर्लज्जा गुह्यभा[24]षाक्षरैः पदैः ।
[25]जृम्भते कापि तन्वङ्गी ग्रहाविष्टेव भूरि[26]शः ॥ ५०४ ॥

काचिद्रोदिति निर्बन्धं दुःखिते च(व) मन[27]स्विनी ।
काचित्स्व[28]पिति मेदिन्यां रतिश्रान्तेव कामिनी ॥ ५०५ ॥

---

१. A. न्व । २. A. तत । ३. A. श्चा । ४. A. विताघं । ५. A. यवद्धनम् । ६. A. ह । ७. A. म । ८. A. पालो । ९. A. लं । १०. A. धिलं । ११. A. चा । १२. D. कं । १३. A. कम् । १४. A. र्भि । १५. A. लि । १६. A. गसां । १७. A. नी । १८. A. तृ । १९. A. त । २०. A. ग । २१. A. चुन्वाना । २२. A. दिष्टुपदो । २३. A. पिज । २४. A. वाक्षरै । २५. A. क्ष । २६. A. श । २७. A. शिनौ । २८. A. मति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

काचिन्मूर्च्छति चार्वङ्गी कामबाणैरिवाहता ।
शि[1]थिलीभूत[2]धम्मिल्ला विगलन्नी[3]विबन्धना ॥ ५०६ ॥

आपाण्डुराधरा काचिद्र[4]क्तान्त इव राजते ।
काचिदालोक्य भूपालं मदिरामदविह्वला ॥ ५०७ ॥

समा[5]ह्वयति कामेन गालीदानपरस्परम् (पुरःसरम्) ।
आलिङ्गन्ती नृपं [6]काचिन्निर्लज्जा मदनातुरा ॥ ५०८ ॥

काचि[7]च्छगति केशेषु से[8]र्ष्यवाक्यसमन्विता ।
काचिदञ्चलमाकृष्य सम्भोगार्थं समाह्वयत् ॥ ५०९ ॥

काचि[9]द्वक्त्रं समादाय प्रचुम्बति कपोलकम् ।
[10]एवमादिभिरन्यै[11]श्च भावैः[12] कान्ताज[13]नं(नैः)पृथक् ॥ ५१० ॥

आकुली[14] क्रियमाणोऽ[15]पि प्रमोदं भजते नृ[16]पः ।
[17]उद्घाटितकुचद्वन्द्वा निर्लज्जा [18]च गताम्बरा[19] ॥ ५११ ॥

दृष्ट्वा राज्ञि(ज्ञीं) समीपस्था(स्थां) निर्गच्छन्ति(ति) नयान्वित(ता) ।
एक एव स्थितो राजा वशामध्ये यथा द्वि[20]पः ॥ ५१२ ॥

शोभते सु[21]खसंस्पर्शा[22]ल्लालितो ललनाजनैः ।
क्रीड[23]न्नेवं कियत्कालं कृष्णो गोपीजनैरिव ॥ ५१३ ॥

वर्धयन्मन्म[24]थं तासां मदिरारसपानतः ।
इत्येवं [25]कथिता क्रीडा मधुपानसमुद्भवा ॥ ५१४ ॥

[इति मदिरापानक्रीडा ॥ १० ॥]

ततः प्रहेलिकाक्रीडा वक्ष्य[26]ते सोमभूभुजा ।
धर्मकामार्थकार्याणि निवृत्य(र्वर्त्य) पृथिवीपतिः[27] ॥ ५१५ ॥

---

१. A. थिलीभूत । २. A. चर्मिल्ला । ३. A. व । ४. A. सा । ५. A. हू । ६. A. कांचिनि । ७. A. ल । ८. A. र्य । ९. A. क्वं । १०. A. यवमाविभि । ११. A. श्वा । १२. A. वे । १३. A. न । १४. D. लः । १५. A. घै । १६. A. प । १७. A. उयद्घा । १८. A. श्च । १९. A. रा and adds दृष्ट्वा राज्ञि संमीपस्था निर्गच्छन्नि नयान्वित । २०. A. प । २१. A. ष । २२. A. ला । २३. A. नेवंकि । २४. A. थ । २५. A. प्राणिता । २६. A. क्ष्येते । २७. A. ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इष्टं मृष्टं ततो मु(भु)क्त्वा [1]सन्तुष्टो [2]हृष्टमानसः ।
प्रौ[3]ढ्यर्थं च मुदर्थं च निद्रालस्यनिवृत्तये ॥ ५१६ ॥

कुर्यात्प्रहेलिकाक्रीडां तथा प्रज्ञाविव[4]र्ध(र्धि)नीम् ।
आहूय चतुरा(न्) प्रा[5]ज्ञान् साहित्येषु विचक्षणान् ॥ ५१७ ॥

प्रहेलिकार्थवे[6]न्हं(त्तृं)श्च वाग्मिनश्च बहुश्रुतान् ।
योजयेन्नृपतिं(तिः) प्रा[7]ज्ञान् प्रहेलीप्रश्ननिर्णये ॥ ५१८ ॥

पृच्छत्येको वदत्ये[8]कस्तत्राज्ञाने पराजयः ।
प्रहेलि[9]काः स्युर्बहुधा चमत्कारकरा नृणाम् ॥ ५१९ ॥

कौतुकाकुलितं चे[10]तः कुर्वन्ति विदु[11]षामपि ।
स्वरूपप्रश्निकाः काश्चिद्धेतुप्रश्नास्तथा परे (राः) ॥ ५२० ॥

व्यस्ता[12](:)समस्तोत्तरा[13](:)स्युर[14]नेकार्थपदो[15]त्तराः ।
प्रक्षि[16]प्ताक्षरसार्थाश्च प्रक्षिप्तपदसार्थका(:) ॥ ५२१ ॥

उ[17]क्तोत्तरास्तथाकाश्चि[18]त्काश्चित्प्रोक्तपदोत्तराः ।
च्यु(च्यु)ताक्षरा*च्युतामात्रा त(स्त)था स्यु[19]श्च्युतबिन्दुकाः ॥५२२॥

व्यत्यस्तवर्ति(र्ण)काः काश्चित्काश्चिद् गूढार्थिकाः स्मृताः ।

[इति(अथ) स्वरूपप्रश्नः]

न बिभेति दुतोऽप्यन्य(न्यै)स्तेजसा च प्रकाशते[20] ॥ ५२३ ॥

विवृणोति रदावर्ता[21] [21]भीतिवस्तो(नितिवस्त्व)भिधीयताम् ।
एकं चक्रं द्विपाद्यं वा विना वा[22]हैः(:) प्रवर्त[23]ते ॥ ५२४ ॥

न गच्छति पदं चैकं(कं किं) तद्वस्त्वभिधीयताम् ।
भवत्येकोऽपि बहुधा तत्र तत्र प्रवर्तते ॥ ५२५ ॥

---

१. A. संष्टो । २. A. सा । ३. A. व्यर्थं । ४. A. र्द्ध । ५. A. ज्ञा । ६. A. त्ता च बहिश्रितान् । ७. A. ज्ञा । ८. A. drops this क । ९. A. का । १०. A. त । ११. A. खा । १२. D. स्तः । १३. A. रः । १४. D. न्ने । १५. A. म्तराः D. त्तरां । १६. A. सा । १७. A. तो । १८. A. श्चिगूढार्थिकाः स्मृता इति स्वरूप प्रश्ना । १९. A. तो । २०. D. र्ती । २१. A. नीत्ति । २२. D. हे । २३. A. तो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुनश्चैकत्वमायाति जानात्येनं[1] स बुद्धिमान् ।
[2]नोड्डीयते सपक्षोऽपि विना पादौ प्र[3]धावति ॥ ५२६ ॥

सम्पश्यमानः स्वपिति कोयं [4]सत्त्वः स कथ्यताम् ।
नित्यं गच्छति वेगेन गता[5] च न निवर्तते ॥ ५२७ ॥

क्षीयते वर्धते चैव कासौ नारी[6] निरू[7]प्यताम् ।
दिनार्ध[8](र्द्धे) क्षीयते कायो दिनार्द्धे[9] परिवर्धते ॥ ५२८ ॥

श्यामो वर्णो भवेद्यस्याः[10] त(स्त)स्या[11] नाम निरूप्यताम् ।
[12]द्वौ शुक्लौ द्वौ [13]तनू यस्य [14]द्वौ द्वौ यातौ[15] महीतले ॥ ५२९ ॥

चलन्तौ द्वौ[16] सदा दीर्घौ कोऽयं प्राणी निरूप्यताम् ।
महाभारसहो नित्य[17]मष्टभिश्चरणै[18]र्व्रजेत् ॥ ५३० ॥

द्वाभ्यां चलति यो यत्ना[19]त्तस्य नाम निरूप्यताम् ।
[20]एकनामांक्कि(ङ्कि)तो(तौ) जि(जी)वो(वौ) लोकद्वयहिते(तै)-
षिभि(:) ॥ ५३१ ॥

अस्पृश्यो(श्यौ) बुद्धिमाद्धि भिसुतो(मद्धिस्तु)को (कौ तौ)नाम्ना
निरूप्यताम् ।
दृशा[21] न शक्यते [22]द्रष्टुं चाक्के(वक्ति) न श्रूयते ध्वनिः[23] ॥ ५३२ ॥

[24]चेष्टते [25]जीवहीनो[26]पि कथ्यतां यदि कौशलम् ।
[27]ऊर्ध्व(र्ध्वं)मूल[28]मधः शाखास्तस्य मूलं फलं दलम् ॥ ५३३ ॥

नो[29](ना)दातुं शक्यते क(कैं)श्चित्कुत्र तिष्ठति कथ्यताम् ।
स्पृश[30]त्यदृश्यो गात्राणि लग्नोद्ध(ध)र्तुं[31] न शक्यते ॥ ५३४ ॥

प्रविष्टः स कटस्थाने [32]धृतप्राणो(णान्)हि [33]नस्ति कः ।
अहस्तापि शिलां भेत्ति विना पादैश्च [34]धावति ॥ ५३५ ॥

---

१. D. वं । २. A. नेडीयते सपक्ष्मेऽपि । ३. A. चावत । ४. A. सन्च सकल्प-म् । ५. A. वा । ६. A. र । ७. A. पि । ८. D. र्धं । ९. A. र्द्धे तस्पार्गो वर्णोभवे स्यास्तस्या । १०. D. स्य । ११. D. स्य । १२. A. हौ । १३. A. नुनु । १४. A. द्वै । १५. D. ते । १६. A. द्वा । १७. A. त्यं म D. त्यं अ । १८. A. णोर्वजेत् । १९. A. व्रत । २०. D. Omits this stanza । २१. A. श्यो ना । २२. A. मुस्प्यं वक्की । २३. A. नि । २४. A. वि । २५. A. जिवहिनोपि । २६. D. ना । २७. A. दु । २८. A. लवशाखास्त पुष्पं फलं दलम् । २९. A. ना दानु । ३०. A. दश्यो । ३१. A. र्तुनं । ३२. A. वृप्राणाहिनस्तिक । ३३. D. ना । ३४. A. चावांते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गर्जत्या[1]स्यं विना नारी कासौ नाम्ना निरूप्यताम् ।
शिखा[2](ख)यास्तानि [3]पुच्छेन बिम्ब(पिब)त्यत्यन्तनिर्मलः(लम्)
॥ ५३६ ॥

[4]पृष्ठं सली[5]लया(मलिनय)त्याशु कः[6] पदार्थः[7] प्रकाश्यता[8]म् ।
[9]ग्रहाङ्गवत्यसेव्यश्च [10]सदा धीरोऽपि ग[11]र्जति ॥ ५३७ ॥

वाहिनीभिरुपेतोऽपि युध्यते नैव को नृपः ।
आस्यं पिधा[12]य ब[13]ध्दा(ध्द्वा)ङ्गं तनितश्चेतना[14]न्तरम् ॥ ५३८ ॥

वक्ति व्यक्तं[15] जघन्योऽसौ कथ्यतां मम पण्डित[16] ।
उभये ज(योर्ज)ठरेष्वे[17](त्वे)को गर्भरूपेण तिष्ठति ॥ ५३९ ॥

यत्नान्नि(:) सारितो[18] बालः[19] पितरौ हन्ति तत्क्षणात् ।
यत्नादुत्पादितः[20] पुत्रः[21] पितृहन्ता [22]स्वयं भवेत् ॥ ५४० ॥

स्वयं च हन्यते पित्रा तं जानाति स पण्डितः ।
वनिता च हिता दृष्ट्या हस्तपादोपशोभते[23](भिता) ॥ ५४१ ॥

अनुधा[24]वतीच्छया सद्यः कासौ [25]ब्रूयान्मनीषिभिः(ब्रूत मनीषिणः)।
जडात्मा धावति क्षिप्रं सुवृत्तः कुटिलेश्वरः ॥ ५४२ ॥

निर्मलोऽपि मलोपेतो[26] यो जानाति स पण्डितः[27] ।
निश्रेष्ठ(श्रेष्टाः)(केन जायन्ते) केन जिवति(जीवन्ति)जन्तवः ॥५४३॥

केन रामा हरेच्चितं प्रवदन्ति(न्तु)विचक्षणः(णाः ।
कासौ वन्द्या भवेन्नारि(री) कासौ निद्य(निन्द्या) महीतले ॥५४४॥

एकनामाभिते(श्रिता) तज्ज्ञा गुणैर्ज्ञात्वा निरूप्यताम् ।
वृद्धानां स(सं)स्थिति ये(र्यै)न (ये)न तापो निवार्या(र्य)ते ॥ ५४५ ॥

---

१. A. र्जत्यास्यं D. र्जत्यास्यं । २ A. ख । ३. A. पुवत्यंत्यंनिर्मल । ४. A. प्र । ५. A. लि । ६. A. क । ७. A. र्थं । ८. A. स्ता । ९. A. ग्रहान् भ । १०. A. सं. ११. A. र्जिता । १२. A. चा । १३. A. धाग । १४. A. नंत । १५. A. त्तां । १६. D. तः । १७. A. प्रे । १८. A. तौ । १९. A. ल । २०. A. ता । २१. A. त्र । २२. A. drops स्वयं भवेत् । २३. A. तम् । २४. A. अनुचावछ्यानामि । २५. A. वूते म । २६. A. after this about 20 verses are missing । 27. D. gives इति प्रहेलिका क्रीडा after this and begins with सम्मुखौ कठिणौ V. 560 ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नृपानां(णां) जीवितं येन तं प्रचक्ष(क्ष्व) ग(गृ)हागतो(त)।
कस्मिन्दानफलं लभ्यं कस्मिं कु(न्कु)र्वि(र्वी)त भा(भो)जनं
(नम्) ॥ ५४६ ॥

कचिद्रष्ट (कस्मिन्हृष्टः) पतेद्रागात् तत्प्रचक्ष्व विचक्षणा(ण)।
प्रक्षिप्ताक्षरसार्थाता(र्थास्ता)..... ॥ ५४७ ॥

कस्मिन्वने भवेदु(द् दुः)खं [1]वाने कस्मिन्मदो भवेत्।
कस्मिन्दूते पतेद्द(द् द्द)ष्टिरिदं ब्रूत विपश्चित(ताः) ॥ ५४८ ॥

फलागर्भे(र्तं)दश(शे)त्येषामादौक्षिप्तौ(प्तौ)कमक्षरम्।
आ(अ)भिधानानि कुर्वीत(र्वन्तु) सार्थकानि विचक्षणाः ॥ ५४९ ॥

मसं पक्षं करं चेति टनं [2]डनं पनं लकं।
क्षिप्ते(प्तै)क मक्षरं त्वादा(दौ)वृत्तं वृत्ता(त्ते)भिधीयते ॥ ५५० ॥

का(क)रत्राणे शरे लक्ष्ये व्यन्न(न्नं) सन्नं व्यनं न्विद(म्)।
मध्यक्षिप्ते(प्ते)न वर्णेन संगत(तं) रु(कुरु) पण्डिता(त) ॥ ५५१ ॥

प्राणार्थे च त्रपार्थे च रसार्थे सङ्गतं कुरु।
मध्यक्षिप्ते(प्ते)न वर्णेन अन(नं)भिन्नं हतं न्वि(त्वि)दम् ॥ ५५२ ॥

नृपेण वि(वी)रवृत्तेन लोक्ष्यौ(क्ष्यौ) त्याज्यो(ज्यौ) प्रयत्नतः।
अन्तक्षिप्ते(प्ते)न वर्णेन नातिज्ञैश्चै(ज्ञश्चे)द्वदेदिम(द)म् ॥ ५५३ ॥

शस्त्रपातेषु किं कार्यं(किं कार्यं) बालकेषु च।
(आद्यन्तवर्णक्षेपेन क्षं सार्थं कुरु पण्डित) ॥ ५५४ ॥

लोमाकाण्यक्षराण्यादौ वर्गमन्ते निधाय च।
वारद्वयं समुच्चार्य सार्थं कुरु पदत्रयम् ॥ ५५५ ॥

.... उक्तोत्तरा ॥ ५५६ ॥

राजते कीदृशो भूत(पः) श्राद्धे विप्रे किमुच्यते।
पाय(पि)नां को(ऽ)भयं कुर्यादच्युतो मद(धु)सू(दू)नः ॥ ५५७ ॥

---

१. A. वने कदुखं वने। २. A. डपनं लकं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कामदः कामजन्मा च (कामहा)कालि(ल)विश्वतः ।
त्रय(:) सोम(मं) नृपं पातु(न्तु) ब्रह्मवि(ष्णु) महेश्वरा(:) ॥५५८॥

प्रोक्ता(क्त)पदोत्तरा ।

विज(धृ)तः को भवेच्छीघ्रं राजा कः सेव्यते जनैः ।
को भाति कुभमस्था(कुचमध्यस्थो)मुक्ताहारो गुणान्वितः ॥५५९॥

च्युताक्षरा ।

[इति प्रहेलिका(क्रीडा) ॥ ११ ॥]

सम्मुखौ [1]कठिणौ (नौ) [2]व्यूहौ स्थापनीयौ परस्परम् ।
आदिपदै(पादे) द्विको[3]णस्थौ स्यन्दनौ स्थापयेद् बुधः ॥ ५६० ॥

तदन्तरे को[4]ष्ठयुगे [5]क्षिपेच्च तुरगद्वयम् ।
ततोप्यन्त द्वि(र्द्वि)पद्वन्द्वं तन्मध्ये नृपमन्त्रिणौ ॥ ५६१ ॥

एकपा[6]दौ(दे) विशेषेण स्थापनीयौ[7] तु मन्त्रिणा ।
तद[8]ग्रकोष्ठेष्वष्टासु [9]पदातीनष्ट निक्षिपेत् ॥ ५६२ ॥

एवं नि[10]जबल(ल)न्यासं कुर्यात्प[11]ङ्क्तिद्वये परम्(रः) ।
कोणेन [12]गच्छति रथो विहायैकपदान्तरम्[13] ॥ ५६३ ॥

च[14]तुःको(ष्को)णपदोपान्तपदानि तुरगो [15]व्रजेत् ।
चतुर्विधि(र्वीथि)षु नागेन्द्रो गच्छे[16]त्सर्वत्र लङ्घति ॥ ५६४ ॥

पदमे[17]क(कं)द्वयं वापि सर्वाण्यपि समीर(रि)तः ।
मन्त्री निकटकोणेषु चतुर्ष्वपि हि गच्छति ॥ ५६५ ॥

राजा समीपकोष्ठे[18]षु दिक्षु सर्वासु गच्छति ।
चलत्येकेन पादौ तौ[19](दातिः) हन्ति कोणद्वयेन सा(सः) ॥५६६॥

---

१. A. drops कठिणौ । २. A. हो । ३. A. णास्थो पये स्यन्दनौ स्थापयेद्बुध । ४. A. ष्ट । ५. A. निक्षिपेतुरगं द्वयम् । ६. A. पंचौ । ७. A. यो नु । ८. A. ग्रकोष्ठेष्वसु । ९. A. पादाति । १०. A. जैव । ११. A. त्व । १२. A. गाच्छ । १३. A. राम् । १४. A. तुरको १५. A. द्व । १६. A. च्चर्वि । १७. A. व । १८. D. णे । १९. A. तु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गच्छत्येवाग्रतो नित्यं स(न) व्यावृत्तः[1] कदाचन[2]
पद(आदि)पङ्क्तिचतुष्कं(ष्के) तु गत्वा मन्त्री[3] भवेच्च सः ॥५६७॥

पश्चान्निवर्तते योऽथ[4] मन्त्री पदचतुष्टये ।
नृपो मन्त्री रथो नागो[5] वाजी च स्वपदस्थिता(तः) ॥ ५६८ ॥

पदान्तरं पदा याति[6] हन्ति तत्स्थं परं बलम् ।
पदातिस्थ(स्तु) द्विकोणस्थं पुरतो हन्ति तद्धतम् ॥ ५६९ ॥

द्वीपतः(द्विपादाः) सैनिकं(का) यस्मात् तद्रक्षानिपुणो भवेत् ।
कोणस्थस्यार्थ[7] रथस्यैकं पदं तज्ज्ञं(ज्ञैः) निगद्यते ॥ ५७० ॥

तृतीयायां[8] च पञ्चम्यां पङ्क्तौ पदचतुष्टयम् ।
सप्तमी[9](मीं) पङ्क्तिमाप्तस्य परावृत्तिर्यदा भवेत् ॥ ५७१ ॥

अन्यमार्गेण यातस्य सप्तमी द्विपदं(दा) भवेत् ।
प्रान्तपङ्क्तिनिविष्टस्य स्यन्दनं च (नस्य) पर(द)द्वयम् ॥ ५७२ ॥

एवं तु द(प)दविन्यासः स्यन्दन[11]स्य निरूपितः[12] ।
कोणपार्श्वस्थितस्यास्य तुरगस्य पदत्रयम् ॥ ५७३ ॥

कोणस्थस्य पदद्वन्द्वं प्रान्ते पदचतुष्टये(यम्) ।
द्वितीयवलये कोणे हये पदचतुष्ट(हयस्य च पदत्र)यम् ॥ ५७४ ॥

द्वितीयवलयेऽन्यत्र पदषट्कं निगद्यते ।
मध्ये षोडश[13]स्वेतेषु स्थितस्य तुरगस्य च ॥ ५७५ ॥

पदाष्टकं विनिर्दिष्टं चतुरङ्गविशारदैः[14] ।
स्वीयस्थानस्थितस्यापि यत्र तत्र स्थितस्य च ॥ ५७६ ॥

चतुर्दशपदानीह कथ्यन्ते सामजन्मना(नः) ।
बहिःकोणस्थितस्यैकं प्रान्तस्त(स्थ)स्य पदद्वयम् ॥ ५७७ ॥

---

१. A. व्या । २. A. त्यें । ३. A. नः । ४. A. चसोभवेत् । ५. A. श्वानि । ६. D. स्वस्वस्थाने च संस्थितः । ७. D. न्ति । ८. A. श्च । ९. A. यांचप । १०. D. भिः । ११. A. स्व । १२. A. ता । १३. D. श्वे । १४. A. दौ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पदान्यपि च चत्वारि तिष्ठतोऽन्यत्र मन्त्रि(प्रान्त)तः ।
बहु(हिः)पङ्क्तिस्थितस्याथ नृपस्य पदपञ्चकम् ॥ ५७८ ॥
तत्कोणे त्रिपदं ज्ञेयं [1]अ(यम)न्यत्रोक्तं [2]पदाष्टकम् ।
निर्मितं चतुरङ्गज्ञैः [3]तदा तस्य(पदातस्य) पदत्रयम् ॥ ५७९ ॥
पदसङ्ख्या मया प्रोक्ता चतुरङ्गेषु निश्चिता ।
सीमाख्या प्रथमो [4]व्यूहः सुमेरुस्तदनन्त[5]रम् ॥ ५८० ॥
गोमूत्राख्यस्तृतीयः स्यादेते व्यूहा यथारुचि ।
एकपङ्क्तौ स्थिताः सर्वे लहरी[6]व पदातयः[7] ॥ ५८१ ॥
प्रवृत्ते[8] च(वर्तन्ते) यदा व्यूहे सीमाख्यः[9] स [10]उदाहृत(तः) ।
सुमेरुशिखराकारं चतुरङ्गबलं यदा ॥ ५८२ ॥
क्रियते खेलकै[11]र्व्यूहः सुमेरुः[12] परिकीर्तितः[13] ।
[14]गोमूत्रवत्प्रवर्त[15]न्ते पदाता यत्र खेलने ॥ ५८३ ॥
गोमूत्रव्यूह उद्दिष्टश्च[16]तुरङ्गविशारदैः[17] ।
र[18]थनागाश्वपादान्ते(ताः) मन्त्रिणश्च नृपादपि ॥ ५८४ ॥
ह्यर्थं[19] प्रकल्पये[20]त्प्राज्ञः परसै[21]न्ये प्रयत्नतः ।
गो[22]पायेच्च नृपः(पं) स्वीयं मन्त्रिणं च तथा गजम् ॥ ५८५ ॥
एवं कृते निबध्नीया[23]ल्लक्ष(क्ष्य) स्थाने परं नृपम् ।
पञ्चम्यां च पदं[24](भटं) पङ्क्तौ षष्ठ्यां पङ्क्तौ तु मन्त्रिणाम्-
(णम्) ॥ ५८६ ॥
सप्तम्यां स्यन्दनं कुर्याद्ध्रु[25]व[26]न्धः स्मृतो बुधैः[27] ।
यत्र मन्त्रि[28] भटौ[29] स्यातामन्योन्यपरिरक्षकौ ॥ ५८७ ॥
षष्ठ्यां मन्त्री[30] भटश्चैव पञ्चम्यां [31]दृढबन्धनम् ।
रक्षणे सुभटा यत्र परस्परहितैषिणः ॥ ५८८ ॥

---

१. A. म । २. A. यथा । ३. A. पदान्तस्य । ४. A. बू । ५. A. रः । ६ A. च । ७. A. य । ८. A. तये । ९. A. रव्य । १०. D. उच्यते । ११. A. व्यूह । १२. A. रु । १३. A. ता । १४. A. यो । १५. A. ते । १६. A. च । १७. A. दै । १८. A. थानागानृ-पादंते । १९. A. र्थं । २०. A. येत्येग्राज्ञ । २१. A. न्यैं । २२. D. प । २३. A. ल । २४. D. द । २५. A. ज । २६. A. बंधस्मिता । २७. A. द्धैः । २८. D. न्त्री । २९. A. टो । ३०. A. न्त्रि । ३१. A. द्र ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अङ्गरक्षा इव रणे तमाहुर्[1]बन्धसंज्ञकम् ।
स्वस्य पङ्[2]क्तिचतुष्के तु परसैन्यं निवारयेत् ॥ ५८९ ॥

भित्त्वा परबलं प्राज्ञः[2] पर[3]क्षेत्रमथाविशेत् ।
राजवीथिं समुत्सृष्ट(ज्य) राजानं तत्र निक्षिपेत् ॥ ५९० ॥

तस्य [4]सञ्छादनार्थं तु पुरतो मन्त्रिणं क्षिपेत् ।
तस्य बाधापरीहारं रथे[5]नास्वे(श्वे)न कारयेत् ॥ ५९१ ॥

चतुरङ्गबलाभिज्ञः[6] क्षिप्रमेवं विजेष्यति ।
विचार्य चालयेत्प्राज्ञ[7]श्चाल्यमानं रथादिकम् ॥ ५९२ ॥

निक्षिपेत्त[8]त्परीक्ष्यैव यत्र बाधा न विद्यते ।
आघाताय यदा गच्छेत्तस्य रक्षणमाचरेत् ॥ ५९३ ॥

तस्माद[9]धिकमालोक्य रक्षणानि समाचरेत् ।
वध्यस्था[10]नस्थितो राजा न हन्तव्यः[11] कदाचन[12] ॥ ५९४ ॥

वधं प्राप्स(प्स्य)ति ते राजा गच्छ[13]त्विति वदेत्सुधीः ।
वध्यो राजेति वक्तव्यो न वधेतु(त्तु) यथाऽपरः ॥ ५९५ ॥

तादृग्विधे पदे स्थाप्य(प्यः) खेलकेन विपश्चिता ।
रक्षा विधेया यत्नेन युगपद्राजदन्तिनौ(नोः) ॥ ५९६ ॥

यस्मा[14]त्पलायते राजा [15]द्वीपोऽवश्यं निपात्यते ।
गज(जो) वीथ्यां यथारूपं केनापि पिहितो भवेत् ॥ ५९७ ॥

तथा पिधायका[16]द्विद्धि(बुद्धि) न(र्न)कार्या परघातिनी ।
गज(जा)घातापिधाना[17](नो)सौ यदु[18]द्धाच्च(तमुत्सृज्य) नृपं
[19]युधी(धि) ॥ ५९८ ॥
परं हन्यात्तदा राजा(ज) गजघातास्पदं भवेत् ।
गतिरोधं नरेन्द्रस्य कुर्याद्यत्नेन कोविदः ॥ ५९९ ॥

---

१. A. वेंध । २. A. ज्ञ । ३. D. क्ष । ४. A. संस्था । ५. A. न । ६. A. ज्ञ । ७. A. ज्ञः चा । ८. A. प । ९. A. वि । १०. A. drops नस्थि । ११. A. व्य । १२. A. नः । १३. A. न्वि । १४. A. ष्म । १५. A. द्वि । १६. A. धीद्वि । १७. A. नी । १८. A. द्याद्य । १९. D. प्रति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नियोज्य घातका[1]न्राज्ञः[2] पदे स्व(पादैस्त)स्य समन्ततः[3] ।
पुनरन्येन केनाऽपि वि[4](व)ध्यो राजेति निर्दिशेत् ॥ ६०० ॥

गति[5] स्थितिविहीनत्वात्तत्पक्षस्य पराजयः[6] ।
किंवा सुरक्षिता[7]न्योधानश्वं[8] वा [9]स्यन्दनं गजम् ॥ ६०१ ॥

मन्त्रिणं वा न्यसेत्प्राज्ञो गतिरोधाय भूपतिः[10] (तेः) ।
तदाप्य[11]न्येन केनापि वक्तव्यो नृपतेर्वधः ॥ ६०२ ॥

उदि[12]तस्तु वधोन्यो[13]न्य(ते तु वधेऽन्येन) नृपपक्षपराजयः[14] ।
यदि वा [15]स्वबलं तिष्ठे[16]न्नृपमार्गे [17]निरोधकृत् ॥ ६०३ ॥

तथाप्य[18]न्येन केनापि विद्धे राज्ञि पराजयः[19] ।
प्रका[20]रत्रितयेनैव पराजय[21]उदीरितः ॥ ६०४ ॥

खेलने चतुरङ्गाख्ये चतुरङ्गस्य यो भवेत् ।

[इति चतुरङ्गविनोदः ॥ १२ ॥]

सर्वतोभद्रनामा[22]न्यः कथ्यते खेलनक्रमः[23] ॥ ६०५ ॥

एकत्र बलविन्यासो राज्ञा(जा) [24]चान्यत्र केवलः ।
स राजा गजवद्याति रथवद्वाजिवत्तदा[25] ॥ ६०६ ॥

म[26]न्त्री(न्त्रि)वद्भटवच्चापि स्वपदैर[27]पि सर्वतः
एवं पदेषु सर्वेषु खेलकेन नियोजितः ॥ ६०७ ॥

[28]याति हन्ति च[29] बध्नाति परकीयबले नृपः[30] ।
तस्य मार्गे(र्ग) निरोधाय [31]रचनीयं मनीषि[32]णा ॥ ६०८ ॥

---

१. A. रा । २. D. जा । ३. A. त । ४. D. वि । ५. D. त । ६. A. य । ७. D. यो । ८. A. स्वं । ९. A. स्प । १०. A. ति । ११. A. ने । १२. A. तोनु । १३. A. न्योनृप । १४. A. य । १५. A. स्थां । १६. A. नृ । १७. A. ति । १८. D. ने । १९. A. य । २०. A. क । २१. D. मुदीरयेत् । २२. A. न्य । २३. A. म । २४. A. स्वा । २५. A. था । २६. A. न्त्रा । २७. A. षिर्धतः । २८. A. यांति । २९. A. द । ३०. A. पा । ३१. A. द । ३२. A. खि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गजाभ्यां[1] वाजियुग्मेन रथाभ्यां मन्त्रि[2]णा भटैः[3] ।
शनैः शनैः पुरो नीत्वा स्वबलं [4]कृतरक्षणम् ॥ ६०९ ॥

सङ्कटे पा[5]तयेदेनं यथाऽसौ निष्पदे(दो)भवेत् ।
एवं [6]कृते जयो नेतुर्बलयुक्तस्य खेलने ॥ ६१० ॥

अन्यथा विजयस्तस्य केवलस्य महीपतेः[7] ।
गोप्य[8]स्तत्र प्रयोगेण चतुरङ्गक्रमोऽपरः ॥ ६११ ॥

कथ्यते दायसङ्ख्याभिः सोमेश्वरमहीभुजा ।
नृप(पः)[9]षट्केण सञ्चार्यो मन्त्री पञ्चकदायतः[10] ॥ ६१२ ॥

चतुष्केण गजो गच्छे[11]त्त्रिभिर[12]श्वः प्रधावति ।
द्विकेन स्यन्दनो याति [13]याति पत्ति(त्तिः) पदेन च ॥ ६१३ ॥

खेलनं पूर्ववत्का[14]र्यं कृतरक्ष(क्षं) विचक्षणैः ।
कौ(गो)लकैर्गोलकाभ्यां च केलिरेखा(षा) प्रवर्तते ॥ ६१४ ॥

एकैकवारं पा[15]तः स्यात्पर्यायेणोभ[16]योरपि ।
च[17]त्वारो लेखका(खेलका) यत्र [18]तत्र व्यूहो निरूप्यते ॥ ६१५ ॥

एकान्तरं प्रकर्तव्यं पाण्डुरं लोहितं बलम् ।
र[19]थाः कोणेषु संस्थाप्यास्ततो दक्षिणतो हयाः ॥ ६१६ ॥

अ[20]श्वानां दक्षिणे पार्श्वे दन्तिनो दन्ति(न्त)नि[21]र्मिताः ।
तेषां समीपे राजानश्चत्वारो मन्त्रिवर्जिताः[22] ॥ ६१७ ॥

न हन्तव्यो नृप[23]श्चेति नियमो नात्र विद्यते ।
चतुर्णां पातनं प्रोक्तं संकृ(तत्क)र्तव्यं पुनः पुनः ॥ ६१८ ॥

---

१. A. स्या । २. D. णां । ३. A. भाटे । ४. A. क्र । ५. A. द । ६. A. क्र । ७. A. ते । ८. A. सू । ९. A. क । १०. A. त । ११. A. त्रि । १२. A. स्व । १३. A. drops this याति । १४. A. र्यो । १५. A. त । १६. A. ये । १७. A. त्कार । १८. A. drops तत्र । १९. A. था । २०. A. स्वा॥ २१. A. म्मि । २२. A. ता । २३. A. श्चे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यस्य[1] कस्यापि हन्तव्या ले[2]खकै(खेलकैः) सुभटादिकाः[3] ।
शिष्यते तु यदा [4]चैको बलमध्ये तु कश्चन ॥ ६१९ ॥

तदा ति(नि)वर्तनं लेखा(खेलात्) सङ्[5]ख्यया विजयो भवेत् ।
पदातिरेक[6]सङ्ख्यः स्याद्वि[7]सङ्ख्यः स्यन्दनाः[8](नः) स्मृतः[9] ॥ ६२० ॥

त्रिसङ्ख्यो घोट[10]कः प्रोक्तो[11] च(क्तश्च)तुःसङ्ख्यस्तु कुञ्जरः ।
षट्स[12]ङ्ख्यः [13]पृथिवीपा[14]लः पणे सङ्[15]ख्याविचारणा[16] ॥ ६२१ ॥

स्वबलादधिकं यस्य [17]विजयं तस्य निर्दि[18]शेत् ।
ही[19]ने पराजयं विद्यात्समे सममुदाहृतम् ॥ ६२२ ॥

चतुर्णां लेखने(खेलने) तज्ज्ञै[20]र्वि[21]धिरे[22]ष निरूपिता[23](तः) ।

[इति चतुरङ्गशिक्षा]

पसिपुसेटै[24]नेचै गु(गू)नीचुगिच नाटसापी ॥ ६२३ ॥

सू[25]पैरेदैगेदू गुचि गदारया(पा)सीपूसौ(सै)टे ।
नैचे[26]नूसुपेगै चूगीना च टासप[27]रि देनु[28](गैचूगीचानटास
पिसुपेरैदेनु) ॥ ६२४ ॥
दु(डू)रीदी[29] दु(दिदु)रिदारू(दीरु)टि, दुनीचि(दुनिची)-
गादरा(टीरू) ।
[30]चगत(न)दटरसपवर्णाः क्रमतोकारादिकैर्विरामयुताः[31] ॥ ६२५ ॥

चतुरङ्गकोष्टलिखिता दायाश्रिते(त्ते) सदा तज्ज्ञैः(ज्ज्ञैः) ।
अष्टाक्षराष्टसूत्राणि पठित्वा हृदये पटे[32](पुनः) ॥ ६२६ ॥

पटे पक्षे(कोष्टे) क्षिपेदस्वं(श्वं) यत्र सूत्राक्षरं भवेत् ।
यस्मिन्वर्णे प्रवृत्तोश्वो(गृ) हि(ही)त्वा तं(समापयेत्) ॥
[33]पुनरादेश(देः स)मारभ्य पठेद्यावत्तदक्षरम् ॥ ६२७ ॥

---

१. A. स्या । २. A. ष । ३. A. का । ४. A. श्चै । ५. A. संख्य । ६. D. संख्याः । ७. A. ना । ८. D. ताः । ९. A. क । १०. A. क्त । ११. A. संख्य । १२. A. प्रथ । १३. A. ल । १४. A. णाम् । १५. A. drops विजयं तस्य । १६. A. शो । १७. A. न । १८. A. वि । १९. D. खा । २०. A. त । २१. A. नै । २२. पैं । २३. A. चै । २४. A. पि । २५. D. तु । २६. A. रुदिदुनिचिगरदरा । २७. A. व । २८. A. ता । २९. D. ठेत् । ३०. A. हित्वा तं समारभ्य ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवं [1]कृते प्रयत्नेन चतुःषष्टिपदं व्रजेत् ।
यत्र कुत्र स्थितो वाजी कौतुकं जनये[2]न्नृणाम् ॥ ६२८ ॥

[इति चतुःषष्टिपदतुरङ्गविन्यासः]

प१ सि२ [3]पु३ से४ टै५ ने६ चै७ गू८ ॥ १ ॥
नी९ [4]चु१० गि[5]११ च१२ ना१३ ट१४ सा१५ पी[6]१६ ॥ २ ॥ ॥६२९॥

सू१७ पै१८ रे१९ दै२० गे२१ दू२२ गु२३ चि[7]२४ ॥ ३ ॥
ग२५ दा२६ र२७ पा२८ सी२९ पू३० सै३१ टे३२ ॥ ४ ॥ ॥ ६३० ॥

नै३३ चे३४ नू३५ गै३६ चू[8]३७ गी३८ चा३९ न४० ॥ ५ ॥
[9]टा४१ स४२ [10]पि४३ सु४४ पे४५ रै४६ दे४७ नु४८ ॥ ६ ॥[11] ॥६३१॥

टू[12]४९ री५० दि[13]५१ टु[14]५२ रि[15]५३ दी[16]५४ रु५५ टि५६ ॥ ७ ॥
दु[17]५७ नि[18]५८ ची[19]५९ गा६० द६१ रा६२ टी६३ रु(रू)६४ ॥ ८ ॥
॥ ६३२ ॥

चतुरङ्गसमुद्[20]भूता क्रीडा चतुर[21]रञ्जिनी ।
कथिता सोमभूपेन [22]कथ्यतेऽक्षसमुद्भवा ॥ ६३३ ॥

[इति चतुरङ्गक्रीडा ॥ १२ ॥]

विंशत्यङ्गुलविस्तारं फलकं वरदा[20]रुजम् ।
चतु[21]वितस्तिकं दैर्घ्ये(र्घ्ये) विंशत्यङ्गुलमुच्छ्रये ॥ ६३४ ॥

ग्र(गृ)हास्तत्र प्रकर्तव्याश्चत्वारो विंशतिस्तथा ।
चतुरङ्गुलविस्तारा दैर्घ्येण च नवाङ्गुला ॥ ६३५ ॥

वृत्ता(ता)यता द्विपङ्[23]क्तिस्था(स्थाः) षट्कद्वयविराजिता(:) ।
पङ्[24]क्तिद्वितयमध्ये च त्यजेदेकाङ्[25]गुलाभ(लाम्भु)[26]वम् ॥ ६३६ ॥

---

१. A. क । २. A. तृ । ३. A. पु ३ ४ । ४. D. चू । ५. A. गी ११ । ६. A. drops पी १६ । ७. A. वि । ८. A. च । ९. A. टी । १०. D. पी । ११. A. drops ॥ ६ ॥ । १२. A. दू । १३. A. दे । १४. A. द्रू । १५. A. दि । १६. A. चि । १७. A. मा । १८. A. drops this र । १९. D. जीवतुल्यधिया तथा ॥ १ ॥ अपवादः । २०. A. र । २१. D. विंशतिकं । २२. A. वे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुचाकारा प्रकर्तव्या अङ्गुलित्रितयोच्छ्रिता[1] ।
सार्द्धद्व्यङ्गुलविस्तारा दन्तिदन्तसमुद्भवा ॥ ६३७ ॥

दश[3]पञ्च सितास्तत्र दशपञ्च विचित्रिता(:) ।
त्रिंश[5]देताः समाख्या[6]ताः सा[7]र्यः [8]प्रांशु(पाश)कके लिषु ॥ ६३८ ॥

द्वे द्वे शिरसि संयोज्ये पाण्डुरे चित्रिते [9]तथा ।
सित[10](शिरः)साणीदिशो भागे षष्ठे गेहे विचि[11]त्रिता(:) ॥ ६३९ ॥

चतस्रः स्थापनीयास्ता बहिः [12]षट्सु गृहेषु च ।
[13]चतस्रश्चचतुरर्थे(स्तु चतुर्षु) स्युरू(रु)पशीर्षे तु पञ्च ता(:) ॥ ६४० ॥

[14]एवं सिताश्च कर्तव्याश्चतुःसारीष्वयं विधिः ।
कथ्यते पञ्चसारीकः क्रमः स्थापनकर्मणि ॥ ६४१ ॥

पञ्च मूर्धनि कर्तव्याः[15] पञ्च स्यु[16]र्द्वादशे ग्र(गृ)हे ।
अन्यपङ्क्तावपि स्था[18]प्याः पञ्च षट्के तु सद्मनि(नाम्) ॥ ६४२ ॥

एवं पञ्चदश स्थाप्या अन्यवर्णाश्च सार[19]यः ।
इत्येवं पञ्चसारीके[20] कथितः[21] स्थापने क्रमः[22] ॥ ६४३ ॥

तात्कालिके[23]ऽपि पञ्चस्य व[24]क्ष्यते स्थापनक्रमः[25] ।
सार्ये[26] द्वे शिर[27]सि स्थाप्ये एकी[28](का) च तदनन्तरम् ॥ ६४४ ॥

अन्या(न्ये)षट्के गृहे पञ्च पञ्चापि तदनन्तरम् ।
अपशीर्षेऽन्यपङ्क्तेश्च [29]धार्या(सार्यः) पञ्चैकवर्णिका(:) ॥ ६४५ ॥

आरभ्य शिरस(सः) स्थाप्ये द्वे द्वे ष[30]ष्ठगृहावधि ।
अन्यपङ्क्ताविमाः[31] स्थाप्याः पञ्च द्वा(वा)दश सारयः[32] ॥ ६४६ ॥

---

१. A. चि । २. A. छि । ३. A. र्श । ४. A. ड्ता । ५. A. तां । ६. A. र्य्य । ७. A. प्रा । ८. A. ष । ९. A. drops this त । १०. D. त्र । ११. A. बद्भु । १२. A. चस्तु चतुर्थं स्फुरूपं । १३. A. सिताश्च तत्र कर्तव्या । १४. D. व्या । १५. A. द्वा । १६. A. प्य । १७. A. सारया । १८. A. को । १९. A. त । २०. A. म । २१. A. केवि । २२. A. क्ष । २३. A. म । २४. A. र्यो । २५. A. सिंस्थाप्ये । २६. A. किं । २७. A. वा । २८. A. ष्ठ । २९. A. मा । ३०. A. य ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गृहाद् द्वितीय[1]मा(यादा)रभ्य गेहे गेहे द्वयं द्वयम् ।
एकवर्णा न्यसेच्छा[2](त्सा)री याव[3]च्छष्ठनिकेतनम् ॥ ६४७ ॥

ततोऽन्यवर्ण(र्णान्) सर्वा(र्वां)स्तान्नि[4]क्षिपेत्सप्तमे[5] गृहे ।
द्वौ सारौ[6] दशमे वेश्मन्येका एकादशे पुनः ॥ ६४८ ॥

द्वादशेप्येव[7] ए(मे)कः स्यादेकसारो[8]ऽवशीर्षके ।
एवं पो[9]टलिविन्यासः कथितः[10] सोमभूभुजा ॥ ६४९ ॥

द्वि(द्वे)शीर्षे तदनुस्थाप्याश्चतस्रः सारिकाः[11] पृथक् ।
अनाय(वृ)त्यास्तत(च ता)स्तिस्रः[12] स्थाप्याः[13] पञ्चसु वेश्मसु ॥६५०॥

द्वादशे पूर्ववर्णाः[14] स्युः पञ्च, पड्·क्त्यन्तरं पुनः ।
चतस्रो दशमे गेहे न्यासो म(ह्य)न्तरसारिके ॥ ६५१ ॥

सार्ये(र्यौ) च[15] शिरसि स्थाप्ये षष्ठे पञ्चान्यवर्णिका(काः) ।
ति[16]स्रोष्टाय(ष्टमे) तथा पञ्च द्वादशे पूर्ववर्णिका(काः) ॥ ६५२ ॥

अन्यसामपि सारीणामेवमेव[17] निवेशनम् ।
गोलकक्रीडने प्रोक्त(क्तः) सारीणां स्थापनक्रमः[18] ॥ ६५३ ॥

पाशकौ द्वौ [19]प्रकर्तव्यौ त[20]र्जनीमातृ[21](त्र)कौ शुभौ ।
चतुरस्रौ[22] समौ श्लक्ष्णौ गजदन्तविनिर्मितौ ॥ ६५४ ॥

तयोश्चतुर्षु पार्श्वेषु तिलकाकारबिन्दवः[23] ।
कर्तव्या दायसंज्ञार्थं तेषां स्थानं निगद्यते ॥ ६५५ ॥

चतुरस्राय(न्ते त)तो मध्ये पञ्चकोऽसौ प्रकीर्तितः[24] ।
पर्यन्त(न्ते)व[25]ऋसङ्काशौ[26] द्वौ बिन्दू[27] द्विकमुच्यते ॥ ६५६ ॥

---

१. A. दा । २. A. छा । ३. A. त्पष्ट । ४. A. त्रि । ५. A. ग्र । ६. A. रा गेहे दशमे घर्यौस्सत्पेकादसोमुनः । ७. A. क । ८. A. रे । ९. A. दृजि । १०. A. त । ११. A. का । १२. A स्र । १३ A. प्या । १४. A. र्णा । १५. A. श्च । १६. A. स्रा । १७. D. वं । १८. A. म । १९. A· प्रेकर्तव्यो । २०. A. ज । २१. A. त्रुको । २२. A. स्रो । २३. A. व । २४. A. ता । २५. A. द्व । २६. A. सौ । २७. A. न्दौ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मध्ये पञ्चक [1]सङ्काश(ः)प्रान्तयोर्व[2]ज्रसन्निभौ ।
त्रिकं दाय(यं) विजानीया[3]त्सारीक्रीडाविचक्षणा(णः) ॥ ६५७ ॥

द्विकमध्ये द्वयं कुर्याद् बिन्दुजालं पविप्रभम् ।
चतुष्कं नाम तं वि[4]द्याद्दायं दायविशारदः ॥ ६५८ ॥

द्विकद्वयं त्रिकद्वन्द्वं चतुष्कयुगलं तथा ।
पञ्चकं(क) द्वितयं चेति समा[5] दाया(ः) प्रकीर्तिताः ॥ ६५९ ॥

द्वित्रिकौ द्विचतुष्कौ च तथा च द्वि[6]कपञ्चकौ ।
त्रिचतुष्क[7]स्तथा दायो [8]दायोऽन्यस्त्रिकपञ्चकौ(कः) ॥ ६६० ॥

चतुष्कं(ष्क) पञ्चकं चैवं दश दाया[9] प्रकीर्तिताः ।
तैः स्व(श्व)क्रीडां[10](डा) प्रकर्तव्यौ[11](व्या) दायौ(यैः)
द्यूतविशारदैः[12] ॥ ६६१ ॥
चतुरस्रं प्रकुर्वीत गोलकं [13]वर्तुलाकृति ।
तत्र बिन्दुं[14] प्रदद्याच्च[15] षट्सु[16] पार्श्वेषु बुद्धिमान् ॥ ६६२ ॥

एकद्वित्रिचतुः पञ्चषट्सङ्ख्याकाः क्रमेण हि ।
एको बिन्दु(न्दुः) पदाख्यः स्यादन्ये सन्ध्यानि(ङ्ख्याभि)धाः[17]-
स्मृताः[18] ॥ ६६३ ॥
क्षितौ विनिक्षिपेदक्षो(क्षौ) ल(च)लितौ भवतो यथा ।
गोलकौ परा(पाश)कौ चापि पक्षपाते(तं) विना नरः[19] ॥ ६६४ ॥

गमश्चर[20]श्च विवरः[21](रो विबन्धश्च) प्रतिबन्ध[22]स्तथा परः ।
गच्छन्ति [23]सारयः शीघ्रं त[24]स्माद्गम उदाहृतः[25] ॥ ६६५ ॥

इतश्चेत[26]श्च चरणाच्चर इत्यभिधीयते ।
गतिरोधाय यो बन्धः [27]स निबन्धः स्मृतो बुधैः ॥ ६६६ ॥

---

१. A. सका । २. A. जसंनि । ३. A. सा । ४. A. द्यायंदाय । ५. A. म । ६. A. द्विपंचकौ । ७. A. ष्को त । ८. A. drops this दायो । ९. A. या । १०. A. डौं । ११. A. व्यो । १२. A. दौ । १३. A. वृत्तुलाकृति । १४. A. बिंदु । १५. A. च । १६. A. ट्लु । १७. A. धा । १८. A. ता । १९. A. रा । २०. A. drops this रश्च । २१. A. र । २२. A. त । २३. A. श । २४. A. स्पा । २५. A. तं । २६. D श्चरणा । २७. D. प्रति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्यापि बाधको बन्धः प्रतिबन्धः स कथ्यते ।
एवं चतुर्विधो नाम्ना सा[1]रीखेलः[2] प्रकीर्तितः[3] ॥ ६६७ ॥

ग[4]मस्य च चरस्यापि प्रनि(ति)बन्धप्र(नि)बन्धयोः ।
भूलोकम[5]ल्लदेवेन वक्ष्यते खेलनक्रमः[6] ॥ ६६८ ॥

तत्रो[7]त्तमो गमः[8] प्रोक्तो निरपादा[9]नदायतः ।
शिरः स्थि[10]ताश्च याः सार्यस्तेचा(स्ताश्चा)ल्या गममिच्छता ॥६६९॥

अपशीर्षं नयेद्वेगात्तत्रस्था[11]नां जये(यो)द्रुतम् ।
घटयद् घटयत्सारी न[12](र्न)येद् वेगेन यत्नतः ॥ ६७० ॥

निहन्या[13]त्परसारि(री)श्च गो[14]पये नि(न्नि)जसारीका(:) ।
पञ्चमान्मन्दिरादन्तः सर्वाः सारीः[15] प्रवेशयेत् ॥ ६७१ ॥

षष्ठे वा पञ्चमे वापि गेहे सारी[16]र्न धारयेत् ।
सूक्ष्मेक्षिका न कर्तव्या गमे विजय[17]मिच्छता ॥ ६७२ ॥

द्विर्दायो नैव कर्तव्यो [18]विलम्बस्तेन जायते ।
[19]विबन्ध(लम्बि)त्वं न कर्तव्यं गमनीनाशकं यतः ॥ ६७३ ॥

स्वसा[20]री(रीं)गण[21]यन्तज्ञैर्दा(ज्ज्ञो दा)यवा[22]र्तां विचारयेत् ।
एवं गम(मे) प्रयुञ्जानः[23](ने) प्रज्ञया विजयं[24](यो)द्रुतम् ॥ ६७४ ॥

नि[25]बन्धे वा चरे वापि [26]क्रियमाणे परेण हि ।
चरं च प्रतिबन्धं च कुर्वीत गमनं[27] (ने) नरः[28] ॥ ६७५ ॥

गमखेले चरं कु[29]र्याद् बद्धशीर्षे चरे जयः ।
बद्धेऽपि केवले[30] शीर्षे न जयश्चरकारणः[31] ॥ ६७६ ॥

---

१. A. रि । २. A. ल । ३. A. ता । ४. A. मकस्य चर । ५. A. ल । ६. A. म । ७. A. त । ८. A. म । ९. A. न-यतः । १०. A. ते च ये सार्थौ ते । ११. A. स्थना तथे द्रुतम् । १२. A. न्न । १३. D. च्च । १४. D. म । १५. A. री । १६. A. न्न । १७. A. ते । १८. D. बि । १९. A. बिंबविन्वं । २०. A. रि । २१. A. यं त । २२. A. र्त्ता । २३. A. न । २४. A. ये । २५. A. बंधवो । २६. A. क्री । २७. D. कं । २८. D. रः । २९. A. यद्धिशी । ३०. A. लं । ३१. A. णाहिः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुर्थे[1](र्थं) पञ्चमे(मं) गेहे(हं) सप्तमं[2] च प्रयत्नतः ।
निबध्य यत्नत[3]स्तज्ज्ञश्च[4]रखेले जयीभवेत् ॥ ६७७ ॥

प्रसा[5]र्यं च निजा(:) सा[6]रीश्चरो यस्माद्विनश्यति ।
[7]तृतीयं पञ्चमं गेहं यदा बध्नाति खेलकः ॥ ६७८ ॥

शिरोबद्ध(न्ध)विहीनस्तु [8]नदा खण्डचरः स्मृतः ।
खण्डश्चर(रः)कनिष्ठ[9]श्च द्यूते संशयितो जयः ॥ ६७९ ॥

तस्मात्सर्वप्रयत्नेन सम्पूर्णं सारी[10](चर)माचरेत् ।
सि(शि)रस्थिते निबध्नी[11]याद्देशार्यो(द्वे सार्ये) बन्धकोविदः ॥६८०॥

अन्यास्तु यत्र तत्रस्था निजवे[12]श्मसु यत्नतः ।
पञ्च गेहानि बध्नीयाद् द्वाभ्यां द्वाभ्यां निरन्तरम् ॥ ६८१ ॥

न निःसरन्ति सा[13]र्योऽत्र सम्ब(ब)न्धो मा(धा)रणात्मकः ।
तथा बन्धो विधातव्यो त(य)था खेलप्रवृत्तये ॥ ६८२ ॥

अत्यासन्नवि(नि)[14]बन्धे तु दा[15]येनैकेन गच्छति ।
तस्मादासन(न्न)बन्धोऽयं न कर्तव्यो जयेप्सुभिः ॥ ६८३ ॥

एवं विब[16]न्धः कथितः प्रतिबन्धोऽधुनोच्यते ।
आत्मसारीषु मध्येषु(तु) कुर्वीत प्रतिबन्धनम् ॥ ६८४ ॥

निबन्धलक्षणं सर्वं योज्यमत्रापि युक्तितः ।
गमे नष्टे व(च)रं कुर्याच्च[17]रे नष्टे विबन्धनम् ॥ ६८५ ॥

विबन्धेऽपि पुनर्नष्टे ततः कुर्वीत साहसम् ।
सन्धिश्चैकद्वि[18]दायानां[19] पातसात(ति)सहिष्णुता ॥ ६८६ ॥

साहसं तत्समाख्यातं विजये वा पराजये ।
द्वाभ्यामपि स्वसारीणां रक्षणं [20]निजमन्दिरे[21] ॥ ६८७ ॥

---

१. A. नं । २. A. तः स्त । ३. A. रः । ४. A. र्यं । ५. A. रिः । ६. D. त्रित । ७. A. स्त । ८. A. ष्टश्चाद्यतशंशयतो जय । ९. A. रमाध । १०. A. जोद्वे । ११. A. स्म यत्नतः । १२. A. यत्रीसबंधो । १३. A. धंधे । १४. A. यैनैकै । १५. A. बंध । १६. A. चरे नं वंष्टो । १७. A. द्धिं । १८. A. ना । १९. A. निजमंदि जमन्दिरे । २०. D. रम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पञ्चमान्मन्दिरादन्तः सार्या(र्यो) येन प्रवेशिता(:)।
द्वैगुण्यं तेन कर्तव्यं पणस्य निपुणात्मकः[1](ना) ॥ ६८८ ॥

अथवाभ्यधिकास्वन्तःप्रविष्टासु [2]स्वमन्दिरम् ।
स्वगेहेषु [3]निबन्धे(द्धे)षु पुनस्तेषु पु(प)रेषु च ॥ ६८९ ॥

द्वैगुण्यं तत्र कर्तव्यं पूर्वोक्तस्य [4]पणस्य हि ।
मृतेषु परसारेषु प्रतिबन्धासितेषु च ॥ ६९० ॥

तत्रापि द्विगुणः कार्यः[5] पणो द्यूतविशारदैः ।
निबन्धेन(च) कृते सारे(रेः) प्रति[6]बन्धे कृते[7]ऽपि वा[8] ॥ ६९१ ॥

पूर्यते लेखन[9](खेलनं) यस्य स कुर्याद्विगुणं पणम् ।
आत्मनो बहवो दाया जय[10]दा यत्र लेखने(खेलने) ॥ ६९२ ॥

न्यूनाः परस्य तत्रापि द्विगुणं पणमाचरेत् ।
परेण[11] रभसा पूर्वं कृते तु द्विगुण(णे) पणम्(णे) ॥ ६९३ ॥

त्रिगुणस्तत्र कर्तव्यः स्वजयो दृश्यते यदि ।
स्वजये पञ्च दायाश्च[12] पञ्च दायात्प(याः प)रस्य च ॥ ६९४ ॥

समं तत्र प्रकर्तव्यं [13]द्यूतं [14]द्यूतविशारदैः ।
परेषां बहवो दाया द्विगुण(णे) त्रिगुणं[15](णे) कृते ॥ ६९५ ॥

सञ्च(संश)ये च समुत्पन्ने दद्यादेके(कं) [16]विचक्षणः[17] ।
चतुःसारिनिबन्धो(द्धो)ऽयं क्रीडायोगो निरूपितः[18] ॥ ६९६ ॥

इदानीं[19] पञ्चसारी[20]कः कथ्यते लेख[21]न(खेलन)क्रमः[22] ।
पाशकत्रितयेनात्र लेखने(खेलने) विहितो विधिः[23] ॥ ६९७ ॥

गम(मः) प्रायेण कर्तव्या(व्यो) दायानां बहुवा(ता) यतः ।
दैवान्नष्टे गमे प्राज्ञश्चरं वा [24]बन्धमाचरेत् ॥ ६९८ ॥

---

१. A. क । २. A. ख । ३. A. drops this word । ४. A. drops this word । ५. A. र्य । ६. D. बंध । ७. D. तो । ८. A. व । ९. A. तं । १०. A. drops दाय । ११. A. णभसोपूर्वं । १२. A. श्चै । १३. A. द्यु । १४. A द्यु । १५. A. णक्र । १६. A. चि । १७. A. ण । १८. A. ता । १९. A. निं । २०. A. रि । २१. A. ष्नं । २२. A. म । २३. A. धि । २४. A. बाध ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रयत्नं प्रचुरं कुर्यात्सारीर्विगणयन्बुधः ।
तात्कालिक(के) त्रिपन्न(पाश)स्य क्रियायोगोऽभिधीयते ॥ ६९९ ॥

पुञ्जके पातनं पूर्वं कर्तव्यं द्यूतकोविदैः ।
त्रिपञ्चदायने [1]पुञ्जः पक्षे(पाते पुञ्ज) पक्षे पराजयः ॥ ७०० ॥

द्विकद्वयस्य पाते तु पुञ्जपक्ष[2](क्षे) जयो भवेत् ।
तस्मान्न[3]यः प्रधा(दा)तव्य[4]: किञ्चिदभ्यधिको(के) जयः ॥ ७०१ ॥

पाटलस्याग्रपात(तः)स्या[5] प(त्प)श्च[6]वारं निरन्तरम् ।
ततः[7] पाशकपातः[8] स्या[9]त्पर्यायेणोभयोरपि ॥ ७०२ ॥

द्वित्रिस्थितेषु[10] सारेषु पूर्वपाशकपातनम् ।
कियानपि नयो देयो [11]विविधैर्मन्त्रबिन्दुकैः(वेदकैः) ॥ ७०३ ॥

गोलकक्रीडने पातौ(त्यौ) द्वौ गोलौ यदि वा त्रयः ।
गेहमेकं(क) पदे(दं) चाल्याः सप्त षट्के तु सारयः ॥ ७०४ ॥

इतरः[12] पूर्ववत्कल्पो गमो वा यदि वा चरः ।
निबन्धप्रति[13]बन्धौ वा प्रोक्तमार्गेण कोविदैः ॥ ७०५ ॥

ज्ञा[14]नार्थं खेल्यते दाशैस्तज्ञैः[15](ज्ञैः) सह महीभुजा ।
अत्यासक्तिर्न कर्तव्या तया नाशो भवेद्यतः ॥ ७०६ ॥

आहूतो न निवर्तेत [16]द्यूतादपि रणादपि ।
स्मरन्निति क्षमापालो जानीया[17]द्दक्षलेखनम्(खेलनम्) ॥ ७०७ ॥

अज्ञानाद् धर्मतनयः सर्वस्वं हारितः फलैः[18](लै) ।
व्यसनेन नलो राजा पुष्करेण जितः पुरा ॥ ७०८ ॥

अति[20]प्रश[21](स)क्त्या निहतो रुक्मी च हलधारिणा ।
अज्ञानाद्व्यसनाद्वापि को नाम न विनश्यति ॥ ७०९ ॥

---

१. A. सारान्विगुणयन्बुध । २. A. युंजपक्षे पराजय । ३. A. क्षे । ४. A. त्रय । ५. A. व्य । ६. D. स्य । ७. A. दायं । ८. A. त । ९. A. त । १०. A. पर्योसोभयोरपि । ११. A. सु । १२. A. विवद्विर्मत्रगइंदकै । १३. A. रत् । १४. A. बंधो । १५. A. तायोल्यतेपासैः । १६. A. ज्ञै । १७. A. द्यु । १८. D. ह्व । १९. A. लौः । २०. A. D. पि । २१. A. श ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्मात् ज्ञे(ज्ञे)यं प्रयत्नेन पाशानां खेलनं नृपैः ।
आसक्तिर्नैव कर्तव्या व्यसनोदयकारिणी ॥ ७१० ॥

प्रेयसीभिः समं क्रीडेद्यद्वान्यैस्तु सुखोचितैः ।
पणास्त एव कर्तव्या हसितं सविलासकम् ॥ ७११ ॥

इतीयं पाशकक्रीडा कथिता सोमभूभुजा ।

[इति पाशकक्रीडा ॥ १३ ॥]

क्रमाद्धराष्टकीक्रीडा वक्ष्यते लक्षणान्विता ॥ ७१२ ॥

आश्विनस्य चतुर्दश्यां कृष्णपक्षे दिनो(विधू)दये ।
स्नात्वा च देवमभ्यर्च्य कृत्वा च यव(म)तर्पणम् ॥ ७१३ ॥

महता तूर्यघोषेण विप्राशीरभिनन्दितः ।
अन्तःपुरपुरन्ध्रीभिः कृतनीराजनो नृपः ॥ ७१४ ॥

ततः पुत्रान् प्र(त्रांश्च)पौत्रांश्च समाहूयान्यबान्धवान् ।
मित्रैर्भृत्यैः समायुक्तः कृताहारो यथोचितम् ॥ ७१५ ॥

विसर्ज्य च ततः सर्वानाहूय द्यूतकोविदान् ।
आरभेत (त)तो द्यूतं यावदायाति पञ्चमी ॥ ७१६ ॥

उज्ज्वलाः सुसमाः श्लक्ष्णाः स्थूलनिष्पावसम्मिताः ।
अभिन्ना यत्नतः कार्या(तो ग्राह्याः)पुञ्जिकायां कपर्दकाः ॥ ७१७ ॥

एकरूपा द्य(द्यु)ना भव्या गोमयेन भृतोदरा(:) ।
शतपञ्चकसङ्ख्याताः पू(पु)ञ्जिकासूत्तमा मता (ताः) ॥ ७१८ ॥

मध्यमा पुञ्जिका ज्ञेया चतुःशतवराटिका(:) ।
कनिष्ठा त्रिशता प्रोक्ता द्यूतक्रीडाविशारदैः ॥ ७१९ ॥

---

१. A. स्मादे । २. D. लेख । ३. A. श । ४. A. नै । ५. A. मां । ६. A. षोचितै । ७. A. णः स । ८. A. व्यो । ९. A. ड । १०. A. वे । ११. A. स्यां । १२. A. तु । १३. A. सी. । १४. A. रः । १५. A. हुयाथ । १६. A. व्यभृत्ये । १७. A. दां । १८. A. में । १९. A. ज्वा । २०. A. साः । २१. A. क्ष्ण । २२. A. ता । २३. A का । २४. A. प । २५. A. प्रो । २६. A. स । २७. A. स । २८. A. मां पुं । २९. A. स । ३०. A. दै ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अत्र दायाभिधानेषु नन्दिरेखा(का) वराटिका ।
[1]जागरो द्विवराटः[2] स्यात्त्रिवराटस्त्रिगा भवेत् ॥ ७२० ॥

चतुःकपर्दि[3]को दायः पूर्ण इत्यभिधीयते ।
चत्वारः कथिता दाया[4] नामलक्षणसंयुता(:) ॥ ७२१ ॥

अङ्गु[5]लीत्रयविस्तारो तनुवृत्ता(त्तो) मनोहरा(रः) ।
नदी[6]नंद(दन्तिदन्त)विनिर्माणा(णो) नन्दिरेवंवि[7]धो भवेत् ॥७२२॥

विस्तारो ह्यङ्गुलः [8]कार्या(र्यो) दै[9]र्घ्येण चतुरङ्गु[10]ला(लः) ।
जागरो गजदन्तोत्थश्चतुरस्रो[11] वृतो भवेत् ॥ ७२३ ॥

संमता अं(समन्तादङ्·)गुला कार्या त्रिकोणा तनुरूपिणी ।
नि(त्रि) गा दत(न्त)मयी रम्या दंतालिष्टद्वशी(दन्तालिसदृशा)-
कृति(तिः) ॥ ७२४ ॥

चतुरङ्·गुलविस्तारश्चतुरस्रो मनोहरः[12] ।
तनीया[13]न् दन्तजातश्च पूर्णो [14]द(दा)यः प्रकीर्तितः[15] ॥ ७२५ ॥

प्रति(कृत्ति)जं वर्तुलं कार्यं षड्वितस्तिप्रमाणकम्
अधिकं वा प्रमाणेन कथितं गोम[16]याश्चिनम् ।
चत्वारो ले[17]ख(खेल)कास्तत्र दायस्वीकारकारिणः[18] ॥ ७२६ ॥

प्रत्येकं दायमाद्यु न(र्न)न्दादि(न्द्यादिं) पूर्ववर्णितम् ।
[19]तत्रैकार्णपातुनिर्णाम(कः पातनिर्णायो) जि[20]तद्रव्य(प्र)दायकः[21]
॥ ७२७ ॥

कर्तव्यो [22]धनयुक्तस्तु मध्यस्थो बलसंयुतः ।
गणित[23]ज्ञः सावधानो मध्यस्थो दण्डलेखकः[24] ॥ ७२८ ॥

कर्तव्यो नितरां तज्ज्ञो जयाय(प) [25]जयलेखने(नः) ।
कथितस्य समन्तात्ते चत्वारो द्यूतकारकाः ॥ ७२९ ॥

---

१. A. ज । २. A. ट । ३. D. का । ४. A. याः । ५. A लि । ६. A. नंद । ७. A. धा । ८. D. कुर्यादं । ९. A. दे । १०. A. ल । ११. A. श्रो । १२. A. र । १३. D पा । १४. A. द । १५. A. ता । १६. D. याचि । १७. A. लोख । १८. A. णा । १९. A. तंत्रैकर्ण । २०. A. जी । २१. A. काः । २२. A व । २३. A. ज्ञ । २४. A. क । २५. A. जलेखनो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुञ्जिका भिन्नतः कृत्वा कुर्वीत लेखनं(खेलनं) ततः ।
पूर्णस्व(र्णस्वी)कारकस्त्वादौ मुष्टिपूरु(र्ण)वराटिका(काः)
॥ ७३० ॥
समाहरेत्ततस्त्वन्यः कियन्तिश्च(तीश्च) कपर्दिका(काः) ।
निक्षिपेदग्रतस्तस्य तत्साकं गणयेच्च ताम्(ताः) ॥ ७३१ ॥

चतस्रश्च चतस्रश्च यावन्ति च(न्त्यस्ता) वराटिका(काः) ।
अवशिष्टा(ष्टो) भवेदा(द्दा)यः पूर्णश्चेत्स जयी भवेत् ॥ ७३२ ॥

अन्यथा यस्य यो दाय(यः) स तेन विजयी भवेत् ।
क(ग)णकस्य(के तु) विपर्यस्था(स्ते)पणं कुर्यान्निजेच्छया ॥ ७३३ ॥

गणकस्य यदा दायो[10] दृश्यते गणिता(णका)न्तरे ।
त्रिभिः कृतं पणं द्यूतं(ते) गृह्णीयादेक एव सः ॥ ७३४ ॥

योयोतं नाम तत्प्रोक्तं द्यूतविद्याविशारदैः ।
वारत्रयं स गृह्णीत नि(त्रि)दाये सममागते ॥ ७३५ ॥

दायेऽन्यस्य समायाते स [11]लभेत निजं पणम् ।
पराजिता[12](ताः)पणं [13]कुर्युःल(र्ल)ग्नमर्धादि(धि)कं तथा ॥ ७३६ ॥

पणार्धं कथ्यते भागस्तावत्कुर्युर्जयाकुलाः[14] ।
पणो येन कृतो भागो वारमेकं स [15]रक्ष्यते ॥ ७३७ ॥

गृहीतो ये(तव्यो) न भागोऽसौ तेन वान्येन केनचित् ।
तोय(ल)[16]यित्वा च(व)राद्य(ट)स्य सङ्ख्यां जानाति
बुद्धिमान् ॥ ७३८ ॥
अ[17]शीतिं स[18]प्ततिं वापि स वरो द्यूतकारकः[19] ।
स्वपु(मु)ष्टौ परदायं यो जानात्येकं(को) विचक्षणः ॥ ७३९ ॥

तेन सार्द्धं प्रकुर्वीत द्यूतमस्तिन[20](स्तीति) संविदम् ।
अपरो यदि मन्येत समयं तत्र लेखने(खेलने) ॥ ७४० ॥

---

१. A. द्य । २. D. र्णः । ३. A. स्ता । ४. A. पुरुवरीकः । D. पूरू । ५. D. मं । ६. A. नि । ७. A. क्षेपि । ८. A. च तो । ९. A. य । १०. D. यी । ११. A. चवेत । १२. D. त । १३. A. कुर्यु । १४. D. लम् । १५. A. कथ्यते । १६. A. यित्वराद्यस्य । D. इत्वा। १७. A. सी । D. शीति । १८. A. द्यतीं । १९. A. क । २०. D. drops this न ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

य(त)स्य दायेऽपि संजाते पणप्राप्तिर्न विद्यते ।
वराटा यस्य हस्ते तु गणनार्थं व्यवस्थिता(ताः) ॥ ७४१ ॥

पणप्राप्तिर्न तस्य स्यात्समये विहिये(हते) सति ।
इतरस्य यदा[1] याते दाये च यदि चेत्कृते(समये कृते) ॥ ७४२ ॥

भागद्वयं तदाप्नोति पण[2]स्यैकं परित्यजेत् ।
ये क्षिपन्ति वरा[3]टांस्तु हस्तलाघव[4]कौश[5]ला(:) ॥ ७४३ ॥

लुम्पन्ति [6]यदि वा धू[7]र्तास्ते संल[8]क्ष्याः प्रयत्नतः ।
स्वयं यदि प्रवीणस्तु हस्तलाघवकर्मणि ॥ ७४४ ॥

वञ्चयन्परदृष्टीस्तु गोपयेत्स वराटिकाः ।
गृहीते(ऽ) पोहितेऽन्येन पणः स्याद् गर्जि(णस्यार्धे जि)ते सति ॥७४५॥

परदायं प्रगृह्णीयाद्यदि वाञ्छति मानसम् ।
दन्तेन नि[9]र्मितं दान्तं तस्य सर्वं सम[10]र्पयेत् ॥ ७४६ ॥

तस्य दान्तं प्रगृण्हीत समयोऽयं दुरोदरे ।
स्वदायागमविज्ञाने पणं भूरि प्रकल्पयेत् ॥ ७४७ ॥

विपरी[11]तं(ते) पणं कुर्यादल्पमल्पं विचक्षणः ।
परेण(णेन) तु गृहीतस्य पण[12]स्यार्द्धं तथाधिकम् ॥ ७४८ ॥

लग्नं[13] नाम परिज्ञेयं तदेवाप्नोति नाडि(धि)कम् ।
अनागमे[14] तु दायानां नैरन्तर्यात्पराजयः[15] ॥ ७४९ ॥

तत्स्थानं तु परित्यज्य स्थानमन्य[16]त्समाश्रयेत् ।
शिरस्थं कुसुमं त्याज्यं ताम्बूलं च मुखस्थि[17]तम् ॥ ७५० ॥

वाससा वान्यथा वासः कर्तव्यो जयकांक्षिणः(काङ्क्षिणा)[18] ।
उत्सा[19]रयेत्स[20]मीपस्थं [21]चित्तविप्रियकारकम् ॥ ७५१ ॥

---

१. A. दातेत्समे तु पणे कृते । २. A. स्वै । ३. A. टास्क । ४. A. कैशजा । ५. D. लान् । ६. A. यद्विदिवा । ७. A. त्ता । ८. A. क्षाः । ९. A. र्मिदांतं । १०. A. र्व्यं । ११. A. त । १२. A. स्यातथा । १३. D. ग्न । १४. A. ये । १५. A. य । १६. A. स । १७. A. ता । १८. A. णाः । १९. A. रे । २०. D. मीं । २१. A. चतो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पर्यायभञ्जनार्थं च कर्म[1]द्यूते समाचरेत् ।
[2]भंजि(भङ्गि)ते परिके(र्यये) चापि न लभ्येत (य)दा जय(:) ॥७५२॥

तदा द्यूतं परित्याज्यं(ज्य)मन्येषु(द्यु)द्यूतमाचरेत् ।
अविच्छिन्नजये जाते पुष्पं माल्यं तथास[3]नम् ॥ ७५३ ॥

न त्यजेद्य(द्यू)सनं चैव [4]द्यूते विजयलम्पटः ।
वारं वारं समीक्ष्ये(क्षे)त [5]लिख्यमानं च [6]दन्तके ॥ ७५४ ॥

जितं च हारितं चैव निजं यत्नेन बुद्धिमान् ।
अन्यथा च विपर्यासं(से) सङ्ख्याको[7] दण्डधार[8]कः ॥ ७५५ ॥

[9]पाटन(व)स्यापि वित्य(वृध्य)र्थं वृ[10]द्धिं(त्तिः) कृतेयमीदृशी ।
गृहीत्वा बन्धकं पू[11]र्वं निरी[12]क्ष्य पुरुषान्त[13]रम् ॥ ७५६ ॥

जिते पराजयं कुर्याद्वा(द्धा)रिते विजयं[14](यः) क्षणात् ।
स विंशति[15]तमं भागं दद्याज्जितधनस्य च ॥ ७५७ ॥

स्वकीयं वितरेद् द्रव्यं वृद्धिलाभाय वाटनि(टिने) ।
पुंजि(पुञ्जि)कायाः प्रकारोऽयं[16] लेखने(खेलने)परिकीर्तितः ॥७५८॥

भूलोकमल्लदेवेन लोका(ला)नां ले[17]खन(खेलन)क्रमः ।

[इति पुञ्जिकाक्रीडा]

लोले वराटिका(:) पञ्च तत्रैका [18]खाडु(पाण्डु)रा भवेत् ॥ ७५९ ॥

[19]पीता परा प्र(प)रा कृष्णा लोहिते द्वे इतीरिता(:) ।
पाण्डुरा स्याद् बृह[20]न्नन्दी पीता च लघुनन्दिका ॥ ७६० ॥

कृष्णातिगेति विख्याता लो[21]हिता स्याद् वृकाभिधा ।
लोहिता लग्नखटिका चतुर्धा सो(सा) निरूप्यते ॥ ७६१ ॥

---

१. A. द्यु । २. D. drops these two lines । ३. A. मम् । ४. A. द्यु । ५. A. वीक्ष्य । ६. D. दंतिके । ७. A. कांदंडध । ८. A. drops रकः । ९. A. पानस्यापि विकर्थं । १०. A. द्धि । ११. A. र्वं । १२. A. क्ष । १३. A. र । १४. A. यक्षणाः । १५. A. मतं । १६. A. य । १७. A. खलेन । १८. A. षड़रा । १९. A. पित्तापराकला लोहिते । २०. A. न । २१. A. रो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवं वर्णानुसारेण नामभिः[1] परि[2]कीर्तिता(:)।
नि[3]घृष्य [4]पृष्ठभागं तु समा(:) कार्या(:) शिलातले ॥ ७६२ ॥

पाण्डुरा निजवर्णा [5]स्यात् पीता च नि[6]शया कृता।
कासीसेन हरीतक्या[7] कृष्णा कार्या वराटिका ॥ ७६३ ॥

लाक्षारसेन निःका(ष्का)थ्य कर्तव्ये लोहिते उभे।
अष्टाङ्गुलं लोहजातं कूर्म[8]पृष्ठसमाकृति ॥ ७६४ ॥

पातनं वा च[9] तत्प्रोक्तं पात्य ते(त्यास्ते)न वराटिका(:)।
अधोमुखं नि[10]धेयं [11](तत्) तस्येष्टेव (स्य पृष्ठे)वराटिकाः ॥ ७६५ ॥

पात्यन्ते खेलकैर्यस्मा[12]त्तस्मात्पातनमुच्यते।
चत्वारो लेख(खेल)का[13]स्तत्र लो[14]लिकायां भवन्ति हि ॥ ७६६ ॥

सव्यक्रमेण ते सर्वे पातयन्ति वराटिकाः[15]।
त्रयस्तस्मात्प्रगृण्हन्तं(न्ति) लो(लौ)हं पूर्वे[16] प्रकल्पितम् ॥ ७६७ ॥

पराज[17]य[18]च्छा(च्छो)हना[19]मा लोलिकायां[20] निरूपिता (तः)।
त्रयस्तस्मात्प्रगृण्हन्ति लौलं(हं) छा[21](छो)ह समन्वितम् ॥ ७६८ ॥

द्वैगुण्येन विनिर्दिष्टं नाम पी[22]ठेति लौकि[23](लि)के।
लोल[24]स्य(स्यो) परिपा[25]श्वेंति(तु) तिर्यग् रेखां[26] लिखे[27]त्ततः ॥ ७६९ ॥

पातुकस्य यदा याति भा[28]गहेतुर्वराटिका(:)।
वारत्रयं तु नान्यस्य तदा पातान्निवर्तते ॥ ७७० ॥

पातुकेना[29]कृते पैठे परे (रैः) पैठे च कल्प(ल्पि)ते।
स्वसै(स्यै)कदा यदा याति मध्ये चान्येन(न्यस्य) कस्यचित् ॥७७१॥

---

१. A. भि। २. A. लक्षिता। ३. A. घेष्य। ४. A. प्रष्टनागं। ५. A. स्या पिता। ६. A. शि। ७. A. क्यां। ८. प्रष्ट। ९. A. त्। १०. A. धंयं। ११. A. ततस्प। १२. A. स्पात। १३. A. त। १४. A. लोकायां। १५. A. का। १६. A. वें। १७. D. स्थान। १८. A. मा च लो। १९. D. या। २०. D. ढा। २१. A. ट। २२. AD. कि। २३. A. स्य न परि। २४. D. थे। २५. A. षां। २६. A. त। २७. A. गंहेतुवि। २८. A. क्षते पैटै परै पैठै। D. पैटे परे पैटे।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुनस्तस्य जितस्यापि छोहे जाते न पातयेत् ।
स्वस्य वा यस्य कस्यापि द्विच्छा(च्छो)हे नैव पातने(नम्)
॥ ७७२ ॥

छोहे जाते यदा सौ(शौ)र्यात्पेटां(पैठां) कुर्यात्परैः सह ।
पेटेति सा च(शूरपैठेति) विज्ञेया लोलके [1]द्यूतकारकैः ॥ ७७३ ॥

सू(शू)रपै[2]टा(पैठा) कृ[3]ता येन छोहे तस्य समाग[4]लम् (गते) ।
अन्तरा यदि चा[5]न्यस्य समायाति वराटिका ॥ ७७४ ॥

द्विच्छो(च्छो)हे च तथाऽन्येषां पातनाद्विरतिर्भवेत् ।
आत्मनस्तु त्रिभिः छोहे(श्छोहैः) सू(शू)रपैठे न पातनम् ॥ ७७५ ॥

पैठे कृते जये जाते चेटिकाग्रे(चे)ति भाषिते (ता) ।
तेन पैठतया (पैठेन सा) लभ्या नान्यथा प्राप्यते तु सा ॥ ७७६ ॥

उनाका(को)नन्तरो लेट्टो (लोलो) नयोन(नयौ तौ स) मुदाहृतौ ।
द्रव्या[6]हरणलोभेन दातव्यौ [7]धनिकस्य तौ ॥ ७७७ ॥

आदिपाते यदायाति छोहो यस्य तदापि च ।
न त(द)दाति पणं क्रूरं परेभ्य उणु[8]के नये ॥ ७७८ ॥

निजा वराटिका याति द्विस्त्रिर्वा च निरन्तरम् ।
तदा पराजयो न स्याद्यावन्नायाति [9]मध्यमा ॥ ७७९ ॥

छोहे परस्य सञ्जाते पश्चादायाति वै निजा ।
वराटिका तदा तस्य विहितस्तु पराजयः[10] ॥ ७८० ॥

एवंविधा व्यवस्था [11]स्याद्यस्मिन् [12]सोनंतसन्नयः (न्यः स्मृतो नयः)।
तनयं याचते द्यूतं[13](ते)धन[14]कं लुब्धमानसा (स):॥ ७८१ ॥

इतीयं लौकिक(लोलिका)क्रीडा जयपातयुते[15]रिता ।
अस्या एव प्रकारोऽन्यः कथ्यते (आ)न्धिकाभिधः ॥ ७८२ ॥

---

१. A. ये । २. A. द्यु । ३. A. यै । ४. A. क । ५. A. तले । ६. A. षा । ७. A. व्य । ८. A. व । ९. A. ण । १०. A. भव्यमा । ११. A. य । १२. A. स्वा । १३. A. स नं तनयः । १४. A. त । १५. A. नं कं । १६. A. तै ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुर्णामेक[1]सङ्ख्याकष्टोलेत्र नियमो नहि।
यथारुचि प्रकर्तव्य(व्या)ष्टोलो(ल आन्)ध्यां द्यूतकोविदः (दाः)
॥ ७८३ ॥

भो(भा)गहारे तु नियमो (मः खेलेषु) नियमो नहि।
यथारुचि प्रकृप्तेऽपि यथाभाग(गः) समे(मो) भवेत् ॥ ७८४ ॥

अयं तु नियमो यत्र चतुर्भिर्विहिते पणे (तः पणः)।
यथा चतुर्भिर्भागः स्याद्विधेयस्तु तदा(था) पणः ॥ ७८५ ॥

विंशतिद्वा(र्द्वा)दशान्यस्य द्वात्रिंशदपरस्य च।
द्वासप्तति तथान्यस्य मिलिता ग(प)णसन्ततिः ॥ ७८६ ॥

चतुर्भिर्विहितो भागो[2] भागहारे यथा भवेत्।
तथाविधा (धः) प्रकर्तव्या (व्य) ष्टोलो द्यूते यथारुचि ॥ ७८७ ॥

वराटिकानां सङ्ख्या च वर्णाश्चैव यथा पुरा।
लोहजं पातनं चापि यथा लोहे (ले) निरूपितम् ॥ ७८८ ॥

छो[3]हद्वयं प(य)दैकस्य पाल्य(त)हाने (नं) वराटके।
स्वस्य वा यदि वान्यस्य तदा पाताद्नि[4]वर्तनम् ॥ ७८९ ॥

नैरन्तर्येण वा छेहो (छोहौ) स्यातां वा सान्तरैर्य(रौ य)दि।
धनि[5](नं)जेता प्रगृह्णाति न(ना)दत्ते विजिताधिकम् ॥ ७९० ॥

पुरा[6]ध्यात्स(रान्ध्रदेश)जातत्वाद[7]न्ध्रि(दान्ध्रि)नाम्ना निरूपिता।
द्विच्छोहि(च्छोहे) पातविरते द्विछौ[8]हे (द्विच्छोहे) त्यभिधीयते ॥ ७९१ ॥

[9]अन्ध्रि (आन्ध्र) द्यूतक्रमेणैव पणो यत्रा[10]भिधीयते।
रौ(लो)लर(ले च)त्यार(ग)विरतिं द्यू(तिर्द्यू)तकारैः प्रकथय[11]ते
॥ ७९२ ॥

सप्तलेखाभिधा ह्येषा क्रीडा कृप्ता[12] दुरोदरे।
[13]बृहत्पणसमायोगाद् बहुद्रव्याप[14]हारिणी ॥ ७९३ ॥

---

१. A. कमसंख्या। २. A. ग। ३. A. छाहद्वयं यपदैक। ४. A. निवर्तन। ५. A. न। ६. A. रांध्रदेत्स। ७. A. दं। ८. A. छो। ९. A. अधियूत। १०. A. त्र। ११. A. ल्प्य। १२. A. प्रा। १३. A. पतिगृत्स्व बृहवणसमायोगात् D. प्रतिगृह्य बृहत्पण। १४. A. प्रहा।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रोले(लोल) अन्धाः(आन्धे) सप्त लेखे(खेले) द्यूतकारैर्वराटिका(:) ।
प्रतिगृह्य निजां(जा)दत्त्वा परा वा मध्यतः स्थिता(:) ॥ ७९४ ॥

एवं वराटिकाक्रीडा कथिता सोमभूभुजा ।

[इति वराटिकाक्रीडा ॥ १४ ॥]

इदानीं कथ्यते क्रीडा फणिदास्या(ख्या)सकौतुका ॥ ७९५ ॥

कदाचित्कृतकार्योऽसौ भुक्तोत्तरमनाकुलः ।
सायाह्ने कृतशृङ्गारः प्रेयसीपरिवारितः ॥ ७९६ ॥

प्रसादविकरै(चित्तकै)रन्यैर्गीतवाद्यविशारदैः ।
प्रहेली(मान(तु)कुशलैः सेवाभिज्ञैश्च सेवकैः ॥ ७९७ ॥

कति(वि)भिश्चैव विद्वद्भिः भ(म)ल्ल(ल्ल)रङ्गै(ङ्कै)श्च वन्दिभिः ।
द्यूतज्ञैः फणिदाभिश्च संवृतो नृपतिर्मुदा ॥ ७९८ ॥

दृढ(ढं)मुष्टिवलं शिक्षां (क्षा)प्रयोगं हस्तलाघवम् ।
मे(मि)षेण दर्शयेत्कु(यन्कु)र्यात्फणिदाख्यं तु लेखनम्(खेलनम्)
॥ ७९९ ॥

कौशलं कितवादीनां तज्ज्ञानं(नां) हस्तलाघवम् ।

मुदर्थमात्मनश्चापि क्रीडामेतां समाचरेत् ॥ ८०० ॥

यथार्थ(शोऽर्थ)बन्दिवृन्दानां योषितां प्रेमवृद्धये ।
अङ्गानां शश्ववदग्रे (देवध्वै) मल्लानां बलपुष्टये ॥ ८०१ ॥

फणिदा बहवोऽत्र स्युस्तथेक्षु(स्युरिक्षुजा) नारिकेलजा (:) ।
नारंग(रङ्ग)त्रपुसोद्भूता त(स्त)था गुणसमुद्भवा (:) ॥ ८०२ ॥

---

१. A. ठि । २. A. उदाती । ३. A. णिंद्रा । ४. A. त्तक्रु । ५. A. र्या । ६. A. भू । ७. A. ला । ८. A. drops this सा । ९. A. र । १०. A. व्य । ११. D. प्रा । १२. A. कितवितकैरन्वै । १३. A. ला । १४. A. स । १५. D. कतिभिश्चैव धूर्तैश्च । १६. A. ज्ञै । १७. D. ता । १८. D. तिं मु । १९. A. बलः D. चलं । २०. A. नंकु । २१. A. ग्यै । २२. A. प्रष्ट । २३, A, स्युः परीक्षा । २४. A. भू ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इक्षुजा बहुधा प्रोक्ता दिग्मात्रं तत्र दर्श्यते ।
आदौ तावन्निबध्नी[1]यात्संस्थानादिक्षुकाण्डकम् (कान्) ॥ ८०३ ॥

विंशत्या त्रिं[2]शता वापि स्याश्च(च)त्वारिंशताऽपि वा ।
पञ्चाशतापि वा काण्डे(ण्डैः) क्रीडनेऽसौ वरण्डकः ॥ ८०४ ॥

असिना वासिधेन्वा वा[3] तत्कुर्याद्वाव(द्विधा कुर्याद्व)रण्डकम् ।
एकेनैव प्रहारेण स्वबलं दर्शयेन्नृ[4]पः ॥ ८०५ ॥

एकावशेषं सर्वांस्तानिक्षुकाण्डान् वरा(र)ण्डके ।
कृत्वा पणान् नृप[5]श्चिद्या(श्छिन्द्या)द् दर्शयन्ह[6]स्तलाघवम् ॥ ८०६ ॥

क्षुरिकां धारया[7]धृत्वा धर(रा)यां धरणीधरः ।
निमेषं निश्चलं धृत्वा पाटयेदिक्षुकाण्डकम् ॥ ८०७ ॥

एक(व)मेवे(के)क्षुकाण्डस्थं (स्य) पाटयन्श(ञ्श)कलं द्विधा ।
ऋकचे[8]नैव निर्भि[9]न्नं दर्शये[10]त्पाणिपाटवम् ॥ ८०८ ॥

वामहस्तेन विन्यस्य धा(ध)रायां छुरिकामुखम् ।
दक्षिणेनेक्षुकाण्डं च धृत्वा शक्त्या प्रताड[11]येत् ॥ ८०९ ॥

खण्डितान्यथ खण्डानि गच्छन्ति धनुषां शतम् ।
विधृत्य मुष्टिनाग्राणि[12] तीक्ष्णधारेम[13]वा(राणि क्ष्मा)पति(:)
॥ ८१० ॥

फे(क)लयेद्बलयं[14] यावत्स्वमुखे पुच्छव[15]त् स्थितौ ।
आ(अ)लग्नौ वल्कलेनाऽपि यथामिलितावपि(तौ यथामीलि-
ताविव) ॥ ८११ ॥

करकौशलमित्येवं सर्वेषां दर्शयेन्नृ[16]पः ।
नारिकेलफलक्रीडाना(डामा)विष्कुर्यात्तु धन्व(न्वि)नम् ॥ ८१२ ॥

---

१. D. बंधी । २. D. त्रि । ३. A. व कुर्या । ४. A. नृप । ५. D. पोदिव्यान् । ६. A. न्कर । ७. A. यां धरणीधरा । ८. A. चे चनैव । ९. A. भि । १०. D. यन्पा । ११. A. द । १२. A. स्थि । १३. A. मनावापति । १४. A. यावस्वं । १५. A. व्यवस्थितौ । १६. A. नृप ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अभिन्ननागरंग(रङ्ग)स्य पेश्ये(पेशी)मध्ये व्यवस्थिता (ताः)।
कतिभि ज्ञायतां (विज्ञायतां) रामा दिवाकरधयाम्यहम्-
(द्विधैता विदधाम्यहम्) ॥ ८१३ ॥
कृत्वेति संविदं चारुरो(लो)चनाभिः[1] समं नृपः[2]।
गुडच[3]क्कलिकाः श्लक्ष्णा[4]श्चतुरस्रा(स्रा)यता [5]घनाः ॥ ८१४ ॥
उपर्युपरि विन्यस्य पित्रा (द्वित्रा) वा परवा (पञ्चषा) अपि।
असिधेन्वा द्विधा कुर्वन्(र्या) अस्थावस्य(दास्थानस्थः)पृथक् पुनः
॥ ८१५ ॥
[कलाकौशलमित्येवं दर्शयेत् प्रियवादिनी(गिति) ॥
एवमादिभिरन्याभिर्निर्मिताभिः स्वबुद्धितः ॥
खेलयेत् फणिदाक्रीडा(डां) चित्तनेत्रप्रमोदिनी(म्) ॥
इत्येषा कथिता क्रीडा फणिदक्षा (दाख्या) मनोहरा ॥]
[इति फणिदाक्रीडा ॥ १५ ॥]
भूलोकमल्लदेवेन कथ्यते [6]फा(फ)ञ्जिकाभिधा।
तरुणी (ण्यो) रूपसम्पन्ना (:) प्रेमभावसमन्विता (:) ॥ ८१६ ॥
विलासविभ्रमै[7]र्युक्ता (:) परिहासरसप्रिया (:)।
आहूय चतुराः कान्ताः फञ्जीक्रीडाविशारदाः[8] ॥ ८१७ ॥
ताभिः सह महीपालः फ[9]ञ्जिक्रीडां समाचरेत्।
[10]खेलकाः पञ्च सप्तापि षडष्टौ[11] नव षोडश ॥ ८१८ ॥
नियोज्याः फञ्जिकायां तु स्त्रियो यद्वापि मानवाः[12]।
स्त्रियो योज्या विशेषेण न योज्या (:) केवला नराः[13] ॥ ८१९ ॥
कृष्णेनेयं कृता क्रीडा गोपीचित्तप्रमोदिता (नी)।
तस्मादत्र स्त्रियो मुख्यास्ताभिः क्रीडेत्समं नृपः ॥ ८२० ॥
तासां चाटून् बहून् [14]दृष्टं (द्रष्टुं) शृङ्गाररसगर्भिताः[15](तान्)।
ई[16]र्ष्यया वीक्ष्य(क्ष)ते कासामन्यत्स्या[17]त्प(वन्यस्याः प)क्षपातनम्
॥ ८२१ ॥
पक्षपातेन या (का) नारी प्रेम्णा वीक्ष्ये(क्षे)त निर्भरम्।
मत्पक्षपातिनी का वा ममैव जयमिच्छति ॥ ८२२ ॥

---

१. A. मि। २. A. प। ३. A. व। ४. A. क्ष्णश्चडरश्रायता। ५. D. ध। ६. A. फणिका। ७. A. में। ८. A. दाम्। ९. A. फंक्रीडां। १०. A. लेखकाः। ११. A. ष्टोडशा। १२. A. वा। १३. A. रा। १४. A. नृष्टुं। १५. A. ता। १६. A. र्ष्या। १७. A. स्याप।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मां वा विजित्य का कान्ता परिहासं चिकीर्षति ।
अन्य[1]नारी करस्पर्शात् सेष्ट(र्ष्या) का मं(मां)निरीक्षते ॥ ८२३ ॥
[2]मरक(मत्कर)स्पर्शना का (त् का) वा रोमांचाचि(माञ्चाञ्चि)तविग्रहा।
काचिदुत्कण्ठिता नारी फञ्जिकायां च (कां याच) ते प्रिया ॥ ८२४ ॥
प्रतिकूला तथा काचित् फञ्जिपाते भवेन्मम ।
इत्यादि विविधा भा (न्भा) वा दृष्ट(न्द्रष्टु)कामं[3](मः) क्षितीश्वरः ॥ ८२५ ॥
फञ्जिकालेखने (खेलनं) कुर्यात्सायङ्कालं (ले) निशासु तम् (च)।
अष्टादशाङ्गुलं कार्यं चतुरस्रं तु मण्डलम् ॥ ८२६ ॥
तादृशानि चतुर्दिक्षु भस्त्र(द्र)काणि प्रकल्पयेत् ।
अङ्गुलीत्रयमध्ये तु रेखा कार्या समन्ततः ॥ ८२७ ॥
ततस्त्व(स्त्य)ङ्गुलविस्तार(राः)का(को)णाः सर्वे भवन्ति च ।
अर्धचन्द्रसमाकारं गेहं फञ्जिविशारदः[4] ॥ ८२८ ॥
प्रासादं पङ्कजं वापि (पी)खण्ड(ण्डं) वाहं सपक्षिणम् ।
चतुर्भ[5]द्राणि (द्रेषु) संलेख्य द्विर्द्येवं च मनोहरम् ॥ ८२९ ॥
एवं मण्डलविन्यासः[6] कथितः[7] फञ्चिका(ञ्जिको)विदैः ।
कप[8]र्दिकानां वक्ष्यामि लक्षणं वर्णनामतः[9] ॥ ८३० ॥
पीता (:) सी(सि)तास्तथा कृष्णा लोहिताः[10] पाटला [11]अपि ।
क[12]र्बुरा मा(भा)सुराश्चैव पिशाङ्गाः पाण्डुरोदराः[13] ॥ ८३१ ॥
सारङ्गव्याघ्रवर्णाश्च तथा कुङ्कुमरो[14]हिताः ।
एणरासभवर्णाश्च तथा नागोदरा अपि ॥ ८३२ ॥
सर्पिः[15]क्षीरसमाभासा भल्लातकफलैः समाः[16] ।
सितश्यामा(श्याम)लराजा(जी)भिर्युताः सौ[17](सौ)ल्लसंज्ञितम् (ताः) ॥ ८३३ ॥

---

१. D. न्या । २. A. drops this and the following line । ३. A. म । ४. A. द । ५. A. श्चतुर्भ द्रिणांविलिखे घर्वं च मनोहरा । ६. A. स । ७. A. तो । ८. A. दर्पि । ९. A. ता । १०. A. ता । ११. A. क्ष । १२. D. बूं A. बुरासराश्चैव ५ शगा । १३. A. रा । १४. A. drops this रो । १५. A. र्पि । १६. A. मा । १७. A. सो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नकुलद्युतयः (काश्चित्)काश्चिद्गोमायु[1]श्च सम(स)प्रभाः ।
कलाय[2]बीजसङ्काशास्तथा तण्डुलसन्निभाः ॥ ८३४ ॥

अनेकश[3]ङ्खजातीया नाम(ना)रूपा मनोहराः ।
पञ्च पञ्च प्रकर्तव्या[4] (:) समाकारा (:) सवर्णका (:) ॥ ८३५ ॥

धामनाम समाख्यातं पञ्चकं मिलितं [5]ततः ।
सप्तकं सप्तसङ्ख्याकाः समाः स्थू[6]ला वराटकाः[7] ॥ ८३६ ॥

एकैकं धाम सङ्ग्राह्यं लेखकै(खेलकैः)स्तु यथारुचि ।
[8]दान(धाम)कानि बहिर्भद्रे सर्वाण्यपि निवेशयेत् ॥ ८३७ ॥

ते ख्याताः सप्त रेखा(खेला)र्थं समाः[9] स्थूला वराटकाः[10] ।
[11]पञ्चि(फञ्जि)कासङ्ख्यया दाया पात्या [12]सन्धा क्रमेण तु
॥ ८३८ ॥

अधोमुखा यदा सर्वे स दायः सप्तकः स्मृतः ।
गोमू[13]त्राकारचारिण्या [14]रेखया लिख्यते हि सा (सः) ॥ ८३९ ॥

त्रयः (एकः) स्यातां[15](त्तु) समुत्तानौ (नो) वराटौ (टः) [16]षडधो-
मुखोः[17](खाः) ।
[18]स षट्कनामा दायः स्यादक्षु(क्ष)रेखात्र लिख्यते ॥ ८४० ॥

द्वावुत्तानौ प्रद(दृ)श्येते पञ्च यत्र महीमुखा (खाः) ।
सा फञ्जिका समाख्याता गण्यते[19] रेखया विना ॥ ८४१ ॥

उत्तानास्तु त्रयो यत्र चत्वारः स्युरधोमुखाः[20] ।
दायश्चतुश्च[21](ष्क) संख्याका (को) लिख्यते [22]द(वृ)त्तरूपया ॥ ८४२ ॥

उन्मुखा यत्र चत्वारस्त्रयश्चा[23]वाङ्मुखस्थिताः[24] ।
स दायस्त्रिकसंज्ञश्च लेख्यो हं[25]सपदा[26]कृति (तिः) ॥ ८४३ ॥

---

१. A. युसमप्रभाः । २. D. प । ३. A. संख । ४. A. व्यासवर्णकारा सवेका । ५. A. तम् । ६. A. स्थ । ७. A. का । ८. A. वा । ९. A. मास्थूलो । १०. A. का । ११. A. पंजि । १२. D. सन्ध्या । १३. A. मूकार D. मुत्राचार । १४. A. रेरवाया D. लेखया । १५. A. ता । १६. A. ख । १७. A. षा । १८. D. ख । १९. A. ते ख्या । २०. A. ख । २१. A. ख्य । २२. A. देत । २३. A. श्च । २४. A. ता । २५. A. च । २६. A. क ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उत्ताना यत्र पञ्च स्युर्द्वौ(द्वौ)स्यातां भूमिसम्मुखौ ।
द्विकाभिधानो[1] दायोऽसौ लेख्योऽसावङ्कुशाकृतिः[2] ॥ ८४४ ॥

षट्चे[3]र्ध(ट् चोर्ध्व)वदना यत्र स्यादेकश्च धरामुखः[4] ।
स दाय लेखको (श्चैकको) नाम [5]लिख्यते विन्दुसन्निभः ॥ ८४५ ॥
सप्त त्र[6]योऽर्ध(यत्रोर्ध्व)वदना [7]दृश्यते (न्ते) भूतले स्थिता (:) ।
कलसप्तकसंज्ञं च सप्तकद्विगुणं लिखेत् ॥ ८४६ ॥

यावत्य (तीः) [8]फञ्जिका भूमौ पातयित्वा निवर्तते ।
दाया[9]येवंतयेवाच (स्तावन्त एवात्र) पातयि[10]त्वा निवर्तते
॥ ८४७ ॥

फञ्जिकाव्यतिरेकेण पूर्वदायः[11] प्रदृश्यते ।
वराटकास्थिति(ते)र्गेहं(ह)गणनायामयं विधिः ॥ ८४८ ॥

एकैकस्मिन्प्रविष्टे तु [12]लेख(खेल)कानां वराटके ।
ततो निवर्तनं कार्यं मृत्युगेहात्परस्परम् ॥ ८४९ ॥

पश्चाद्वराटिका यत्र दायैरागत्य तत्पदम् ।
[13]स्वकरे (स्वीकुर्यात्) तु यदा पू[14]र्वा(र्वं) न च तस्मान्निवर्तध्यते
(वर्त्यते) ॥ ८५० ॥

निवर्तिता पुनर्गच्छेद्बहिर्भद्रं वराटिका ।
पुन[15]र्दायः (यैः) समायात (ति) भवनानि क्रमेण सा ॥ ८५१ ॥

फञ्जिकायां स्थितायां[16](या) च शरणागारगा च या ।
न कदाचिद्भवेत्तस्या दाया(य)पाते निवर्तनम् ॥ ८५२ ॥

फञ्जिसङ्ख्याविही[17]न(नै)स्तु दायैर्वा(र्द्वा)दश फञ्जिका (काः) ।
स(य)दा यान्ति (ति) तदा सर्वा(र्वे) भवेयुर्निष्फलागमाः ॥८५३॥

एका देवा (दैवाद्) यदा सि(शि)ष्टा लेख(खेल)नाय [18]वराटिका ।
प्रवेशा[19](शो)धिकफञ्जीनां[20] दाचा[21]स्या(ये चा)पगमो वृथा ॥८५४॥

---

१. A. ने । २. A. ती । ३. A. श्चैर्वेदना । ४. A. ख । ५. A. लेख्यते विंदुसनिभः । ६. A. त्रयोऽर्ध्व D. त्रयोर्ध । ७. A. द्र । ८. A. फंलिका । ९. A. या तायेवं तयेचाच । १०. A. इत्या । ११. A य । १२. A. लेखना वराटकै । १३. A. स्वि । १४. A. दुर्वा न व स्मात्वध्यते । १५. A. नदाय समायाता । १६. A यंध्र । १७. A. ने । १८. A. वारा । १९. A. शी । २०. A. नी । २१. A. या ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दलदे(तल गे)हगता दृष्टे कलसप्त्र(प्ते) वराटिका ।
परिहृ[1]त्य पुनर्गच्छे[2]च्चि(न्म)तार्धगृहिणी तु सा ॥ ८५५ ॥
पुरस्तादपि यद्दृष्टि[3]मागतं तलट[4]ल्लकम् ।
फञ्जीं विना तु तत्स्थाप्यं प्रवेशाय प्रलोच[5]नः (भनम्) ॥ ८५६ ॥
क्रमेणानेन सर्वास्ताः सर्वेषां च वराटिका (:) ।
प्रविश्य फञ्जिकापात्रै नि(र्नि)र्गच्छन्ति तु पञ्चभिः ॥ ८५७ ॥
अन्यै[6](आद्यै)का[7] फञ्जिका देया हेरम्बाय जयार्थिभिः ।
स्त्रीषु (तासु) जयं(यो) निर्गतासु स्थिरासु च पराजयः ॥ ८५८ ॥
पराजितं लिखेद्भू[8]मौ दैन्यभावमुपागतम् ।
अस्पृश्यं मलिनं हीनं विलिखेद्विकृ[9]ताकृतिः (तिम्) ॥ ८५९ ॥
किं वा पृष्ठं समारुह्य वाहवच्चालयेच्च[10] तम् ।
पिधाय तेवात(वाससा)नेत्रे प्रापयेद्विहितं स्थलम् ॥ ८६० ॥
करतालप्रदानै[11]र्वा नाना(म)गानपुरःसरम् ।
वारंवारं समुच्चार्य नयेयुस्तं विलक्षणम् ॥ ८६१ ॥
एवमादिभिरन्याभिर्हास्यकारण[12]स(भ)ङ्गिभिः[13] ।
पराजितस्य कुर्वी[14]रन् सर्वे चारित्रया तु सा (पातनम्) ॥ ८६२ ॥
इत्येवं फञ्जिकाक्रीडा सोमेश्वरमहीभुजा ।
कीर्तिता कथ्यते क्रीडा साम्प्रतं तिमिरोद्भवा ॥ ८६३ ॥

[इति फञ्जिकाक्रीडा ॥ १६ ॥]

रागार्थं परिहासा[15]र्थं लज्जार्थं मुग्धयोषिताम् ।
कुर्वीत तिमिरक्री[16]डां प्रेयसीभिर्दि[17]वा नृपः ॥ ८६४ ॥
भूगृहे [18]नादघोषे वा [19]भ्रमित्वा गर्भवेश्म[20]नि ।
निरुध्य[21] तानि रन्ध्रा[22]णि गवाक्षानपि यत्नतः ॥ ८६५ ॥

---

१. D. द । २. A. च्छेतार्धगृहिणी । ३. A. ष्ट । ४. A. कूटकम् । ५. A. भयंत् । ६. D. drops this line । ७. A न्ये । ८. A. यायिभिः । ९. A भू । १०. A. क्रताकृति । ११. A. चा । १२. A. वर्दिलनामपुरःसरम् । १३. A. drops this ण । १४. A. भि । १५. A. तत्सर्वे वा । १६. A. रा । १७. A. डा । १८. A. र्द । १९. A. णाद्यगेहे । २०. A. भूमत्पा । २१. A. स्म । २२. A. व्ये । २३. A. न्धा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पिधाय द्वारदेशांश्च बहिः[1] काण्डपटैर्गतैः[2] ।
समन्ताच्च[3] समा[4]वेष्ट्य सूर्यरश्मी[5]न्निवारयेत् ॥ ८६६ ॥

तथाविधं तमः[6] कुर्याद्य[7]त्र किञ्चिन्न लक्ष्य[8]ते ।
अर्चितायां यथामानकामो[9]पायं यथारुचि ॥ ८६७ ॥

मन्त्रिभिर्भि(न्त्रैरभि)न्न[10] सन्धानै[11]र्यथा कार्यं न [12]दृश्यते ।
बहुधा[13] चा(वायु)मये[14](यै) रोगैरपथ्यं[15] भिषजा यदा(था)॥ ८६८॥

धानुष्केण यथालक्ष्यं चा[16]पे प्राणाधिके सति ।
संसारगेहे सर्वै[17]स्तु यथा काल(लः) पुरः[18]स्थितः ॥ ८६९ ॥

कातरेण यथावच्च रि[19]पुम(र)ग्रे व्यवस्थितम्(तः) ।
[20]भा(रा)भिर्यथा मनुष्ये[21]ण युक्तत्वं न च देवने[22] ॥ ८७० ॥

कोकिलापिच्छसङ्काशं[23] तमालदलस[24]न्निभम् ।
नवाम्बुज(द)समच्छायमि[25]न्द्रनीलशिखोपमम् ॥ ८७१ ॥

पद्मिनी[26]कोशसङ्काशं [27]दन्तिवानर(राह)सोदरम् ।
रोलम्बनिकुरं[28]बा(रम्बा)भं हरकच्छा[29](ण्ठ)समप्रभम् ॥ ८७२ ॥

बलभद्रानुजाभा[30]सं कालिन्दीसलिलद्युति[31]म् ।
निरभ्राकाश[32]नीकाशं पावकोच्छिष्टसप्रभम् ॥ ८७३ ॥

चन्द्रहीननिशाकान्तं कस्तूरीकाकमेचकम् ।
[33]एण[34]पृष्टसमा[35]घा(घो)तं कुसुमायुधसन्निभम् ॥ ८७४ ॥

[36]एवंविधे [37]सन्तमसि धूपिते गर्भसद्मनि ।
अपसार्य ततः सर्वं पदस्खलनका[38]रणम् ॥ ८७५ ॥

---

१. A. हि । २. A. तो । ३. A. च । ४. A. मां । ५. A. स्मि । ६. A. म । ७. A. छत्र । ८. A. क्ष । ९. A. मेपापं । १०. A. न । ११. A. य । १२. A. ह्रस्व । १३. A. वाफ । १४. D. यै । १५. A. ध्यं । १६. A. वा । १७. A. र्वे । १८. A. रस्थितं । १९. A. मद्यग्रे । २०. A. तां । २१. A. क्षे । २२. A. ते । २३. A. सं । २४. A. संनि । २५. A. स्मिद्रनि । २६. A. ती । २७. A. दंठिवानसोदरम् । २८. A. रंबा D. रंभा । २९. A. छा । ३०. A. भ । ३१. A. ति । ३२. A. शं and drops नीकाशं । ३३. A. प्र । ३४. A. प्र । ३५. A. म । ३६. A. ये । ३७. D. च त । ३८. A. बा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामाः श्यामा इव [1]निजा आहूय च महीपतिः[2] ।
प्रारभे[3]त ततः क्रीडां व्रीडा (डां) तासां निवारयेत् ॥ ८७६ ॥

नवाष्टवर्षदेशीयान् दक्षान् क्रीडाविशारदान् ।
अलक्षितान्प्रवेश्या(श्या)न्तर्बालान्नर्मविचक्षणान् ॥ ८७७ ॥

निगु[4]ह्य पादसञ्चारं गत्वा बालाः शनैः शनैः ।
कासांचिदंशुका[5]क्षेपं कासांचित्कर्णधारणम् ॥ ८७८ ॥

कासांचित्कुन्तलाकर्ष[6] कासांचिन्मूर्ध[7]ताडनम् ।
कासांचित्कबरी[8]कर्ष कासांचित्पृष्ठ[9]ताडनम् ॥ ८७९ ॥

कासांचिदङ्गकण्डूयां[10] कासांचिदपि तर्जनम् ।
कासांचिच्चरणाकर्ष कासांचित्कुचपीडनम् ॥ ८८० ॥

कासांचिद्विनिवि(द्धवि)श्वा[11] सं विकृतै[12]रस्फुटाक्षरैः[13] ।
[14]चतुरं (कुरुध्वं) गतदाक्षिण्यं इति(ण्यमिति) तान् विनियोजयेत् ॥ ८८१ ॥

ते च राज्ञा समादिष्टास्तासां भूत्वा समीपतः ।
[15]ताश्च (ते च) कुर्युश्चमत्कारं यथा भूपेन शिक्षिताः[16] ॥ ८८२ ॥

वेष्टिता योषिता (ताः) काश्चित्कु[17]र्वन्ति कुंकु(कुर)रध्वनिम् ।
वारेन (ण) ताडिताः काश्चित्ताडयन्ति समीपगाः ॥ ८८३ ॥

अनिरूपितनाम्ना सा [18]निर्भर्त्सयति ताडिता ।
सर्वाक्षेपकरीगाली[19](:) श्रुत्वा काचित्प्रकुप्य[20]ति ॥ ८८४ ॥

येन(यया) त्वं ताडिता दृते तस्य (स्यै) गाली[21] (लिः) प्रदीयताम् ।
त्वमेव म [22](मे) स्थिता पार्श्वे का त्वन्या ताडयेत्तु माम् ॥ ८८५ ॥

---

१. A. स्यामा । २. A. ति । ३. A. भेततः । ४. D. गृ । ५. A. drops काक्षेपं । ६. D. ध्रिं । ७. A. रिकृष्य D. रीं कृष्य । ८. A. ष्ट तनां । ९. D. कं । १०. A. स्वा । ११. D. विं । १२. A. रौं । १३. A. तुरु ङ्कं । १४. A. ताकुर्याच्च स । १५. A. ता । १६. A. कुरुरध्वनि । १७. D. निःसर्पति ताडिता । १८. A. लिः । १९. A. द्य । २०. A. भिः । २१. D. च ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गौर्यशेषै(रि शीर्षै)न चेद्धन्ता(चाहं त्वां) ताडयामि सुमध्यमे ।
यया ते परिहासोस्ति नूनं त्वं[1] ताडिता [2]तया ॥ ८८६ ॥

एवं तु सान्यसा (या) नासौ(भौ) मूर्ध्नि भूमौ[3](रि) च ताडिता ।
केशेषु च गले क्षिप्तं(प्तं)पार्श्वगाया(नां) मृगीदृशा[4]म् ॥ ८८७ ॥

एवं कोलाहले जाते धार्यमाणोऽपि यत्नतः ।
निर्गच्छंति(च्छति) बलाद्राजा हासशृङ्गारपो[5]षकः ॥ ८८८ ॥

तस्य हासान्वितं श्रुत्वा कान्ता(:) कोपसमाकुला (:) ।
प्रयच्छन्ति ततो गाली य(र्य)था स्मरविजृम्भणी(:) ॥ ८८९ ॥

कुन्तलेषु समाक्षिप्ता (प्ताः) काश्चित्स्पृष्टपयोधरा(:) ।
प्रधावति(न्ति) नियुद्धे(द्धे)शं केना[6]हमवमालिता[7] ॥ ८९० ॥

धावन्ति [8]स्खलिताः काश्चि(ना काचि)त्पुरस्था या मृगीदृशा[9]म् ।
निपा(प)तोपरि तस्य त्वं येन[10] कृष्टासि कुन्तले ॥ ८९१ ॥

इत्यादि[11]कम(ल)हालापं स्मरमन्त्राक्षरोपमम् ।
तयोः श्रु(श्रु)त्वा महीपालः सहा[12]सं विनिवारयेत् ॥ ८९२ ॥

हासध्वनिं[13] समाकर्ण्य कामिनी कोपमूर्छिता ।
सासूयं च स[14]कामं च तस्य गालिं प्रयच्छति ॥ ८९३ ॥

सकामकौतुकाद्राजा तत्पादुत्थाय [15]सत्वरम् ।
रुजुं (ऋजु)चक्र(ङ्क्र)मणो गर्वात्स्पृश[16]न्कण्ठं पृथक् पृथक्
॥ ८९४ ॥

कस्याश्चित्कबरी[17]भारमाकर्ष[18]न्कुसुमान्वित[19]म् ।
कस्याश्चिद्वनमुद्वृत्तं विमृद्व(दून)न् कुचमण्डलम् ॥ ८९५ ॥

---

१. A. त्व ता तया । २. D. त्व । ३. A. मो पिता । ४. A. श । ५. A. यो । ६. A. नेह । ७. A. त । ८. A. चत । ९. A. चि । १०. A. शं । ११. A. नाथुष्णं कष्टासि कुंतले । १२. A. दिमाहालाप । १३. A. दास । १४. A. नि । १५. A. drops स । १६. A. मन्थरम् । १७. A. शंकासा । १८. A. रि । १९. A. र्षकु । २०. A. ता ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कपोलयोस्तथान्यस्य(स्या) निक्षिप्य करपल्लवम् ।
कस्याश्चिज्जघनोद्देशं हेमकान्ति(श्री)विभूषितम् ॥ ८९६ ॥
कस्याश्चित्कण्ठदेशं तु मुक्ताहारविराजितम् ।
कस्याश्चिदधरं रम्यं पक्वविम्बफलाक(कृ)ति(म्) ॥ ८९७ ॥
कस्याश्चिद्वि(द्वी)नमध्यस्थं (ध्यं च) कस्याश्चिन्नाभिमण्डलम्।
गम्भीरं संस्पृशन्राजा चित्ते हर्ष(र्षं) समुद्वहन् ॥ ८९८ ॥
वर्द्धयेच्चित्तजन्मा आ(नमा)त्मनः सुहृशामपि ।
मनोरमां तथा काञ्चीं पीडयेत्तु कुचद्वये (यम्) ॥ ८९९ ॥
विधृतोऽसौ तथा हस्ते विकर्षणानि(र्षन्पाणि)पल्लवम् ।
गृहीतहस्तं त(स्तस्त)न्वङ्ग्या गाढमुत्कण्ठया नृप (पः) ॥ ९०० ॥
शक्ता ये(क्तोऽप्य)शक्तवद्वाहं(वद्वाहुं) सि(शि)रीषकुसुमोपमम्।
प्रमोचयन्त(यंस्त)तः पश्चादन्यां पादेन ताडयेत् ॥ ९०१ ॥
सापि प्रगृह्य तं पादं उ(दमु)पह्नुत्य(गूह)नलम्पटा ।
स्पृष्टा कण्ठे परा बाहुमीर्ष्यया विकृषेत्क(त्प)रम् ॥ ९०२ ॥
तयोः परस्परं युद्धे कन्दर्पेण विनिर्मिते ।
बाहुपाशाद्विनिर्गत्य पु(पुन)रं(र) न्यासं (न्यां) समाश्रयेत् ॥ ९०३ ॥
तदंशुक(कं) समाकृष्य पलायनपरायणा (णः) ।
तया त्वमेव (था तयैव) केशेषु विधृतोसि (पि) पुनः पुनः ॥ ९०४ ॥
तेन वा(चा)न्या कचभरे विधृता धरणीभृता ।
प्रेम्णैवाहं धृता तेन मत्वैवं काममोहिता ॥ ९०५ ॥
आलिङ्गनाय नृपतेर्यावद्भवति सम्मुखी ।
तावत्केशग्रहासक्तां(क्तं) दृष्ट्वा तस्यै प्रकुप्यति ॥ ९०६ ॥

---

१. A. ज । २ A. दे । ३. A. रां । ४. D. drops these two lines । ५. A. ते । ६. A. त् । ७. A. वव D. विव । ८. A. कांश्चितायस्तु । ९. A. ष्ट्वा । १०. A. स्ततत्कण्ठयानृप । ११. A. क्तौ । १२. A. पेशक्तवद्वाहं । १३. A. मु । १४ A. मार्ष्यां । १५. A. री । १६. A. यो । १७. A. र्षं । १८. A. नस्मि । १९. A. क । २०. A. तया सत्य केशेषु विधृतो पुनः । २१. A. ध । २२. A. णि । २३. A. ग्णो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

केशाकेशि तयोर्युद्धे प्रवृत्ते निर्गतस्ततः[1] ।
अन्यासामपि सर्वासामेवमादे[2]श(मेव स)माचरेत् ॥ ९०७ ॥
सम्भूय च ततः[3] सर्वा गवेषणपरायणा[4] (:) ।
यत्र राजा ध्वनिं[5] कुर्यात्तत्र तत्र व्रजन्ति ताः[6] ॥ ९०८ ॥
[7]स्थानान्तरं व्रजेद्राजा श्रु[8]त्वा तन्नू[9]पुरध्वनि[10]म् ।
ततः पृथक् पृथक् कान्ता बुध्द्वा[11] सं(स्वं)किं[12] कि(किङ्कि)णी[13]रवम्॥९०९॥
चतुष्कोणान्विता (:) कान्ता(:) शय्यास्थाने च काश्चन ।
प्रतिस्तम्भस्थिताः काश्चिदन्वी[14]क्षन्त(न्ते) समन्ततः ॥ ९१० ॥
ततोऽसौ विधृतस्ताभिः[15] समस्ताभिर्महीपतिः ।
हस्तयोर्मस्तके[16] कण्ठे तथा वक्षसि पादयोः ॥ ९११ ॥
सर्वमात्रासु(गात्रसु)खस्पर्शादेकदे(दै)व महीपतिः[17] ।
सम्प्राप्य परमां प्रीतिं[18] चित्तेनान्दोलिता(तो) भवेत् ॥ ९१२ ॥
सुख[19]सन्दोहसाम्राज्यं तिमिरक्रीडया नृपः ।
अनुभूय परां प्रीतिं[20] व(ब)ध्वात्यर्थं सुशोभते ॥ ९१३ ॥
इत्येवं तिमिरक्रीडा कथिता सोमभूभुजा ।
[इति तिमिरक्रीडा ॥ १७ ॥]
इदानीं कथ्यते वीरक्रीडा धीरमनोहरा ॥ ९१४ ॥
सिद्धि[21]कार्यै[22] न(र्न)रैः[23] पूर्वं क्रीडयन् (डेयं) प्रक[24]टीकृता ।
तेनासौ वीरपुरुषैः कर्तव्या नेतरैर्नृपैः ॥ ९१५ ॥
विक्रमादित्यरूपेण महासाहसिकेन सा ।
कृता सु(शू)द्रकवा[25](वी)रेण वीराणां प्रवरेण[26] च ॥ ९१६ ॥
दर्शिता वीरनाथेन शालिवाहनभूभृता ।
कान्तीश्वरसुतेनापि कालिदासेन सेविता ॥ ९१७ ॥

---

१. A. त । २. A. दि । ३. A. त । ४. A. ण । ५. A. नि । ६. A. ता । ७. A. स्ता । ८. D. श्रु । ९. A. न्नू । १०. A. नि । ११. A. धा । १२. A. किके । १३. D. वरम् । १४. A. वीक्ष्यस्तं । १५. A. मि । १६. A. कठे । १७. A. ति । १८. A. ति । १९. A. ष । २०. A. ति । २१. A. धि । २२. D. र्यें । २३. A. रै । २४. A. ग । २५. A. वि । २६. A. न ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अन्यैश्च विविधैर्वीरैर्लेखि(रैःखेलि)ता पृथिवीतले ।
सिद्धिं[1] च महतीं प्राप्तास्ते सर्वे क्रीडयानया ॥ ९१८ ॥

खड्गो बाणो गदा पात्रं[2] यष्टिर्मु[3]ष्टि[4]ष्पटष्पटि (ष्टिः पटः खटिः) ।
अञ्जने(नं) पादुके रक्तं (क्तनं) [5]वेतालोङ्गुलिका[6] रसः ॥ ९१९ ॥

[7]निन्दी (निधि) व(र्व)राटिकाक्षौ वागित्यष्टादशसिद्धयः ।
प्रत्येकं लक्षणं तासां कथयामि यथाक्रमम् ॥ ९२० ॥

आस्ते यस्य करे खड्गो दुर्जयः स सुरैरपि ।
स्वयं च सङ्गरे जेता खड्गसिद्धिरियं मता ॥ ९२१ ॥

सङ्कल्पितं निहत्याशु दूरस्थमपि सायकः ।
पुनश्च हस्तमायाति बाल(ण)सिद्धिरितीरिता ॥ ९२२ ॥

अविमुक्ता विमुक्ता वा गदा[8] यस्य करे स्थिता ।
[9]वरान्हन्ति गजान्नित्यं गदासिद्धिरियं स्मृता ॥ ९२३ ॥

यस्य हस्ते स्थितं पात्रं वाञ्छितानि प्रयच्छति ।
पात्रसिद्धिः[11] समाख्याता सर्वकामफलप्रदा ॥ ९२४ ॥

करस्थ[12] या स्पृशे [13]द्वष्टि(ष्टया) यत्सङ्कल्प[14](ल्प्य) पुरःस्थितम् ।
तत्तदेव भवत्याशु सा सिद्धिर्यष्टिसंज्ञिता ॥ ९२५ ॥

यत्किञ्चिन्मुष्टिनादत्ते [15]वस्तु तत्काञ्चनं भवेत् ।
मुष्टिसिद्धिः [16]समुद्दिष्टा [17]जगदा(दा)रिद्र्यनाशिनि (नी)
॥ ९२६ ॥

[18]अवगुण्ठणमात्रेण येनादृष्टो नरो भवेत् ।
पटसिद्धिः समुदि(द्दिष्टा) जनानां दृष्टिवञ्चनि (नी) ॥ ९२७ ॥

---

१. A. द्धि । २. D. त्र । ३. D. मु । ४. A. ष्टिष्पटंखटी D. ष्टिष्पटष्पटि । ५. D. चेतारों । ६. A. कास । ७. D. सदा । ८. A. बाणलसिद्धि । ९. A. दां । १०. A. मिति वारादास्ति गसिद्धिरियं स्मृता । ११. A. द्धि । १२. D. स्था । १३. A. दृष्टा । १४. D. ल्पं । १५. A. तधस्त । १६. A. रियंख्याता । १७. D. जनानां दृष्टिर्वंचिनी । १८. D. drops these two lines ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्राणी[1] वा यदि वाप्राणी[2] यत्किञ्चिल्लिख्यते क्षितौ ।
तादृशं तद् भवत्याशु[3] खटिसिद्धिरियं भवेत् ॥ ९२८ ॥
अञ्जनाञ्चितनेत्रस्तु[4] यदा बध्नीत (था बद्धं वि) पश्यति ।
जलस्थमपि तं (तत्) सम्यगव[5]योज(नयाऽञ्ज)नसिद्धितः ॥९२९॥
पादस्थपादुका (को) देशमभी[6]ष्टं याति तत्क्षणा[7]त् ।
पादुकासिद्धिरित्येषा सर्वदेशाधिकारणम् ॥ ९३० ॥
[8]गरग्रहाग्निशस्त्रे[9]भ्यो मृत्युरेव न जायते ।
मणिधारणम[10]न्त्रे (मात्रे)ण मणिसिद्धिरियं मता ॥ ९३१ ॥
दासवत्कुरुते कर्म वेतालो यस्य नित्यशः[11] ।
[12]येन कृत्वा ह्यदृश्यः स्यात् सिद्धिर्वै[13]तालजा हि सा ॥ ९३२ ॥
वक्र(क्त्र)स्थाङ्गु[14]लिका यस्य पलीवलित (वलीपलित) वर्जिता (तः)।
[15]अभेद्यस्तु भवत्यस्त्रैः (स्त्रैः) सिद्धिः साङ्गुलिकाभिधा ॥ ९३३ ॥

काञ्चनीकुरुते लोहं देहमप्यजरामरम् ।
ईदृशोस्ति रसो यस्य रससिद्धिर्यतो हि सा ॥ ९३४ ॥
क्षितिमध्यगतं द्रव्यं पश्यत्या[16]प्नोति निश्चितम् ।
निधिसिद्धि वु(र्बु)धैः प्रोक्ता धर्मकामार्थसाधनी ॥ ९३५ ॥
[17]द्यूते नित्यं जयस्त(यो य)स्य तस्य सिद्धिर्वै[18]राटिका ।
इयं वराटिकासिद्धिः परद्रव्यापहारिणी[19] ॥ ९३६ ॥
चिन्तिता(नं)यचिंतं दायं यस्य यच्छति[20] पाशकः ।
अक्षसिद्धिरियं ख्याता [21]द्यूते लाभकरी नृणाम् ॥ ९३७ ॥
शुचिर्भू[22]त्वा नरो यस्तु चित्ते[23] सङ्कल्प्य भाषते ।
निश्चितं तद्भवत्येषा वाक्सि[24]द्धिरभिधीयते ॥ ९३८ ॥

---

१. A. णि । २. A. णि । ३. A. सु । ४. A. स्त । ५. A. द्वयो । ६. A. भि । ७. A. णा । ८. A. क । ९. A. स्त्रोभ्यां । १०. A. मैत्रेण । ११. A. श । १२. A. ...अ । १३. A. वे । १४. A. गु । १५. A. drops these two lines । १६. D. ब्ना । १७. A. द्यु । १८. A. व । १९. A. णि । २०. A. तिशक । २१. A. द्यु । २२. A. भू । २३. A. ते । २४. A. म्भिधि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्मादियं प्र[1]वीरेण सत्त्व[2]शार्दूल(सामर्थ्य)शालिना ।
शस्त्रमन्त्रविधा कार्या धीरेण शुचिना [3]सता ॥ ९३९ ॥

सार्धयामे गते रात्रेः पुरे सञ्चारवर्जिते ।
केनापि (प्य)लक्षिता (तो) गच्छेत्[4]खड्गचर्मसहायवान् ॥ ९४० ॥

स्मरन्नरहरिं[5] देवं [6]निःशेष[7]ग्रहघातकम् ।
शिवं शिवकरं ध्यात्वा भूतानामधिपं नृपः ॥ ९४१ ॥

चण्डिकां[8] हृदये भू(धृ)त्वा सर्वश[9](शत्रु)विनाशिनी(नीम्) ।
स्तुवन् विनायकं देवं सर्वविघ्नविनाशनम् ॥ ९४२ ॥

निर्गत्य भवनाद् भूत(पः)सावधा[10]ना(नो) व्रजेच्छनैः[11] ।
चत्वरं त्रिपथं वापि तथा जिन(जीर्ण)सुरालयम् ॥ ९४३ ॥

विशालं वटवृक्षं च पिप्पलं च सुवि[12]स्तृतम् ।
तथा पुष्क[13]रि[14]णीतीरं पुराणो[15]पवनान्यपि ॥ ९४४ ॥

सरितश्च प्रग[16]लभान्त(न्तो) मध्ये गच्छेन्महा[17]मना (:) ।
अक्षुब्धचित्त (:) (शौर्येण) स्तोये(स्थैर्ये)ण च समन्वित (:)
॥ ९४५ ॥

पिशा[18]चान् गुह्यका[19]न्यक्षान्वेतालाद्या[20]न्महागणान् ।
राक्षसान्[21] पिशिताहारान् प्रेतान्[22] पितॄन् ध(तृव)नस्थि[23]तान्
॥ ९४६ ॥

[24]ज्वालामु[25]खान् महाकायानङ्गाराकारलो[26]चनान् ।
[27]सन्ध्यभ्र... ... ...
मुण्डितान्(ञ्) [28]ज्वलितान् वक्त्रान् दीर्घान् ह्रस्वान् महास्वनान्
॥ ९४७ ॥

---

१. A. वि । २. A. सार्द्धशालिना । ३. A. मता । ४. A. ख । ५. A. रीं । ६. A. नि । ७. D. पर । ८. D. का । ९. D. त्रास । १०. A. नी । ११. A. नौ । १२. A. स्तृ । १३. D. र । १४. A. णिति । १५. A. येवमान्यपि । १६. A प्रा । १७. A. त्मना । १८. A. चा । १९. A. य । २०. A. त्रना । २१. A. नि । २२. A. वित्र । २३. A. ता । २४. A. द्वा । २५. A. खा । २६. A. हिता । २७. D. drops this line । २८. A. जटिला ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अस्थिचर्ममया[1]न् दी[2]नान् महाव[3]क्रा(क्त्रा)न् भयङ्क[4]रान् ।
दीर्घदं[5]ष्ट्रान् करालां[6]स्यान् महाजिह्वान् महोदरान् ॥ ९४८ ॥
त्रिपादानै(ने)कपा[7]दांश्च तथा दीर्घशिरोधरान् ।
गर्ता[8]क्षान् निर्गता[9]क्षांश्च लेलिहानां[10] च(श्च) सृक्कि[11]णीम् ॥ ९४९ ॥
[12]मस्तीक(स्तिष्क)पङ्कदिग्धा[13]ङ्गान(ना)न्त्रमालाविभूषितान् ।
[14]पाणिस्थला(स्थालां)श्च पिङ्गा(ङ्गां)श्च कीलालमदघर्मित् (घूर्णि-
तान्) ॥ ९५० ॥
लम्बौ[15]ष्ठान् लम्बक[16]र्णांश्च लम्बघोणान्[17] घ(णक)टानपी ।
वि[18]कृतं संहत(हसतस्तारं) क्रन्दतो(तो)[19] रुदतः स्फुटम् ॥ ९५१ ॥
ईदृग्विधान् विरू[20]पांस्तान् दृष्ट्वा [21]वीरो मुदान्वितः[22] ।
लोभये[23]तान्नदानेन क्षुधा[24]र्तान् [25]पिशिताशिनः ॥ ९५२ ॥
तर्जयन् भीषणाकारान् दीनानाश्वासयेन्नृपः ।
केचिदा(दा)[26]सत्वमायान्ति वेतालाः [27]शौर्य[28]पीडिताः ॥ ९५३ ॥
केचित्किङ्करतां [29]यातास्तत्र मांसेन तर्पिताः[30] ।
[31]आश्वासितास्तथा यान्ति [32]कृत(तज्ञ)त्वेन च भृ(त्वेन भृ)
त्यता(म्) ॥ ९५४ ॥
ईदृशं नृपतेः [33]शौर्यं साहसं बलमूर्जितम् ।
[34]दृष्ट्वा पितृवनान्तस्था [35]वन्यक्रीडा[36]र्थमागताः ॥ ९५५ ॥
यो[37]गिन्योपि समा[38]याता (:) स्त(श)वाराधनतत्पराः ।
योगिन्यस्तत्र बहुधा [39]निजक्षेत्रज(ऽयोनिजाः क्षेत्र)सम्भवाः
॥ ९५६ ॥

---

१. A. या । २. A. ना । ३. A. D. का । ४. A. रा । ५. A. ष्ट्रा । ६. A. ख्यान् । ७. A. दा । ८. A. क्षन् । ९. A. क्षा । १०. A. ना स्व । ११. A. णी । १२. A. ग्पस्तिक । १३. A. गा । १४. D. drops this line । १५. A. ष्ट्रा लंबकर्णा । १६. A. त् । १७. D. तिं । १८. A. सदस्फुटम् । १९. A. सांपांस्ता । २०. A. वि । २१. A. ता । २२. A. स्तान । २३. A. र्यान् । २४. A. निविताशिन । २५. A. म । २६. A. सौ । २७. A. पं । २८. A. यास्त । २९. A. ता । ३०. A. अस्वा । ३१. A. त्वमभृत्सतां । ३२. A. सौर्यं । ३३. A. drops द । ३४. A. त । ३५. A. थै । ३६. A. ता । ३७. A. गी । ३८. A. यति । ३९. A. स्यानिजाक्षेत्रजासंभवा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सहजाः समयोद्भूता गुप्ता[1]श्च प्रकटा अपि ।
एवं (कं)[2]जाला(ल)न्धरं पीठं द्वि[3]तीयं कामरूप[4]कम् ॥ ९५७ ॥

[5]उड्डियाणं तृ[6]तीयं स्या[7]च्चुर्यमु[8]ज्जयनी स्मृतम् ।
क्षेत्रं को[9]ल्हापुरं मुख्यं कर[10]हाडं(टे)[11]च विस्तृतम् ॥ ९५८ ॥

विराटपुर(पूः पू)र्णगिरि(:)[12]श्रीगिरिश्च वि(मु)कोटकम् ।
अम्भूशिखरकरेवि श्च(शम्भुशिखरकं विन्ध्यं)त्रको(चित्रकू)टं
निहासकम् ॥ ९५९ ॥

एकाम्रकं [13]महाचिश्च(चीनं)प्रयागं मलयस्तथा ।
को(ये)ला[14]रपुरव(प)ल्ली च क्षेत्राण्येवंविधा[15]न्यपि ॥ ९६० ॥

तत्र जातास्तु योगिन्यः[16] (न्योऽयोनिजाः पीठजाः स्मृताः) ।
क्षीर(क्षेत्रे)जातास्तु योगिन्यः क्षीरजाः क्षेत्रजाः [17]स्मृताः (क्षेत्रजाः
परिकीर्तिताः)
अन्यजेन (जन्म)[18]कृताभ्यासा य(द्य)त्र कुत्रापि जन्मनि ॥ ९६१ ॥

नानाप्रभ(भा)वसपन्ना यो[19]गिन्यः सहजा मताः ।
योगिन्यः समयाचारास्त(त्त)था सम[20]यदीक्षया ॥ ९६२ ॥

द्विविधाः[21] समयोद्भूता योगिन्यः[22] परिकीर्तिताः[23] ।
[24]पीठजा (:) क्षेत्रजा वापि सहजा (:) समयोद्भवा(:) ॥ ९६३ ॥

गुप्तप्र[25]कटभेदेन द्विवि[26]धास्ता निरुपिताः[27] ।
भार्या दासी च वेश्या च विधवा च तप[28]स्विनी ॥ ९६४ ॥

स्वकर्मभिरलक्ष्यास्ता गुप्ताः[29] पञ्चविधाः[30] स्मृताः ।
प्रभावं प्र[31]कटीकृत्य सञ्चरन्ति समन्ततः ॥ ९६५ ॥

---

१. A. श्वगटा । २. A. द्वालांचरं पि । ३. A. ति । ४. A. drops प । ५. D. ड्डीय । ६- A. ति । ७. A. तु । ८. B. ज्जा । ९. A. ल्दा । १०. D. डाहं । ११. A. चं वीणि । १२. A. श्रिद्वैते । १३. A. ह्म । १४. A. पू । १५. A. म्य । १६. A. ल्या । १७. A. स्मता । १८. A. कताभ्यांसा । १९. A. र्गीन्य । २०. A. युदि । २१. A. द्वा । २२. A. न्य । २३. A. ता. । २४. A. पिटला । २५. A. ग । २६. A. द्वा । २७. A. ता । २८. A. स्वी । २९. A. प्तां । ३०. A. स्म । ३१. A. गटीकत्वा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्र[1]कटास्ता[2]स्तु विज्ञेया योगिन्यो योगमातरः[3] ।
डाकिन्यः[4] पूतनाश्चैव शाकिन्यो रूपिकास्तथा ॥ ९६६ ॥

रेवत्यो शुष्करेवत्यो भी[5]माश्व[6]मुखम[7]ण्डिताः ।
देवी[8]सिंहासनोपान्ते निवि[9]ष्टास्ताः[10] समन्ततः[11] ॥ ९६७ ॥

दर्शयन्ति निजं रूपं देवता योगिनीवृता (:) ।
तासाममानुषं रूपं कान्ता(न्त)काञ्चनभूषितम् ॥ ९६८ ॥

अमानुष्यतुला[12]ढ्यं तु विरजो[13]म्बरवीजितम् ।
दिव्यसिंहास[14]नासीनं छत्रचामरशोभितम् ॥ ९६९ ॥

अ[15]क्षोता(भ्यो) नी(वी)क्ष्य भूपालो दिव्यं रूपं त[16](तद)द्भुतम् ।
पिशितं रुधिरं भूरि देवीनां परिकल्पयेत् ॥ ९७० ॥

भक्त्या[17]प्रणम्य निर्भीतस्त[18]तो मन्त्रैः प्र[19]पूजयेत् ।
वितरन्ति ततो दे[20]व्यः सि[21]द्धिः (द्धीः) सौ(शौ)र्येण
तोषिता (:) ॥ ९७१ ॥

सिद्धे(द्धीः)रभीप्सिताः सर्वा व्रह्म[22]भुक्त(गृह्णात्युत्प)
ललोचना (नः) ।
एवं सिद्धिं(द्धीः) [23]समासाद्य नृपो यायात्स्वमन्दिरम् ॥ ९७२ ॥

जनानां दर्शयन् प्रा[24]तः सिद्धिलाभं मुदान्वितः[25] ।
इत्ये[26]वं कथिता भीमा वीरक्रीडा सुखोदया ॥ ९७३ ॥

[इति वीरक्रीडा ॥ १८ ॥]

भूलोकम[27]ल्लदेवेन प्रेमक्रीडा प्रच[28]क्ष्यते ।
अभ्यासाल्लभ्यते विद्या ज्ञां[29]नं योगेन लभ्यते ॥ ९७४ ॥

---

१. A. ग । २. A. सु । ३. A. र । ४. A. न्य । ५. A. भि । ६. D. श्व । ७. A. मडिता । ८. A. सीहाननेयाते । ९. A. वृष्टा । १०. A. स्ता । ११. A. त । १२. A. ढ्य । १३. A. वरविजीतं । १४. A. ता । १५. A. भो । १६. D. दु । १७. A. प्रप्रणम्य । १८. A. ततन्मत्रै । १९. A. युंज । २०. A. व्य । २१. A. द्धि । २२. A. लुप्त । २३ A. संमाद्य । २४. A. त । २५. A ता । २६. A. drops वं । २७. A. ल । २८. A. क्ष । २९. A. न ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्यवसा[1]याद्धनं लभ्यं धर्मो लभ्यो दयादिषु ।
[2]पुण्यपापक्षयान्मोक्षो जयो लभ्यः पराक्[3]मात् ॥ ९७५ ॥

आरोग्यमौष[4]धाल्लभ्यमायुर्लभ्यं रसायनात् ।
सा[5]हसाल्लभ्यते सि[6]द्धिः कार्यसिद्धिरुपायतः ॥ ९७६ ॥

नयादवाप्यते राज्यं करवृद्धि[7]श्च जी[8]वतः (द्धिः प्रजावतः) ।
[9]शौर्यं सं(र्यात्सं)प्राप्यते कीर्त्या (र्त्तिः) महत्या(त्वं) रस(धन)तो नृभिः ॥ ९७७ ॥

सेव्यत्वं क्षमया [10]लभ्यं मित्रत्वं प्रियवाक्यतः ।
विवाहेन स्त्रियः [11]प्राप्याः स्त्रीभ्यः प्राप्यास्तथा सुताः ॥ ९७८ ॥

प्रकाशः प्राप्यते दीपाच्छोभा प्राप्या विभूषणैः ।
वह्निना प्राप्यते पाकः [12]खननात्प्राप्यते ज[13]लम् ॥ ९७९ ॥

प्राप्यमाप्यायनं तोया[14]न्मेघाद्वृष्टिरवाप्यते[15]
अशना[16]त्प्राप्यते तृप्तिराकरान्मणयस्तथा ॥ ९८० ॥

गजा बन्धनयो[17]गेन प्राप्य[18]न्ते [19]बडिशै[20]र्झषाः ।
मृ[21]गाः श्ये(स्व)नैरवाप्यन्ते प[22]क्षी च क्षर(क्षिणश्च कु)वेषतः ॥ ९८१ ॥

स[23]स्ये[24]भ्यः प्राप्यते धान्यमुद्यानात्फलमाप्यते ।
लोका दानैरवाप्यन्ते [25]तपसा सर्वमाप्यते ॥ ९८२ ॥

इ[26]तीयं(ष्टं) लभ(भ्य)ते सर्वं व्यवसायेन धीमता ।
विना [27]पूर्वकृतैः पुण्यै(:)प्रेम यत्नान्न लभ्यते ॥ ९८३ ॥

एकाभिमानि[28]की प्री[29]तिः कथिताभा(भ्या)सिकी[30] परा ।
सम्प्रत्य[31]यालि(त्मि)का चान्या तुर्या वैषयिकी भवेत् ॥ ९८४ ॥

---

१. A. याध । २. A. उरा । ३. A. मैः । ४. A. धौ । ५. A. हं । ६. A. द्धि । ७. A. ष्मि । ८. A. जावत । ९. A. सार्य । १०. A. वाप्यं । ११. A. प्या । १२. A. स्व । १३ A. लः । १४. A. मोधाद्र । १५. A. त । १६. A. प्रा । १७. A. गन । १८. D. ते । १९. D बि । २०. A. कषा D. झषैः । २१. A. गास्ये । २२. A. क्षिश्च । २३. D. मे । २४. A. भ्य । २५. A. drops त । २६. A. ति । २७. A. पुराकृतै । २८. A. कि । २९. A. ति । ३०. A. कि परं । ३१. A. पा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुत्रा मित्राश्च भृत्यानि[1] (भृत्याश्च मित्राणि) मदि (दी) य[2]मिति
या मतिः ।
उद्य[3]त्कालत्रया (य)प्रीतिः सा भवेदाभिमा[4]निकी ॥ ९८५ ॥

[5]गृहग्रामपुराद्येषु बहुकालैकवासरः[6] (तः) ।
तद्वत्कलत्रे[7] या (त्कालत्रय)प्रीतिः स्त्रीभिः (षु) साभ्यासिकी परा
॥ ९८६ ॥

अभ्यस्तभी[8]र्मन्यते वा (भ्यासान् मन्यमात्रस्य) सात् दृश्यते
ए(सादृश्यादे) कदेशतः ।
स्त्रीजने जायते प्रीतिः सा स्यात्संप्रत्ययात्मिका ॥ ९८७ ॥

रूपदर्शनमात्रेण चित्ते कामो वि[9]जृम्भते ।
[10]श्रवणात्कलनादश्च (स्य) मनस्यु[11]त्फुल्लति स्मरः ॥ ९८८ ॥

दिव्यशारीरगन्धः स्याद्(न्धोऽस्या)घ्राणमानस(यमाणस्तु)सम्प-
दम् (दा) ।
मानसे पदमादत्ते विलसद्रूपसूप(च)कः[12] ॥ ९८९ ॥

अध[13]रास्वाद[14]नेनैव पीयूषरस[15]गन्धिना ।
कामसञ्जीविते चित्ते हरनेत्राग्निदीपितः[16] ॥ ९९० ॥

अङ्गप्रत्यङ्गसंस्पर्शा[17]द्दूर्ध्व(दर्द्ध)रो मकरध्वजः ।
[18]वर्धते यस्य[19] वा चित्ते प्रीतिर्वैषयिकी हि सा ॥ ९९१ ॥

प्रीतौ (तौ) विषयजातायां किं रसो[20](किङ्करो) यत्र जायते ।
सर्वोत्कर्षवती [21]सा स्यात्प्रीतिः[22] सा प्रेम कथ्यते ॥ ९९२ ॥

अभिमानजाभ्या(मानाभ्या)सजाता तथा सम्प्रत्ययात्मिका ।
एताः[23] स्युः प्रीतयो यत्र[24] न लभ्या विषयात्मिका ॥ ९९३ ॥

---

१. A. णि । २. A. ग । ३. A. कलाक्रिया । ४. A. drops निकी । ५. D. ग्र । ६. A. राः । ७. A. त्र । ८. A. भीमनुत्येवा साद्यश्यादेकदेशत । ९. A. ज । १०. A. श्रा । ११. A. लसति । १२. A. क । १३. A. रोखा । १४. A. मे । १५. A. धंधि । १६. A. त । १७. A. दुर्धरोममकस्थजी । १८. A. omits this व । १९. A. त्र । २०. A. सा । २१. A. तस्मात्साग्री । २२. A. ति प्रेम । २३. A. तास्युप्रि । २४. A. त्रा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

महता पुण्ययोगेन भवप्रे(वेत्प्रे)म वरस्त्रियः ।
दीधि(क्षि)तासु भवेद्रागः[1] पूर्वसञ्चि[2]तकर्मभिः ॥ ९९४ ॥

दुर्निवारः [3]कर्मपाकस्तत्संयोगी च [4]चित्तजः ।
अयोगेऽपि यदादत्ते प्रेमाणं दग्धमन्म[5]थः ॥ ९९५ ॥

[6]पृथक्प्रभावो लोक(केऽ)स्य कस्यचित्किञ्चिदीप्सितम् ।
अन्यजन्मकृताभ्या [सा] न्निन्दितोऽपि(तेऽपि)स रज्यते
॥ ९९६ ॥

इन्द्रनीलमणिर्दिव्यस्तृणग्रा[7]ही विलोक्यते ।
माणिक्यं च स्वभावेन स्थितं सर्पस्य मूर्धनि ॥ ९९७ ॥

निर्मलं शीतलं मृष्टं वारि वन्हेर्न रोचते ।
अस्वादु लवणं तोयं रोचते वाह(ड)वाग्नये ॥ ९९८ ॥

सर्वाल्हादक[8]री ज्योत्स्ना [9]पीयूषांशुसमुद्भवा ।
न रोचते सरोजाय क[10]र्दमावाप्तजन्मने ॥ ९९९ ॥

प्रावृषेण्यं पयोवाह[11]मभिनर्त(न्द)ति चातकः ।
तमेव नाभिनन्दन्ति घनं [12]हंसाः कदाचन ॥ १००० ॥

[13]निशाकरकरैः स्पृष्टो दन्तितो(न्तको) न विदीर्यते ।
तेषां सम्पर्कमात्रेण चन्द्रकान्तः[14] स्रवेज्जलम् ॥ १००१ ॥

अभ्युद्यते सहस्रांशौ विकाशो(सो) लोह(क)चक्षुषाम् ।
नीलोत्पलानि सङ्कोचं नेत्रमित्राणि बिभ्रति ॥ १००२ ॥

जानन्नपि हि वै[15]गुण्यं दू[16]यमाने व मानसे ।
तथापि रमते [17]प्रेमा(म्णा) पूर्वजन्मकृता(तात्)क्षणम् ॥ १००३ ॥

चिरं प[18]रिचिता कान्ता यस्मै पूर्वं न रोचते ।
केनापि लग्नयोगेन सैव स्यात्प्राणवल्लभा ॥ १००४ ॥

---

१. A. D. ग । २. A. र । ३. A. कर्मविपाक । ४. A. वितजः । ५. A. ध । ६. A. प्र । ७. A. ग्रह । ८. A. रि । ९. A. पि । १०. A. द्वं । ११. A. नंर्तचा । १२. A. ह D. हंसा । १३. A. निशाकरैः पृस्टो । १४. A. तश्र । १५. A. वे । १६. A. दुयमानोर । १७. D. म्णः । १८. A. रं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुरा[1]कृतेन पुण्येन मुहूर्तस्य गुणेन वा ।
[2]ऋणसम्बन्धतो वापि क्वापि प्रे[3]म प्रवर्तते ॥ १००५ ॥

उत्पन्नं लभ(भ्य)ते प्रेम प्रकारद्वितयेन तु ।
ईर्ष्यया दुर्लभत्वेन ग्रामो मर्यादया यथा ॥ १००६ ॥

मुक्तिर्विध[5]त्वायुर्विप्रतोषेण [6]पुरतो (यथायुर्विप्रतोषेण मुक्तिः
पुण्यरतो यथा ।
प्रेम प्र[8]वर्तते त[9]द्वदीर्ष्यया पृथिवीभुजाम् ॥ १००७ ॥

मु[10]क्तिं(क्तिर्) निरन्तरं[11] नत्वा किं चित्रं तत्र वर्ण्यते ।
[12]ईर्ष्यादौ लभ्यते [13]दुःखे(खं) प्रेम्णि सौख्यं तद[14]द्भुतम् ॥ १००८ ॥

वसन्ते निर्मलश्चन्द्रो दक्षिणो मलयानिलः ।
भूषणानि सुरत्नानि बिचित्रा[15]ण्यम्बराणि च ॥ १००९ ॥

सुरभीणि च मा[16]ल्यानि दिव्य[17] गन्धविलेपनम् ।
कर्पूराढ्यं च ताम्बूलं हृद्यं रुच्यं च [18]भोजनम् ॥ १०१० ॥

उद्यानं नन्दनं [19]श्रेष्पं(श्रेष्ठं) क्रीडावाप्यो[20] मनोहराः ।
सुधासिद्धानि गेहानि शय्या स्पर्शसुरवावहा ॥ १०११ ॥

अशनानि मनोज्ञानि काचका[21] हिद्धि[22]म(चनद्धं तु)भूतलम् ।
सवितानानि हर्म्याणि धूपः कृष्णा[23]गरूद्भवः ॥ १०१२ ॥

बोधयन्ति समायुक्तं मधु[24]रो गीतनिस्वनः ।
वीणावेणु[25]निनादश्च भाव[26]युक्तं च व(न)र्तनम् ॥ १०१३ ॥

काव्यं शृङ्गारभू[27]यिष्ठं कथा [28]सम्भोगसम्भवा ।
कर्णसौख्यावहा गोष्ठी हास्यं नाम्ना समन्वितम् ॥ १०१४ ॥

---

१. A. क । २. D. रु । ३. A. माप्तते । ४. A. था । ५. A. पुण्यपूरवतो । ६. A. वृत । ७. A. द्व...दिर्ष्यायां यथा । ८. A. क्ति । ९. A. रा । १०. A. इष्या । ११. A. दुषे । १२. A. द्भ । १३. A. न्यंबरानि १४. A. ल्यादनि । १५ A. व्यं । १६. A. सो । १७. D. व्यष्पं । १८. A. द्यो । १९. A. काद्दिम D. कात्हि । २०. A. ले । २१. A. गुरुद्भव । २२. A. स्मर । २३. A. विनो । २४. A. य । २५. A. यिष्टा इष्टं । २६. A. सन्तोषसम्भवः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विशाल(लास)विभ्रमोदारा तरुणी रूपसंयुता ।
सर[1]सा आर्द्र(सान्द्र)चित्ता च कलाकौशलनिर्भरा ॥ १०१५ ॥
एते सु[2]खावहा (:)सर्वे पदार्थाः परमार्थतः ।
प्रे[3]म प्र(मोप)करणायैव निर्मिता(:) परमेष्ठिना ॥ १०१६ ॥
संसारसारसर्वस्वं [4]प्रेमवद्वीक्षणं परम् ।
स[5]र्वमेतद्विना तस्मादसु[6]खायोपजायते ॥ १०१७ ॥
[7]सख्यं प्रेमनिबद्धं [8]यत्तत्तो(तो) मायोपमीयते ।
सर्वाण्यपि सुखान्यस्य कलां नार्हन्ति षोड[9]शीम् ॥ १०१८ ॥
पुण्यहीना नरा ये तु प्रेम किं[10] प्राप्नुवन्ति ते ।
विना सुकृतसम्बन्धं निधानं केन लभ्यते ॥ १०१९ ॥
प्रेम [11]प्राप्याप्यचतुरः कथं जानाति सेवितुम् ।
अतः प्रबद्धं यत्प्रेम सञ्जातं [12]दैवयोगतः ॥ १०२० ॥
चतुरः सा(रस्य) [13]प्रतीतेन(प्रवर्धेत) गोलाप्ये(दौर्लभ्ये)नेर्ष्यया च तत् ।
कामो वामस्वभावेन प्रति[14]कूलेषु वर्धते[15] ॥ १०२१ ॥
अभिलाषं हिनस्त्येष स्वाधीनेषु सरः स्मरः ।
अत [16]एव विदग्धेन दुर्ल[17]भत्वं प्रयत्नतः ॥ १०२२ ॥
कर्तव्यं धीरवृत्तेन सुखसाम्राज्यमिच्छता[18] ।
[19]ईर्ष्या कार्या विदग्धेन दुर्लक्ष्या(भ्या) स्वा[20]मिनोऽपि किम् (या) ॥ १०२३ ॥
सुरसा जायते तेन सा मनोत्सवकारिणी[21] ।
क्षुधिते भोजनं मिष्टं तोयपानं [22]तृषातुरे ॥ १०२४ ॥
निदाघे शीतलं रुच्यं शीते घर्मः सुखावहः ।
इति मत्वा महीपालो यतेत प्रे[23]मवर्द्धते (ने) ॥ १०२५ ॥

---

१. A. सारेसाद्रवितावकविलाकौशलनिर्भरा । २. A. ष । ३. A. भेप्रक । ४. A. प्रेम तीक्षणं परम् । ५. A. वेंम । ६. A ख । ७. A. संख्यं । ८. A. यात तोमी । ९. A. शि । १०. D. कं । ११. A. प्राप्यां चत्वार कथं जनाति । १२. A. देवयोगत । १३. A. प्रतितेतीन-गोलाभ्येनर्ष्य । १४. A. तु । १५. A. त् । १६. A. ये । १७. A. स । १८. A. ति । १९. A. ईर्ष्या । २०. A. त्मिनोपिकि । २१. A. णि । २२. A. तृ । २३. A. मवर्द्धते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]ईर्ष्याघटास(ण्टार)वैर्वाक्यैः कुर्वाणः[2] कलहं[3] स्त्रिया ।
दक्षानन्त(ः) पुराध्यक्षा(क्षान्) सावधाना(नान्) जितेन्द्रियाः[4]
(यान्) ॥ १०२६ ॥

आहूय शिक्षयेद् भूभृदुपाया[5]त्(न्) प्रेमवृद्धये ।
[6]अविरोधेन रक्षायाः शुद्धान्तहरिणीदृ[7]शाम् ॥ १०२७ ॥

समाप्य लक्षितं का[8]र्यं कार्यमीर्ष्याविवर्द्धनम् ।
ततोऽवरोधनाध्यक्षे(क्षो) भूषणं वसनादिकम् ॥ १०२८ ॥

बन्धुभिर्बान्धवैर्दत्तं दे[9]वीनामर्पयेत्पु[10]टीम् (टे) ।
ततोऽवरो[11]धनाध्यक्षं(क्षो) पिशुनं द्रव्यलोलुपम् ॥ १०२९ ॥

अलक्षितेन केनापि द्रविणं तस्य पाद(दाप)येत् ।
पिशुनं शिक्षयेदेवं [12]यददत्तं महीभुजा ॥ १०३० ॥

[13]भूषणं धारिते (तं) देव्या देवो विज्ञाप्यतामिति ।
ततस्तुष्टो महीपालो भूरि द्रव्यं प्रयच्छति ॥ १०३१ ॥

[14]ऊर्ध (र्ध्व) नाथाय दातव्यमध्यक्षाय धनं ततः ।
बलस्य रक्षकः क्वापि प्रस्थाप्यो[15] दूरदेशतः (के) ॥ १०३२ ॥

ततः क्षुब्धो महाराजो घनका[16]ले यथार्णवः ।
आगत्य प्रेयसीगेहं भ्रूभङ्गकुटिलेक्षण[17]म् (णः) ॥१०३३ ॥

ईर्ष्यावश(ः)कलिं कृत्वा गच्छेन्निर्गत्य मन्दिरात् ।
निर्गत्य भवनाद् गच्छन् धार्यमाणस्तथा(या)म्बरे ॥ १०३४ ॥

दम्भोलिक[18]ठिनं चित्तं कृत्वा मुख्योऽद्य मञ्जरी[19] (पुष्पौघम-
ञ्जुलम्) ।
हर्म्यान्निर्गत्य याता(तो)सि वार्यमाणो गृहा[20]न्मम ॥ १०३५ ॥

---

१. A. इष्योह्वटासवि । २. A. णा । ३. A. ह । ४. A. या । ५. A. यात्रे । ६. A. अरो । ७. A. शं । ८. A. र्यकार्याभीष्या । ९. A. वि । १०. A. टि । ११. D. च । १२. A. यदत्तंतु । १३. A. भूषणं धारिते देवो विज्ञाप्यतामिति । १४. A. अर्धं । १५ A, दूरदेशत । १६. D. लो । १७. A. णा । १८. D· थ । १९. A. रि । २० . A. न्मय ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यदि गच्छसि चित्तान्मे तदा त्वं(त्वत्)पौरुषं कथम् (खलु)।
गच्छ गच्छ पदे(दं) ग[1]च्छन्(च्छ) न मेऽकार्यं कृतं त्वया ॥ १०३६ ॥

त्वद्रूपगुणसम्प[2]न्नश्चित्ते वसति मे प्रियः ।
हृदयोन्मादव[3]चनं गच्छामि विश्रु(मीतिश्रु)तं मया ॥ १०३७ ॥

वन(नि)ताङ्का(ङ्क)गृहावा[4]स(सं)किं पुनः प्राप्य(र्थ्य) ते मया ।
गन्तुमुत्सुकतां त्यक्त्वा क्षणं तिष्ठ ममान्तिके ॥ १०३८ ॥

पश्यामि वदने नेन्दुं (नेन्दुं ते) प्रातः किं मे भविष्यति ।
गच्छसि त्वं वृथा को[5]पादनिच्छन्मम जीवितम् ॥ १०३९ ॥

यद्यहं (वदाद्य) विप्रियं [6]किञ्चित्कृतं तेऽस्ति मया प्रभो ।
एवमादीनि वाक्यानि प्रेमवृद्धिकराण्यपि ॥ १०४० ॥

श्रु(श्रु)ण्वन् धैर्यं समाल[7]म्ब्य गच्छेन्मन्मथवर्द्धनम् (नः)।
ततश्चन्द्रोदये जाते कृ[8]तश्चेद्रतमण्डलम् (कृत्वा च रतिमण्डनम्)
॥ १०४१ ॥

माञ्जिष्ठमद(पट)संवीतो[9] गच्छनसुशालि(गच्छन्सच्छाल)मन्दिरम् ।
ताम्बूलधारकस्त्वेकस्तथा[10]नर्मधरोपरः ॥ १०४२ ॥

त्रे[11]ष्यां वेगं (प्रेष्यो वेगी) ततश्चान्यस्त्रिभिरे[12]तैः समं व्रजेत् ।
व्रजन्नन्तः[13]पुरे राजा कयाचिल्ल[14]क्ष्यते (क्षितः) पथि ॥ १०४३ ॥

निर्वि[15]डयं(व्रीडया) धृतं(तः) पाणौ सङ्गलम्पटवि[16]क्रिया (चित्तया)।
[17]गृहं बलात्समानीतो [18]मिथ्यावाक्यैः सरःप्रियाम्(शठः प्रियः)
॥ १०४४ ॥

सा[19]न्त्वयित्वा [20]व्रजेत्तत्र यत्र स्यात्कलहः पुरा[21] ।
त[22]स्याः सखी यथा [23]पश्येत्तथान्यस्या गृहं विशेत् ॥ १०४५ ॥

---

१. A. च्छनामकार्यशरत्पया । २. A. न्नत्वित्ते न वसति मे प्रियः । ३. A. स । ४. A. सु । ५. A. पो । ६. A. कत्तिस्वरतं...श्रोतेप्रियं । ७. A. स्य । ८. A. तंचद्रतमण्डनम् । ९. वितामच्छातलमान्दिरं । १०. A. मर्मसचोपर; । ११ A. ष्या । १२. A. तै । १३ A. न्नंत । १४. A. क्षितः । १५. A. डंयधृत । १६. A. त्त । १७. D ग्र । १८. A. न्व्यावाक्येःसरप्रियाम् । १९. A. त्वं । २० A. वृजेन्नत्र । २१. A. रो । २२. A. स्याः । २३. A. यश्चे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कलहान्तरिता [1]नारी खे(खेदा)दुदी(दी)पिता ततः ।
दुरापं तम(न्म)या प्राप्तं म[2]च्छायायां स्थिता(तो)सि यत्
॥ १०४६ ॥

त[3]तः स्थितिं च (ते)वाञ्छामि [4]पार्थादीनां (पार्थक्येन) कथं लभे ।
[5]यद् धृतोसि सपत्नीभिः स्थितः सन्मम मन्दिरे ॥ १०४७ ॥

तेनैव कृतकृत्याहं चित्त(त्तं)मन्ये न लक्षितम् ।
सुखावहं स्पृशाम्यङ्गं शृणोमि वचनं पते ॥ १०४८ ॥

पश्यामि रू[6]पं लभ(भ्यं)ते किमिदं चित्तहारिणी[7] (यत्) ।
एवमादी[8]नि वाक्यानि स[9]माकर्ण्य नरे[10]श्वरः ॥ १०४९ ॥

सौभाग्यद्रव्यसंयुक्तः शनैर्गच्छे[11]त्प्रियागृहम् ।
अन्यद्वारसमासक्ता कामिनीसुरतोत्सुकः[12](का) ॥ १०५० ॥

राजा(ज्ञा) निरीक्ष(क्ष्य)ते मार्गे चातकेव (न) पयोमुचः[13] ।
दाक्षिण्येन नृपो ब्रूयात्कामिन्याश्चित्तरञ्जनम् ॥ १०५१ ॥

[14]भुक्त्वाहमागमिष्यामि त्वं शृङ्गारवती भव ।
कदायास्यसि मद्गेहं देव त्वं बहुवल्लभ ॥ १०५२ ॥

श्रेयांसि बहुविघ्नानि कयाचिद्वार्यते (से) बलात्[15] ।
त्वं प्रिया चारुसर्वाङ्गी मत्सङ्गसुखलम्पटा ॥ १०५३ ॥

अतोऽहं निश्चयेनाद्य समायामि त्वदन्तिकम् ।
एवमादिभिरन्यैश्च चारुवाक्यैर्मनोहरैः[16] ॥ १०५४ ॥

कामि[17]नीं सान्त्वयित्वा तां[18] वल्लभाया गृहं व्रजेत् ।
गच्छतस्तस्य कान्तस्य दूती प्रस्थापिता तया[19] ॥ १०५५ ॥

---

१. A. नोरि । २. A. च्छ । ३. A. तस्थितित । ४. A. यार्प्या दिनां कथं लसे । ५. A. यद्वृ । ६. A. प । ७. A. णि । ८. A. न । ९ A. स । १०. A. स्वर । ११. A. प्रियाग्रहं । १२. A. का । १३. A. च । १४. A. भूत्काहमां । १५. A. त । १६. A. रै । १७. D. नी । १८. D. त्वां । १९. D. था ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

झटिति प्रेक्षिता वर्त्मन्यावाहनसमुद्यता ।
शृ(श्रु)त्वा [1]गीतं मनोहारि किं स्मृत्वा तत्समं सुखम् ॥ १०५६ ॥

[2]अहं हि न वचः प्राण(हन्तेतीदं वचः प्राणैः) प्रीणिताहं(प्रेषितं हि)
मृगीदृशो(शा) ।
यद्यानयसि तं [3]कान्तं मत्तस्तत्पारितोषिकम् ॥ १०५७ ॥

अप्स्यसेच[4]नरि(आप्स्यसे च ततो)भूरि यच्च चित्ते व्यवस्थितम् ।
यद्याया[5]सीत्प्रि(सि प्रि)यागेहं पा(प)रितोषि(ष)करोत्सुक
(रं सुख)म् ॥ १०५८ ॥

सुखं च लभते कान्त (न्ता) त[6]देहि धर[7]णीपते ।
अहं ते भूरि दास्यामि हेम यद्वा तवेप्सितम् ॥ १०५९ ॥

आगच्छामि क्षणेनाहं तिष्ठ तिष्ठेति [8]तां वदेत् ।
इत्यु[9]क्त्वा पृ[10]थिवीपालस्तस्या (स्यै) दत्त्वा समीहितम् ॥ १०६० ॥

[11]शनैर्या [12]यायामि त(न्निमथस्त)त्र यत्र संवर्धि[13]तः कलिः[14] ।
काचिद[15]न्तरे कान्ता कामेना[16]कृष्टमानसा ॥ १०६१ ॥

परिधाय सितं वस्त्रं मुक्ताभरणभूषिता ।
गच्छ[17]तः पुरतस्तस्य वे[18]गान्त(त्त)मुपगच्छति ॥ १०६२ ॥

पूर्वसञ्चितकर्मैव दुर्निवारा स्मरातुरा ।
गृह्णाति खो[19]प(म्प)कं [20]गाढं स्वेदवेपथुसंयुता ॥ १०६३ ॥

रोमाञ्चितकुचद्वन्द्वा सा[21]श्रुगद्गदभाषिणी[22] ।
[23]कोप(खोम्प)धारणसम्भूता(तः) कोपस्तस्य तिरस्कृतः ॥ १०६४ ॥

कामेनोल्लसितं वक्त्रं चन्द्रदर्शनजन्मना ।
वि[24]ज्ञे(ज्ञा)य मितरं (नितरां) प्रेम युक्तायुक्तविनाशनम् ॥ १०६५ ॥

---

१. A. णि । २. A. अहं न वचः प्राणितो हं मृगीदृशो । ३. A. कांमं तस्तत्परितोषिकं । ४. A. मरी । ५. A. सिप्रियागेहं पारितौषित्करोत्सुखम् । ६. A. हे । ७. A. णीं । ८. D. वा । ९. A. क्तां । १०. A. थवीलपो । ११. A. शंमै । १२. D. च्चा । १३. A. तं । १४. A. लि । १५. A. त्रंत । १६. D. ष्टक । १७. A. त । १८. D. दा । १९. A. ख्योप । २०. D. कण्ठं । २१. A. ब्र । २२. A. णि । २३. A. पोप । २४. A. ज्ञातव्यमितरं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गाढमालिङ्गिता तेन सा कान्ता कठिनस्तनी ।
[1]अन्यां न पश्यति प्रेम्णा नानाभूषणभूषिताम् ॥ १०६६ ॥
गुप्तमन्दिरमानीता [2]सङ्केतेनेति भूभृता ।
समागच्छाम्यहं भद्रे भवनं तव भामिनि ॥ १०६७ ॥
नन्दं(नेदं) समुचितं[3] स्थानं सुखसम्भोगकर्मणः[4] ।
एवं सम्बोध[5](ध्य)युक्ताक्षी(मुग्धाक्षीं) दुग्ध[6]सन्दि(संस्नि)ग्धया
गिरा ॥ १०६८ ॥
मुखताम्बूलदानेन शि[7]रोमाल्येन तोषयेत् ।
तां प्रस्थाप्य ततो गेहं प्रियासद्म समाविशेत् ॥ १०६९ ॥
तिष्ठ[8]ति स(ष्टेत्तिरो)हितस्तत्र गवाक्षार्पितलोचना[9](नः) ।
स[10]खीपरिवृता देवी चन्द्रज्योत्स्नाप्रतापिता ॥ १०७० ॥
नलिनी[11]व परिम्लान(ना)सङ्कोचितमुखाम्बुजा ।
[12]वामहस्ततलन्य(न्य)स्तकपोलफलका कृशा ॥ १०७१ ॥
मुञ्चति (न्ती) [13]बांष्प (बाष्प)[14]सलिलं मुक्ताफल[15]सप्रभम् ।
कपोलकज्जलं[16] यस्या गवी(लि)तं लोचनाम्बुभिः ॥ १०७२ ॥
कस्तूरीपङ्कजं जात(ती)पत्रलेखेव राजते ।
तस्याः स्फुटन्ति(ति) कण्ठस्थमुक्ताजाला इव[17] (लमिव) स्फुटम्
॥ १०७३ ॥
कर्पूरमास्यविन्यस्तमाप[18]रा(त)त्परिदृश्यते ।
[19]ज्वरितेव सुतप्ताङ्गी गृ(ग्र)हाविष्टेव [20]भूतले ॥ १०७४ ॥
लोलमाना[21] सखीभिः[22] सा धार्यमाणा प्रयत्नतः[23] ।
चन्दन[24]द्र(द्रु)मनिर्यास(ः)सिच्यमाना[25]त(नस्त)दन्तिके
॥ १०७५ ॥

---

१. A. अन्यायां धानयत्स्यंति प्रेमसाद्यानभूषणा । २. A. सकिते । ३. A. तं...सुख । ४. A. ण एवं संभोगकर्मणा । ५. A. मुक्तानि । ६. A. संस्निनधयो । ७. A. रोः । ८. D. ष्ठे A. ष्ठतिरोहि । ९. A. नाः । १०. A. खिपतिव्रतादेवि यंद्रस्वा प्रतापिता । ११. A. या । १२. A. वीप्र । १३. A. चास्य । १४. A. श । १५. A. सप्रभमम् । १६. A. लकियस्या । १७. A. वा । १८. A. रत्परिद्रस्वते । १९. A. द्व । २०. A. धू । २१. A. नि । २२. A. नि । २३. A. त । २४. A. ड्रु । २५. A. नंस्तदंतके ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तदे(दै)व शोषमायाति [1]तस्या देहो(हे) यथा जलम् ।
कदलीदलसम्भूतव्य[2]जनं तनुतापनुत् ॥ १०७६ ॥
सङ्कुचत्यचिरेणैव ततो [3]मर्मरतां व्रजेत् ।
कथ्यतां किमिदं देवि तव सन्ताप[4]कारक(ण)म् ॥ १०७७ ॥
वयस्या [5]सांद्रशी(मादृशी) तेस्ति करिष्यामि समीहितम् ।
इति [6]सख्या व[7]चः शृ(श्रु)त्वा स्मर[8]सायकसादिता ॥ १०७८ ॥
कथंचिद्धैर्यमालम्ब्य ब्रूते वाक्यं समुच्छ्वसन् (त्) ।
न [9]मेऽपराधलें[10]शोऽस्ति वल्लभः कुपितो [11]मृषा ॥ १०७९ ॥
प्राणान् हरति मे का[12]मश्चन्द्ररश्मिसहायवान् ।
इति श्रुत्वा सखी तस्या[13] वचनं ब[14]हुदुःखिता ॥ १०८० ॥
ईदृशं तव सञ्जातं दुःखं राज्ञे निवेदयेत् (ये) ।
निवारयति तां देवि(वी) कान्तदुःखप्रबोधिनी[15]म् ॥ १०८१ ॥
इमामव[16]स्थामाकर्ण्य नासौ तुष्यति नि[17]र्घृणः ।
क्षणमेवं (कं) प्रवी[18]क्ष्य त्वं (तीक्षस्व) यावत्तस्य प्रियं भ[19]वेत्
॥ १०८२ ॥
तदेव[20] तस्य कथय स(म)म जीवितवैरिणः[21] ।
अवश्यं[22] यदि कर्तव्यं तदेतत्कथ्यतां त्वया ॥ १०८३ ॥
कुपितश्चेत्स्वयं हन्तु मारचण्डालिनेति किम् ।
प्राणानामीश्वरः कान्ता तस्या(न्तस्तस्य)व[23]स्याव(इया म)मासवः[24]
॥ १०८४ ॥
तानेतान् हरते कामः[25] सा लज्जा तस्य नो भवेत् ।
लोचनं[26] तव पश्यामि संस्फुटं(रद्) दक्षिणेतरम् ॥ १०८५ ॥

---

१. A. नत । २. D. ज्ज । A. जनं तापनुत । ३. A. मुर्मरता । ४. D. कारं । ५. A. साद्रशीतस्ती । ६. A. सं । ७. A. च । ८. A. ता । ९. A. शीस्ती । १०. D. मया । ११. A. मचं । १२. D. स्य । १३. A. त । १४. A. नी । १५. A. स्थां समाकर्ण्य । १६. A. घ्रण । १७. A. क्ष । १८. A. वे । १९. A. वां । २०. A. ण । २१. A. स्यं । २२. A. त्स्या । २३. A. व । २४. A. म । २५. A. नां ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आगमिष्यति भर्ता ते प्राणनाथो महीपतिः[1] ।
त्यज दुःखं [2]वरारोहे हंस[3]मन्थरगामिनि ॥ १०८६ ॥
न दुःखयोग्या भवति शा[4]खापि च विनिर्मिता ।
एवं श्रु(श्रु)त्वा[5] ततो देवी सखि(खी)वाक्यं मनोहरम् ॥ १०८७ ॥
उत्तरं ध(द)त्तवत्यासु(शु) सखीवाक्यविरोधि यत् ।
यो गरोग[6](तो म)भ दृष्ट्वापि लोचने बाष्पवर्षिणी[7] ॥ १०८८ ॥
[8]स्पन्दमाने कथं वामे स च(प्र) कुप्यागमिष्यति ।
रोदनं नि[9]ष्फलं जातं दैन्यमप्यमृगीसृ(तिविस्तृ)तम् ॥ १०८९ ॥
बाहुभ्यां वेष्टनं गाढं [10]यद्यथेय(व्यर्थमेत)त्समागतम् ।
पादप्रणामजं(मः सं) जातं[11](तः) का[12]मोद्दीपनकारणम् ॥ १०९० ॥
तस्मिन्शंसे केदति(तस्मिन्नृशंसे किं दूति) शुष्कवाक्ये र्भ(क्यैर्भ)
विष्यति ।
[13]मत्वा(एतत्) तयो[14](वो)दितं वाक्यं तस्मिन्सङ्क्रु[15]द्धमानसे
॥ १०९१ ॥
दूति[16] प्रत्युत को[17]पाय जायते (येत) प्रियवादिनि[18] ।
[19]सन्तप्ते हि महावीरे स्नेहे[20]नान्तःप्रपूरिते ॥ १०९२ ॥
[21]क्षीरमग्नौ विनिक्षिप्तं [22]ज्वालायै परिकल्पते ।
विहितस्यापराधस्य प्रार्थनादि[23]प्रतिक्रिया ॥ १०९३ ॥
अनिमित्त[24]रुषस्तस्य क्रियते प्रार्थनं कथम् ।
विस्मृतौ स्मृ(तोऽस्म)त्परिचयो दाक्षिण्यं क्षे[25]ण्यमागतम् ॥ १०९४ ॥
अन्यचित्त [26]इवाभाति तस्मिन्कः प्रार्थनक्रमः ।
उपायश्चिन्त्यते येन त(स्या)च्चित्तं तेन मे वृतम् ॥ १०९५ ॥

---

१. A. ति । २. A. व । ३. A. मंव । ४. A. षा । ५. A. त्व । ६. A. ममदृष्का । ७. A. णि । ८. A. यस्यन्दमाने । ९. A. ष्पलजातं दैन्यमप्यमृगीसृ । १०. A. पतयद्यसमागतम् । ११. A. त । १२. A. मोदी । १३. A. reads this line before तस्मिन् शंसेकेदतिशुष्क-वीक्येर्भविष्यसि । १४. A. दीतवाक्य । १५. A. धमानसो । १६. D. ती । १७. A. प्या । १८. D. नी । १९. A. सतप्ते । २०. A. स्नेहोनांतघूरितौ । २१. A. क्षिरंमक्षु । २२. A. द्वालायै । २३. A. हि । २४. A. पुरु । २५. A. ण्यै । २६. A. ईचा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथवात्र विमूढास्मि [1]सर्वं वेत्सि यथोचितम् ।
ईर्ष्याकोपग्रहोच्चाटस्फोटमन्त्राक्षरोपमम् ॥ १०९६ ॥
तन्वङ्ग्या गदितं वाक्यं श्रुत्वा जातो मुदान्वितः ।
उष्णांशुकरसन्तप्तो जनश्चन्द्रिकया यथा ॥ १०९७ ॥
[2]अवाप्य(आप्यायते)ते महीपाल(लः) प्रियावा[3]क्यैस्तथा श्रुतैः ।
ई[4]र्ष्यापन्न[5]गदस्त(ष्ट)स्य कोपसम्मूर्छितस्य च ॥ १०९८ ॥
पीयूषरस[6]पाने (नं) च जातं राद्रा (ज्ञः) प्रिया च च (वचः) ।
[7]दूती ततः समुत्थाय प्रस्थिता चतुरा ह(हि)[8]ता ॥ १०९९ ॥
तदागमनमालोक्य गवाक्षा[9]च्चलितो नृपः ।
वञ्चये(यँ)[10]ल्लोचने तस्या निर्गता (तो)[11]द्वारदेशतः ॥ ११०० ॥
अन्यस्या भवनो[12]पान्ते निमेषं लीलयान्वितः ।
सम्प्राप्ता [13]त्वरया चेति(टी) देवीवाक्यात्तदन्तिकम् ॥ ११०१ ॥
पृष्टा भूपेन साटो[14]पमिह कस्मात्त्वमागता ।
विचार[15]कस्त्वं भूपाल[16]वितं (चित्तं) ज्ञास्य[17]ति (सि) तर्कवान्
॥ ११०२ ॥
वृ[18]था कोपः[19] कृतो देव [20]किमिदं कारणं वदः (द) ।
त्वमाप (मेव) नेत्रयोस्तस्य(स्या)श्चित्ता(त्ते)वरस(त्वत्सं)गजं
सुखम् ॥ ११०३ ॥
ब्रूते[21] सा त्वगु(दु)णानेव राज[22]न्किं कोपकारणम् ।
त्व[23]चिता त्व[24]द्गुतप्राणा रक्ता [25]त्वय्येव सा सदा ॥ ११०४ ॥
त्वयि रुष्टे न सा जीवेत्किन्न जानासि भूपते ।
सुखं कोपविनिक्षिप्तं क्षिप्ता सा मन्म[26]थाम्बरे ॥ ११०५ ॥

---

१. A. सवेत्सि । २. A. अप्यते । ३. A. क्येस्तथाश्रुतौ । ४. A. ष्य । ५. A. गस्तस्य । ६. D. नापानं तज्जातं भूपतिप्रियम् । ७. A. चूती । ८. A. तां । ९. A. चचितो । १०. A. लो । ११. A. द्वारदेश । १२. A. पतैर्घलीलयान्वित । १३. A त्वरया चूति देवेवाक्यातदंति । १४. A. पामकस्मात्तं मांगतं । १५. D. युक्तं । १६. D. श्चितं । १७. A. सितर्कवान् । १८. A. ध्या । १९. D. प । २०. D. त्वं मां यन्नेत्रयोस्तथा । २१. A. वुते । २२. A किं । २३. A. चिता । २४. A. दृ । २५. A. न्व । २६. A. थाकरे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चातुर्यं कुत्रचिन्न्यस्तं यत्त्वया विधृतं सदा ।
यौवनं [1]म(व)र्जितं लक्ष्मा[2](क्ष्म्या) श्रुतं शीलेन वर्जितम् ॥ ११०६ ॥

सङ्गमेन विना प्रेम सर्वमेतन्निरर्थकम् ।
दुर्लभं मानुषं जन्म राज्यं[3] तत्रापि दुर्लभम् ॥ ११०७ ॥

तत्रापि दुर्लभं प्रेम [4]वल्ली वृक्षमुपेक्षसे(मपेक्षते) ।
अयं निशाच[5]रश्चन्द्रश्चण्डालश्च समन्मथः ॥ ११०८ ॥

उभौ जिघांसतस्तन्वीं[6] रक्ष रक्ष[7] क्षमापते ।
पञ्चत्वं पञ्चबाणोऽसौ[8] (स्या) यावन्न कुरुते प्रभो ॥ ११०९ ॥

तावद्गेहं समागच्छ ततो ब्रूहि यदीप्सितम् ।
[9]इदं तस्या वचः श्रुत्वा नृपः[10] सम्भ्रान्तमानसः ॥ १११० ॥

आगतस्त्वरया वेश्म प्रियायै(याः) प्रियदर्शनः ।
म्लानिं[11] गच्छत्सु सस्येषु पर्जन्य[12] इव पावनः ॥ ११११ ॥

आगतः[13] पृ[14]थिवीपालः प्रेयसीदृष्टिगोच[15]रम् ।
विलोलकंकंस्यात् (मंशुकं तस्याः) कबरी श्लथबन्धानात् (न्धना)
॥ १११२ ॥

गात्रं च श्रमसंयुक्तं [16]विप्लुतं तिलकादिकम् ।
विरहेऽपि रता[17]शंसी रूपं [18]दृष्ट्वा मनोहरम् ॥ १११३ ॥

